CC-0. In Public Domain. Digitization by eGangotri

श्रीहरिः शुभं

न्यायसिद्धान्त मुक्तावली नाम

बुद्धिप्रकाश ग्रंथ भारद्वाजस्य

श्री स० भ० सं० पाठशाला

भिवानी

21-2-22

भिवानी

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

श्रीगुरवे नमः ॥

न्यायसिद्धान्तमुक्तावलीयम् ॥

बद्रीप्रसादशर्मणोऽलिनिवासिनः ॥

बुलन्दशहर (यू० पी०)

श्री ति० भ० पा० सिवानी

Badri Prasad Sharma

४/९/३०

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

* ॐ *

न्यायसिद्धान्तमुक्तावली

(कारिकावली)

कवितार्किक-जैनन्यायविशारद-दर्शनाचार्य-
नृसिंहदेवशास्त्रि विरचित-"सौभाग्यवती"
नामक "विवृति" समेता ।

सेयम्—

मेहरचन्द्र लक्ष्मणदास

अध्यक्ष—संस्कृत पुस्तकालय,
सैदमिट्ठा बाज़ार, लाहौर ।

इत्यनेन—

सुन्दरमुम्बईसीसकाक्षरै-भारद्वाजनाम्नि यन्त्रालये लवपुरे
मुद्रापिता प्रकाशिता च ।

प्रथमसंस्करणम्]　　　　[मूल्यम् १॥)

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

किञ्चित्प्रास्ताविकम् ।

विदितचरमेवैतद्विश्वेषां विपश्चिदपश्चिमानां यत्तत्त्वाध्यवसायमन्तरा न वयं मात्रयाऽपि लोकयात्रां निर्वोढुं क्षमामहे इति । अतएव इष्टसाधनताज्ञानस्य प्रवर्त्तकताप्रवादस्तीर्थकराणां प्रवृत्तिस्वरूपविचारणात्मकविषये विचारान्तरमूर्द्धाभिषिक्त इव लक्ष्यते शास्त्रीयवादभूमिष्विति नतरां बहुलेखमपेक्षते । किन्तु—पदार्थतत्त्वज्ञानं प्रत्यक्षप्रमाणेन भवदपि नानुमानादिप्रामाण्यस्य सर्वथैपेक्षामुद्भावयितुं समर्थम् । अनुमानादीनामप्रामाण्यं वदन्तश्चार्वाकाद्या "अनुमानमप्रमाणं नियतसम्बन्धाऽसिद्धेः" इत्येवमादिभिर्युक्तिभिरेव स्वपक्षं समर्थयन्तो नात्यन्तं तत्प्रतिक्षेपं कर्तुं पारयन्त इत्यावश्यकतामेवाऽनुमानस्योपोद्बलयन्तीत्यपि दार्शनिकानां स्वप्रतीतिसाक्षिकमित्यस्मिन्नप्यंशे न वयं बहु लेखनीं व्यापारयामः । तदेतदनुमानम्—"प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि पञ्चावयवाः" (न्या० १।१।३२) इति पञ्चाऽवयवात्मकतया न्यायशब्देन व्यवाहार्षुर्गौतमाद्याः आद्या न्यायाचार्याः । तथैवोत्तरोत्तरमुदयनाचार्य-गङ्गेशोपाध्यायप्रभृतयोऽनेके महाविद्वांसः प्रचण्डतार्किकमल्लतल्लजाः प्रगाढाभिर्युक्तिभिर्दुर्वादिपक्षममीदलन् प्ररूपयंश्च सर्वतोऽपि न्यायशास्त्रस्योपादेयतामितीयं प्रामाणिकपद्धतिरद्यापि विद्योतते विदुषां मण्डले । किमधिकं वक्तव्यम्—"ईश्वरो नास्ति कश्चिज्जगत्कर्त्ता, नास्ति परलोकः नवा-सर्गविसर्गविचित्रतातानवितानसन्तानकरं किमपि लौकिकबुद्ध्यतीतं नियन्त्रपेक्षि कारणमदृष्टं नाम, न च-स्थूलस्थूलप्रज्ञाऽज्ञानानल्पकल्पनाजल्पजालजल्पाकजाङ्गलिकजनगानोद्गाराः परस्परविरुद्धाऽसम्बद्धार्थाभिधायिनो वेदाः प्रमाणं नाम" इत्येवमाद्यनेककुहेवाकवाक्यविडम्बनानां सौगतादीनां दुरन्ततरमतनिरासेन तदस्तितादिप्रामाण्यसाधनताव्यवस्थापनतया परमास्तिकवैदिकमतस्थिरकिरणेन च अनुमानप्रमाणमेव प्रधानतया मन्नायत इति किमतिपल्लवितेन ।

किम्बहुना—स्वतन्त्रप्रस्थानभूतेष्वपि पूर्वमीमांसादिदर्शनेषु "तत्प्रमाणं बादरायणस्यानपेक्षितत्वात्" (पू० मी० १।१।५) "तत्तु समन्वयात्" (ब्र० सू० १।१।४) "सदा ज्ञाताश्चित्तवृत्तयस्तत्प्रभोः पुरुषस्याऽपरिणामित्वात्" (यो० ४।१८) इत्येवमाद्यया दिशाऽनुमानस्यैवाकारप्रकारप्रचार आदृतः सुस्पष्टो भाति । तथा चावैदिकदर्शनेष्वपि बहुत्र अनुमानस्य सापेक्षता प्रकटीकृता मता च । तस्याऽस्य सपरिकरस्य प्ररूपणं कणादगोतमाभ्यामेवादौ कृतमुपलभ्यते तत्प्रधानत्वादेवाऽस्य शास्त्रस्य न्यायशास्त्रमिति नाम प्रथितमित्यादि समुपापीपदं "न्यायतत्त्वसमीक्षाया" मिति नेह भूयः प्रतन्यते । किन्तु—पाणिनीयमिवेदमपि सर्वोपकाराय विजृम्भत इत्यपि न विस्मरणीयम्, अतएवोक्तम्—"काणादं पाणिनीयञ्च सर्वशास्त्रोपकारकम्" इति । परन्तु गोतमकणादमुनिप्रणीतसूत्रशास्त्रस्य बहुगम्भीरार्थतया हुरूहत्वेन करालकालचक्रचूर्णीकृतबुद्धिवैभवमाणिक्यस्य तत्तदर्थोद्भासनाऽनुपकारकतां मत्वा अनेके सर्वतन्त्रस्वतन्त्रा **अन्नम्भट्ट**प्रभृतयः शास्त्रपारावारपारीणाः सुगमतयाऽर्थावबुबोधयिषया तर्कसङ्ग्रहादीननेकान् ग्रन्थान् जग्रन्थुः येषु सुप्रसिद्धोऽयं पञ्चाननोपाख्यो महाविद्वान् श्रीमान् **विश्वनाथो**ऽपि नैयायिकशिरोमणिः आदौ "भाषापरिच्छेद" नामकं नव्यन्यायस्य प्रक्रियाग्रन्थमाकलयाम्बभूव । यत्र च कणादन्यायमतसिद्धपदार्थस्वरूपं सप्तपदार्थान्तर्गततयैव वर्णयाञ्चकार, यदभ्यासकरणेन सकलापि न्यायप्रक्रिया नावशिष्यतेऽधिगन्तुमित्यतिरोहितमेव

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विपश्चिद्वर्येषु। तदनु—राजीवाख्ये निजशिष्ये परां दयामाकलय्य न्यायसिद्धान्तस्य सर्वतः सारमयो "मुक्तावली" नामा प्रबन्धोऽप्यनेनैव महात्मना विरचित इति साधु समाकलयामः। मुक्तावलीमूलभूतकारिकाग्रन्थस्य "भाषापरिच्छेद" इति नामकरणे जिज्ञासा समुन्मिषेच्चेत्? तदा सङ्केतापरपर्यायस्य भाषाशब्दस्य "भाषायाः स्वाभिमतशास्त्रसङ्केतस्य परिच्छेदो निर्णयोऽन्यस्माद्व्यावृत्तिर्वा यस्मात् यस्य वा असौ "भाषापरिच्छेद" इत्येवं तत्पूर्तिप्रकारो बुद्धिपथमवतरतीति ज्ञायताम्।

"न्यायसिद्धान्तमुक्तावली-" नामकरणबीजन्तु—"सद्द्रव्या"—इत्यादिश्लोकव्याख्यानुसन्धानबलादेवबुध्यतामिति नाधिकं प्रयासमावहामः। सोऽयं मुक्तावलीग्रन्थो देववाणीह्रासकालेऽपि पठनपाठनपरिपाट्यां नात्मानं सर्वथा जहातीति को न जानात्यस्योत्तमतामनिवार्यप्रभावताञ्चेति किमधिकं वक्तव्यं स्यात्। अस्योपरि रामरुद्राद्यनेकपण्डितप्रकाण्ड-प्रणीताष्टीकाग्रन्थाः सन्ति यत्रातीवगम्भीरो विचारो वर्त्तते। परमिदानीन्ते तादृशप्रतिभाप्रभावाभावात् पठनपाठनप्रचारानादरणाच्च दुरूहा इव लक्ष्यन्ते इति मत्वाऽनेकसुहृदयसहृदयबुधजनतल्लजप्रेरितोऽहं मूलार्थलापिनीं सरलसरलां नूतनां "**प्रभां**" नाम टीकामरीरचम्, यदुपयोगिता बहुभिः पण्डितरत्नैर्मता समादृता चेति स्वयं स्वमुखप्रशंसाडाकिनीडात्कारात् नितान्तमेव बिभेमीति ज्ञात्वा नास्मिन् विषयेऽधिकपठनाय पाठकवर्ग आयास्यते। किन्तु—विद्यार्थिलोकालोकसौकर्यायैव बहुपुरातनविशालताशालिसंस्कृतपुस्तकालयाध्यक्षमेहरचन्दलक्ष्मणदासप्रेरणया "मुक्तावल्याम्" इमां "**सौभाग्यवतीं**" नाम्नीं "विवृतिं" विषमस्थलीयमर्मप्रकाशनेऽद्वितीयसरलां प्राणैषम्। अनया पाठकसौकर्यार्थं विषयानुक्रमणादिभूषितया विवृत्या विषयाभ्यासकरणसुगमता कीदृशी भविष्यतीति स्वयमेवाभ्यासैषिणो ज्ञास्यन्ति। किञ्च—अस्य ग्रन्थस्य कर्त्ता-विश्वनाथः कुत्र कदा कतमं प्रदेशमलञ्चकारेति विशकलय्य ज्ञातुमद्यापि न शक्यते इत्येतस्मिन् विषये महानेव खेदोऽस्माकं हृदि जागर्त्ति यत्र प्रबलप्रमाणाऽनुपलम्भ एव कारणम्, तथापि ख्रिस्तीयैकादशशतकसम्भाव्यमानस्थितेर्महानैयायिकगङ्गेशोपाध्यायादुत्तरस्मिन्नेव समयेऽयमासीत्, यतस्तत्कृतचिन्तामणिग्रन्थानुसारं मुक्तावल्यां सिद्धान्तलक्षणादिसमर्थना दृश्यत इति प्रायो विभावयामः। इतोऽधिकदिदृक्षवो तत्प्रणीतां "न्यायतत्त्वसमीक्षा" मवलोकयन्तु। येयं प्रथमसंस्करणे सुपरिष्कृताऽपि द्वितीयसंस्करणे समालोचनात्मकदृष्ट्या समृद्धिं नीता॥

अन्यच्च—"यदेकल एव अनेकपठनपाठनादि-ग्रन्थरचनादि-गृहाविनाभाविशाकलवणेन्धनादिसुसाधनकर्मसु व्यग्रचित्तोऽहं यथामति यथाकालं प्रूफपत्रादिशोधनमकार्षम्। तथापि स्वाभाविकमनुष्यबुद्धिमान्द्यसमुत्थस्खलितिहेतोः क्वचित् क्वचिदक्षरव्यत्यासाद्या अशुद्धयः सञ्जाता उपलभ्येरन् ताश्च प्रकरणानुसन्धानपूर्वकं विद्वद्भिः संशोध्य मय्यत्यन्तमेव कृपाकटाक्षो विधेयः, अहञ्च तेषामानृण्यं कदापि न विस्मरिष्यामीति" सानुनयं प्रार्थयते—

विदुषामनुचरः

ता० ई० ६।२।२८ }

नृसिंहदेवः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विषयानुक्रमणी ॥

विषयः	पृष्ठम्
मङ्गलाचरणम्	१
पदार्थविभागः	५
द्रव्यविभागः	७
गुणविभागः	८
कर्मविभागः	६
सामान्यनिरूपणम्	,,
विशेषनिरूपणम्	१०
समवायनिरूपणम्	११
अभावविभागः	१३
सप्तानां पदार्थानां साधर्म्यनिरूपणम्	१५
द्रव्यादिपञ्चानां द्रव्यगुणकर्मणां च साधर्म्यम्	,,
सामान्यविशेषसमवायाभावानां साधर्म्यनिरूपणं पारिमाण्डल्यादीनामकारणत्वञ्च	१६
कारणत्वनिरूपणं कारणविभागश्च	१८
अन्यथासिद्धत्वनिरूपणम्	२०
अन्यथासिद्धानां परिगणनम्	२२
द्रव्यस्य समवायिकारणत्वकथनं गुणकर्मसाधर्म्यं, आश्रितत्वसाधर्म्यञ्च	२३
क्षित्यादीनां नवानां साधर्म्यम्	२४
क्षितिजलतेजःपवनमनसां साधर्म्यम्	,,
कालाकाशात्मदिशां क्षित्यादीनां पञ्चानां चतुर्णां च साधर्म्यम्	,,
आकाशशरीरिणां साधर्म्यम्	२५
पृथ्वीजलतेजसां पृथ्वीजलयोः पृथिवीतेजसोश्च साधर्म्यम्	२७
पृथिव्यप्तेजोवाय्वाकाशात्मनां साधर्म्यम्	२८
वैधर्म्यदिग्दर्शनम्	,,
वायुप्रभृतिषु के के कति च गुणा इति कथनम्	२६
पृथ्वीनिरूपणम्	,,
अवयविनि शङ्कासमाधानञ्च	,,
परमाणुसिद्धिः	३३
जलनिरूपणम्	३५
तेजोनिरूपणम्	३८

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विषयः	पृष्ठम्.
सुवर्णस्य तैजसत्वम्	४०
वायुनिरूपणम्	४०
आकाशनिरूपणम्	४२
कालनिरूपणम्	४३
दिङ्निरूपणम्	४४
आत्मनिरूपणम्	४५
शरीरात्मवादि (चार्वाक) मतखण्डनम्	४६
इन्द्रियात्मवादिमतखण्डनम्	४७
मनआत्मवादिमतखण्डनम्	४८
विज्ञानात्मवादिमतखण्डनम्	,,
क्षणभङ्गभङ्गः	४६
नित्यविज्ञानात्मवादि (वेदान्ति) मतखण्डनम्	५०
साङ्ख्यमतखण्डनम्	५१
परदेहादावात्मानुमानादि	५३
बुद्धिद्वैविध्यम्	,,
अनुभूतिचातुर्विध्यम्	५४
प्रत्यक्षषड्विधत्वम्	,,
घ्राणादिग्राह्यकथनम्	५५
नयनग्राह्याणां कथनम्	,,
चाक्षुषप्रत्यक्षे कारणकथनम्	५६
त्वगिन्द्रियग्राह्यकथनं त्वाचप्रत्यक्षे कारणकथनं च	,,
ज्ञानसामान्ये कारणम्	५७
मनोग्राह्यकथनम्	५८
अतीन्द्रियज्ञानं षड्विधप्रत्यक्षे हेतुकथनं करणकथनं च	५६
प्रत्यक्षज्ञाने व्यापारकथनं लौकिकसन्निकर्षस्य षड्विधत्वं च ...	६०
अभावप्रत्यक्षे योग्यतानिरूपणम्	६१
अलौकिकप्रत्यक्षत्रैविध्यम्	६३
सामान्यलक्षणप्रत्यासत्तिनिरूपणम्	६४
ज्ञानलक्षणप्रत्यासत्तिनिरूपणम्	६५
योगजप्रत्यासत्तिनिरूपणम्	६७
अनुमितिव्युत्पादनं तत्र व्यापारस्य कारणस्य च कथनम् ...	,,
अनुमितिकरणे प्राचीनमतखण्डनम्	,,

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विषयः	पृष्ठम्
परामर्शलक्षणम्	६८
व्याप्तिलक्षणम्	७०
पक्षलक्षणम्	८३
हेत्वाभासविभागः	८७
अनेकान्तहेत्वासविभागः	"
हेत्वाभासलक्षणम्	"
अनैकान्तिकलक्षणादि	९०
साधारणहेत्वाभासलक्षणम्	९४
असाधारणहेत्वाभासलक्षणम्	९५
अनुपसंहारिहेत्वाभासलक्षणम्	"
विरुद्धलक्षणम्	"
असिद्धिविभागः	९६
असिद्धित्रयोदाहरणानि	"
सत्प्रतिपक्षलक्षणम्	९७
कालात्ययापदिष्ट (बाधित) लक्षणम्	"
उपमितिव्युत्पादनम्	"
शाब्दबोधप्रकारप्रदर्शनम्	९८
शक्तिग्रहकारणविचारः	१००
व्याकरणाच्छक्तिग्रहः	"
कोशाच्छक्तिग्रहः	१०२
आप्तवाक्याच्छक्तिग्रहः	"
व्यवहाराच्छक्तिग्रहः	"
वाक्यशेषाच्छक्तिग्रहः	१०३
विवरणाच्छक्तिग्रहः	१०४
प्रसिद्धपदसांनिध्याच्छक्तिग्रहः	"
जातिशक्तिवादादिः	"
पदलक्षणं तद्भेदनिरूपणं च	१०५
लक्षणानिरूपणम्	१०६
शाब्दबोधे सहकारिकारणम् आसत्तिनिरूपणं च	१११
योग्यतानिरूपणम्	११४
आकाङ्क्षानिरूपणं तात्पर्यनिरूपणं च	११५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विषयः	पृष्ठम्.
स्मरणनिरूपणम् … … …	,,
मनोनिरूपणम् … … …	११६
गुणनिरूपणम् … … …	११८
मूर्तगुणाः … … …	११९
अमूर्तगुणाः … … …	१२०
मूर्तामूर्तगुणाः … … …	,,
अनेकाश्रितगुणाः … … …	,,
एकैकवृत्तिगुणाः … … …	,,
वैशेषिकगुणाः … … …	,,
सामान्यगुणाः … … …	,,
द्वीन्द्रियग्राह्यगुणाः … … …	१२१
एकैकेन्द्रियग्राह्यगुणाः … … …	,,
अतीन्द्रिया अकारणगुणोत्पन्ना गुणाः … …	,,
अपाकजगुणाः … … …	,,
कारणगुणोद्भवगुणाः … … …	,,
कर्मजगुणाः … … …	१२२
असमवायिकारणगुणाः … … …	,,
निमित्तकारणगुणाः … … …	,,
असमवायिनिमित्तकारणगुणाः … … …	,,
अव्याप्यवृत्तिगुणाः … … …	१२३
रूपनिरूपणम् … … …	,,
रसनिरूपणम् … … …	१२५
गन्धनिरूपणम् … … …	,,
स्पर्शनिरूपणम् … … …	,,
वैशेषिकमते पाकोत्पत्तिः … … …	१२६
त्वरा (पाक) प्रक्रिया … … …	१२७
नैयायिकमते पाकोत्पत्तिः … … …	१३०
सङ्ख्यानिरूपणम् … … …	,,
अपेक्षाबुद्धिलक्षणम् … … …	१३२
परिमाणनिरूपणम् … … …	१३३
पृथक्त्वनिरूपणम् … … …	१३४
संयोगनिरूपणम् … … …	१३५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विषयः	पृष्ठम्
विभागनिरूपणम्	,,
परत्वापरत्वयोर्निरूपणम्	१३७
बुद्धिनिरूपणम्	१३८
संशयनिरूपणम्	१३९
प्रमानिरूपणम्	,,
प्रामाण्यस्य स्वतोग्राह्यत्वखण्डनम्	१४१
व्याप्तिग्रहोपायः	१४३
उपाधिनिरूपणम्	१४४
उपाधिप्रयोजनम्	१४५
वैशेषिकमते प्रमाणदर्शनं तन्मतखण्डनं च	१४६
अनुमानत्रैविध्यं व्याप्तिद्वैविध्यं च	१४७
व्यतिरेकव्याप्तिनिरूपणम्	१४८
अर्थापत्तेः प्रमाणान्तरत्वखण्डनम्	,,
अनुपलम्भस्य प्रमाणान्तरत्वखण्डनम्	१४९
चेष्टायाः प्रमाणान्तरत्वखण्डनम्	,,
सुखनिरूपणम्	,,
दुःखनिरूपणम्	,,
इच्छानिरूपणम्	१५०
द्वेषनिरूपणम्	१५१
प्रयत्ननिरूपणम्	,,
प्रवर्त्तकहेतौ गुरोर्मतम्	१५१
,, ,, नैयायिकमतम्	१५२
गुरुत्वनिरूपणम्	१५७
द्रवत्वनिरूपणम्	,,
स्नेहनिरूपणम्	१५८
संस्कारनिरूपणम्	,,
अदृष्ट (धर्माधर्म) निरूपणम्	१६०
शब्दनिरूपणम्	१६२
ग्रन्थसमाप्तिः	१६४

॥ इति विषयानुक्रमणी समाप्ता ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

❀ कारिकावली ❀

नूतनजलधररुचये गोपवधूटीदुकूलचौराय । तस्मै कृष्णाय नम संसारमहीरुहस्य बीजाय ॥ १ ॥ द्रव्यं गुणस्तथा कर्म सामान्यं सविशेषकम् । समवायस्तथाऽभावः पदार्थाः सप्त कीर्तिताः ॥ २ ॥ क्षित्यप्तेजोमरुद्व्योमकालदिग्देहिनो मनः । द्रव्याण्यथ गुणा रूपं रसो गन्धस्ततः परम् ॥३॥ स्पर्शः संख्या परिमितिः पृथक्त्वं च ततः परम् । संयोगश्च विभागश्च परत्वं चापरत्वकम् ॥४॥ बुद्धिः सुखं दु खमिच्छा द्वेषो यत्नो गुरुत्वकम् । द्रवत्वं स्नेहसंस्कारावदृष्टं शब्द एव च ॥५॥ उत्क्षेपणं ततोऽपक्षेपणमाकुञ्चनं तथा । प्रसारणं च गमनं कर्माण्येतानि पञ्च च ॥ ६ ॥ भ्रमणं रेचनं स्यन्दनोर्ध्वज्वलनमेव च । तिर्यग्गमनमप्यत्र गमनादेव लभ्यते ॥ ७ ॥ सामान्यं द्विविधं प्रोक्तं परं चापरमेव च । द्रव्यादित्रिकवृत्तिस्तु सत्ता परतयोच्यते ॥ ८ ॥ परभिन्ना तु या जातिः सैवापरतयोच्यते । द्रव्यत्वादिकजातिस्तु परापरतयोच्यते ॥९॥ व्यापकत्वात्परापि स्याद्व्याप्यत्वादपरापि च । अन्त्यो नित्यद्रव्यवृत्तिर्विशेषः परिकीर्तितः ॥१०॥ घटादीनां कपालादौ द्रव्येषु गुणकर्मणोः । तेषु जातेश्च सम्बन्धः समवायः प्रकीर्तितः ॥११॥ अभावस्तु द्विधान्योन्यसंसर्गाभावभेदतः । प्रागभावस्तथा ध्वंसोऽप्यत्यन्ताभाव एव च ॥१२॥ एवं त्रैविध्यमापन्नः संसर्गाभाव इष्यते । सप्तानामपि साधर्म्यं ज्ञेयत्वादिकमुच्यते ॥१३॥ द्रव्यादयः पञ्च भावा अनेके समवायिनः । सत्तावन्तस्त्रयस्त्वाद्या गुणादिर्निर्गुणक्रियः ॥१४॥ सामान्यपरिहीनास्तु सर्वे जात्यादयो मताः । पारिमाण्डल्यभिन्नानां कारणत्वमुदाहृतम् ॥१५॥ अन्यथासिद्धिशून्यस्य नियता पूर्ववर्तिता । कारणत्वं भवेत्तस्य त्रैविध्यं परिकीर्तितम् ॥१६॥ समवायिकारणत्वं ज्ञेयमथाप्यसमवायिहेतुत्वम् । एवं न्यायनयज्ञैस्तृतीयमुक्तं निमित्तहेतुत्वम् ॥१७॥ यत्समवेतं कार्यं भवति ज्ञेयं तु समवायिजनकं तत् । तत्रासन्नं जनकं द्वितीयमाभ्यां परं तृतीयं स्यात् ॥१८॥ येन सह पूर्वभावः कारणमादाय वा यस्य । अन्यं प्रति पूर्वभावे ज्ञाते यत्पूर्वभावविज्ञानम् ॥१९॥ जनकं प्रति पूर्ववृत्तितामपरिज्ञाय न यस्य गृह्यते । अतिरिक्तमथापि यद्भवेन्नियतावश्यकपूर्वभाविनः ॥२०॥ एते पञ्चान्यथासिद्धा दण्डत्वादिकमादिमम् । घटादौ दण्डरूपादि द्वितीयमपि दर्शितम् ॥ २१ ॥ तृतीयं तु भवेद्व्योम कुलालजनकोऽपरः । पञ्चमो रासभादिः स्यादेतेष्वावश्यकस्त्वसौ ॥ २२ ॥ समवायिकारणत्वं द्रव्यस्यैवेति विज्ञेयम् । गुणकर्ममात्रवृत्ति ज्ञेयमथाप्यसमवायिहेतुत्वम् ॥ २३ ॥ अन्यत्र नित्यद्रव्येभ्य आश्रितत्वमिहोच्यते । क्षित्यादीनां नवानां तु द्रव्यत्वं गुणयोगिता ॥ २४ ॥ क्षितिर्जलं तथा तेजः पवनो मन एव च । परापरत्वमूर्तत्वक्रियावेगाश्रया अमी ॥ २५ ॥ कालखात्मदिशां सर्वगतत्वं परमं महत् । क्षित्यादि पञ्च भूतानि चत्वारि स्पर्शवन्ति हि ॥२६॥ द्रव्यारम्भश्चतुर्षु स्यादथाकाशशरीरिणाम् । अव्याप्यवृत्तिः क्षणिको विशेषगुण इष्यते ॥२७॥ रूपद्रवत्वप्रत्यक्षयोगिनः प्रथमास्त्रयः । गुरुणी द्वे रसवती द्वयोर्नैमित्तिको द्रवः ॥२८॥ आत्मानो

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भूतवर्गाश्च विशेषगुणयोगिनः । यदुक्तं यस्य साधर्म्यं वैधर्म्यमितरस्य तत् ॥२९॥ स्पर्शादयोऽष्टौ
वेगाख्यः संस्कारो मरुतो गुणाः । स्पर्शाद्यष्टौ रूपवेगौ द्रवत्वं तेजसो गुणाः ॥३०॥ स्पर्शादयोऽष्टौ
वेगश्च गुरुत्वं च द्रवत्वकम् । रूपं रसस्तथा स्नेहो वारिण्येते चतुर्दश ॥३१॥ स्नेहहीना गन्ध-
युताः क्षितावेते चतुर्दश । बुद्ध्यादिषट्कं सङ्ख्यादिपञ्चकं भावना तथा ॥३२॥ धर्माधर्मौ गुणा
एत आत्मनः स्युश्चतुर्दश । सङ्ख्यादिपञ्चकं कालदिशोः शब्दश्च ते च खे ॥३३॥ सङ्ख्यादयः
पञ्च बुद्धिरिच्छा यत्नोऽपि चेश्वरे । परापरत्वे सङ्ख्याद्याः पञ्च वेगश्च मानसे ॥३४॥ तत्र क्षिति-
र्गन्धहेतुर्नानारूपवती मता । षड्विधस्तु रसस्तत्र गन्धस्तु द्विविधो मतः ॥३५॥ स्पर्शस्तस्यास्तु
विज्ञेयो ह्यनुष्णाशीतपाकजः । नित्यानित्या च सा द्वेधा नित्यास्यादणुलक्षणा ॥३६॥ अनित्या
तु तदन्या स्यात्सैवावयवयोगिनी । सा च त्रिधा भवेद्देहमिन्द्रियं विषयस्तथा ॥३७॥ योनि-
जादि भवेद्देहमिन्द्रियं घ्राणलक्षणम् । विषयो द्व्यणुकादिश्च ब्रह्माण्डान्त उदाहृतः ॥३८॥ वर्णः
शुक्लो रसस्पर्शौ जले मधुरशीतलौ । स्नेहस्तत्र द्रवत्वं तु सांसिद्धिकमुदाहृतम् ॥३९॥ नित्यतादि
प्रथमवत्किंतु देहमयोमिजम । इन्द्रियं रसनं सिन्धुहिमादिर्विषयो मतः ॥४०॥ उष्णस्पर्शस्ते-
जसस्तु स्याद्रूपं शुक्लभास्वरम् । नैमित्तिकं द्रवत्वं तु नित्यतादि च पूर्ववत् ॥४१॥ इन्द्रियं नयनं
वह्निस्वर्णादिर्विषयो मत. । अपाकजोऽनुष्णाशीतः स्पर्शस्तु पवने मतः ॥४२॥ तिर्यग्गमनवानेष
ज्ञेयः स्पर्शादिलिङ्गकः । पूर्ववन्नित्यताद्युक्तं देहव्यापि त्वगिन्द्रियम् ॥ ४३ ॥ प्राणादिस्तु महा-
वायुपर्यन्तो विषयो मतः । आकाशस्य तु विज्ञेयः शब्दो वैशेषिको गुणः ॥४४॥ इन्द्रियं च
भवेच्छ्रोत्रमेक सन्नप्युपाधितः । जन्यानां जनकः कालो जगतामाश्रयो मतः ॥४५॥ परापरत्व-
धीहेतुः क्षणादिः स्यादुपाधित । दूरान्तिकादिधीहेतुरेका नित्या दिगुच्यते ॥४६॥ उपाधि-
भेदादेकापि प्राच्यादिव्यपदेशभाक् । आत्मेन्द्रियाद्यधिष्ठाता करणं हि सकर्तृकम् ॥४७॥ शरीरस्य
न चैतन्यं मृतेषु व्यभिचारतः । तथात्वं चेदिन्द्रियाणामुपघाते कथं स्मृतिः ॥४८॥ मनोऽपि
न तथा ज्ञानाद्यनध्यक्षं तदा भवेत् । धर्माधर्माश्रयोऽध्यक्षो विशेषगुणयोगतः ॥४९॥ प्रवृत्त्या-
द्यनुमेयोऽयं रथगत्येव सारथिः । अहंकारस्याश्रयोऽयं मनोमात्रस्य गोचरः ॥ ५० ॥
विभुर्बुद्ध्यादिगुणवान्बुद्धिस्तु द्विविधा मता । अनुभूतिः स्मृतिश्च स्यादनुभूतिश्चतुर्विधा
॥५१॥ प्रत्यक्षमप्यनुमितिस्तथोपमितिशब्दजे । घ्राणजादिप्रभेदेन प्रत्यक्षं षड्विधं मतम् ॥५२॥
घ्राणस्य गोचरो गन्धो गन्धत्वादिरपि स्मृतः । तथा रसो रसज्ञायास्तथा शब्दोऽपि च श्रुतेः ॥५३
उद्भूतरूपं नयनस्य गोचरो द्रव्याणि तद्वन्ति पृथक्त्वसङ्ख्ये । विभागसंयोगपरापरत्वस्नेहद्रवत्वं
परिमाणयुक्तम् ॥ ५४ ॥ क्रिया जातिर्योग्यवृत्तिः समवायश्च तादृशः । गृह्णाति चक्षुः
सम्बन्धादालोकोद्भूतरूपयोः ॥ ५५ ॥ उद्भूतस्पर्शवद्द्रव्यं गोचरः सोऽपि च त्वचः ।
रूपान्यचक्षुषो योग्यं रूपमत्रापि कारणम् ॥ ५६ ॥ द्रव्याध्यक्षे त्वचो योगो मनसा ज्ञान-
कारणम् । मनोग्राह्यं सुखं दुःखमिच्छा द्वेषो मतिः कृतिः ॥ ५७ ॥ ज्ञानं यन्निर्विकल्पाख्यं
तदतीन्द्रियमिष्यते । महत्त्वं षड्विधे हेतुरिन्द्रियं करणं मतम् ॥ ५८ ॥ विषयेन्द्रियसम्बन्धो
व्यापारः सोऽपि षड्विधः । द्रव्यग्रहस्तु संयोगात्संयुक्तसमवायतः ॥ ५९ ॥ द्रव्येषु समवेतानां

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तथा तत्समवायतः। तत्रापि समवेतानां शब्दस्य समवायतः ॥ ६० ॥ तद्वृत्तीनां समवेतसमवायेन तु ग्रहः। विशेषणतया तद्वदभावानां ग्रहो भवेत् ॥ ६१ ॥ यदि स्यादुपलभ्येतेत्येवं यत्र प्रसज्यते। प्रत्यक्षं समवायस्य विशेषणतया भवेत् ॥ ६२ ॥ अलौकिकः सन्निकर्षस्त्रिविधः परिकीर्तितः। सामान्यलक्षणो ज्ञानलक्षणो योगजस्तथा ॥ ६३ ॥ आसत्तिराश्रयाणां तु सामान्यज्ञानमिष्यते। तदिन्द्रियजतद्धर्मबोधसामग्र्यपेक्ष्यते ॥ ६४ ॥ विषयी यस्य तस्यैव व्यापारो ज्ञानलक्षणः। योगजो द्विविधः प्रोक्तो युक्तयुञ्जानभेदतः ॥ ॥६ ॥ युक्तस्य सर्वदा भानं चिन्तासहकृतोऽपरः। व्यापारस्तु परामर्शः करणं व्याप्तिधीर्भवेत् ॥ ६६ ॥ अनुमायां ज्ञायमानं लिङ्गं तु करणं नहि। अनागतादिलिङ्गेन न स्यादनुमितिस्तदा ॥ ६७ ॥ व्याप्यस्य पक्षवृत्तित्वधीः परामर्श उच्यते। व्याप्तिः साध्यवदन्यस्मिन्नसम्बन्ध उदाहृतः ॥ ६८ ॥ अथवा हेतुमन्निष्ठविरहाप्रतियोगिता। साध्येन हेतोरैकाधिकरण्यं व्याप्तिरुच्यते ॥ ६९ ॥ सिषाधयिषया शून्या सिद्धिर्यत्र न विद्यते। स पक्षस्तत्र वृत्तित्वज्ञानादनुमितिर्भवेत् ॥ ७० ॥ अनैकान्तो विरुद्धश्चाप्यसिद्धः प्रतिपक्षितः। कालात्ययापदिष्टश्च हेत्वाभासास्तु पञ्चधा ॥ ७१ ॥ आद्यः साधारणस्तु स्यादसाधारणकोऽपरः। तथैवानुपसंहारी त्रिधाऽनैकान्तिको भवेत् ॥ ७२ ॥ यः सपक्षे विपक्षे च भवेत्साधारणस्तु सः। यस्तूभयस्माद्व्यावृत्तः स चासाधारणो मतः ॥ ७३ ॥ तथैवानुपसंहारी केवलान्वयिपक्षकः। यः साध्यवति नैवास्ति स विरुद्ध उदाहृतः ॥ ७४ ॥ आश्रयासिद्धिराद्या स्यात्स्वरूपासिद्धिरप्यथ। व्याप्यत्वासिद्धिरपरा स्यादसिद्धिरतस्त्रिधा ॥ ७४ ॥ पक्षासिद्धिर्यत्र पक्षो भवेन्मणिमयो गिरिः। ह्रदो द्रव्यं धूमत्त्वादत्रासिद्धिरथापरा ॥ ७६ ॥ व्याप्यत्वासिद्धिरपरा नीलधूमादिके भवेत्। विरुद्धयोः परामर्शो हेत्वोः सत्प्रतिपक्षता ॥ ७७ ॥ साध्यशून्यो यत्र पक्षस्त्वसौ बाध उदाहृतः। उत्पत्तिकालीनघटे गन्धादिर्यत्र साध्यते ॥ ७८ ॥ ग्रामीणस्य प्रथमतः पश्यतो गवयादिकम्। सादृश्यधीर्गवादीनां या स्यात्सा करणं मतम् ॥ ७९ ॥ वाक्यार्थस्यातिदेशस्य स्मृतिर्व्यापार उच्यते। गवयादिपदानां तु शक्तिधीरुपमा फलम् ॥ ८० ॥ पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः। शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी ॥ ८१ ॥ लक्षणा शक्यसम्बन्धस्तात्पर्यानुपपत्तितः। आसत्तियोग्यताकाङ्क्षा तात्पर्यज्ञानमिष्यते ॥ ८२ ॥ कारणं संनिधानं तु पदस्यासत्तिरुच्यते। पदार्थे तत्र तद्वत्ता योग्यता परिकीर्तिता ॥ ८३ ॥ यत्पदेन विना यस्याननुभावकता भवेत्। आकाङ्क्षा वक्तुरिच्छा तु तात्पर्यं परिकीर्तितम् ॥ ८४ ॥ साक्षात्कारे सुखादीनां करणं मन उच्यते ॥ अयौगपद्याज्ज्ञानानां तस्याणुत्वमिहेष्यते ॥ ८५ ॥ अथ द्रव्याश्रिता ज्ञेया निर्गुणा निष्क्रिया गुणाः। रूपं रसः स्पर्शगन्धौ परत्वमपरत्वकम् ॥ ८६ ॥ द्रवत्वं स्नेहवेगाश्च मता मूर्तगुणा अमी। धर्माधर्मौ भावना च शब्दो बुद्ध्यादयोऽपि च ॥ ८७ ॥ एतेऽमूर्तगुणाः सर्वे विद्वद्भिः परिकीर्तिताः। सङ्ख्यादयो विभागान्ता उभयेषां गुणा मताः ॥ ८८ ॥ संयोगश्च विभागश्च सङ्ख्या द्वित्वादिकास्तथा। द्विपृथक्त्वादयस्तद्वदेतेऽनेकाश्रिता गुणाः ॥ ८९ ॥ अतः शेषगुणाः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सर्वे मता एकैकवृत्तयः । बुद्ध्यादिषट्कं स्पर्शान्ताः स्नेहः सांसिद्धिको द्रवः ॥ ९० ॥ अदृष्ट-भावनाशब्दा अमी वैशेषिका गुणाः । सङ्ख्यादिरपरत्वान्तो द्रवोऽसांसिद्धिकस्तथा ॥ ९१ ॥ गुरुत्ववेगौ सामान्यगुणा एते प्रकीर्तिताः । सङ्ख्यादिपरत्वान्तो द्रवत्वं स्नेह एव च ॥ ९२ ॥ एते तु द्वीन्द्रियग्राह्या अथ स्पर्शान्तशब्दकाः । बाह्यैकैकेन्द्रियग्राह्या गुरुत्वादृष्टभावनाः ॥९३॥ अतीन्द्रिया विभूनां तु ये स्युर्वैशेषिका गुणाः । अकारणगुणोत्पन्ना एते तु परिकीर्तिताः ॥९४॥ आपाकजास्तु स्पर्शान्ता द्रवत्वं च तथाविधम् । स्नेहवेगगुरुत्वैकपृथक्त्वपरिमाणकम् ॥ ९५ ॥ स्थितिस्थापक इत्येते स्युः कारणगुणोद्भवाः । संयोगश्च विभागश्च वेगश्चैते तु कर्मजाः ॥ ९६ ॥ स्पर्शान्तपरिमाणैकपृथक्त्वस्नेहशब्दके । भवेदसमवायित्वमथ वैशेषिके गुणे ॥९७॥ आत्मनः स्यान्निमित्तत्वमुष्णस्पर्शगुरुत्वयोः । वेगेऽपि च द्रवत्वे च संयोगादिद्वये तथा ॥९८॥ द्विधैव कारणत्वं स्यादथ प्रादेशिको भवेत् । वैशेषिको विभुगुणः संयोगादिद्वयं तथा ॥ ९९ ॥ चक्षुर्ग्राह्यं भवेद्रूपं द्रव्यादेरुपलम्भकम् । चक्षुषः सहकारि स्याच्छुक्लादिकमनेकधा ॥ १०० ॥ जलादिपरमाणौ तन्नित्यमन्यत्सहेतुकम् । रसस्तु रसनाग्राह्यो मधुरादिरनेकधा ॥ १०१ ॥ सहकारी रसज्ञाया नित्यतादि च पूर्ववत् । घ्राणग्राह्यो भवेद्गन्धो घ्राणस्यैवोपकारकः ॥१०२॥ सौरभश्चासौरभश्च स द्वेधा परिकीर्तितः । स्पर्शस्त्वगिन्द्रियग्राह्यस्त्वचः स्यादुपकारकः ॥१०३॥ अनुष्णाशीतशीतोष्णभेदात्स त्रिविधो मतः । काठिन्यादि क्षितावेव नित्यतादि च पूर्ववत् ॥ १०४ ॥ एतेषां पाकजत्वं तु क्षितौ नान्यत्र कुत्रचित् । तत्रापि परमाणौ स्यात्पाको वैशेषिके नये ॥ १०५ ॥ नैयायिकानां तु नये द्व्यणुकादावपीष्यते । गणनाव्यवहारे तु हेतुः सङ्ख्याभिधीयते ॥ १०६ ॥ नित्येषु नित्यमेकत्वमनित्येऽनित्यमिष्यते । द्वित्वादयः परार्धान्ता अपेक्षाबुद्धिजा मताः ॥ १०७ ॥ अनेकाश्रयपर्याप्ता एते तु परिकीर्तिताः । अपेक्षाबुद्धिनाशाच्च तेषां नाशो निरूपितः ॥ १०८ ॥ अनेकैकत्वबुद्धिर्या सापेक्षाबुद्धिरिष्यते । परिमाणं भवेन्मा-नव्यवहारस्य कारणम् ॥१०९॥ अणु दीर्घं महद्ध्रस्वमिति तद्भेद ईरितः । अनित्ये तदनित्यं स्यान्नित्ये नित्यमुदाहृतम् ॥ ११० ॥ सङ्ख्यातः परिमाणाच्च प्रचयादपि जायते । अनित्यं द्व्यणुकादौ तु सङ्ख्याजन्यमुदाहृतम् ॥ १११ ॥ परिमाणं घटादौ तु परिमाणजमुच्यते । प्रचयः शिथिलाख्यो यः संयोगस्तेन जन्यते ॥ ११२ ॥ परिमाणं तूलकादौ नाशस्त्वाश्रय-नाशतः । सङ्ख्यावत्तु पृथक्त्वं स्यात्पृथक्प्रत्ययकारणम् ॥ ११३ ॥ अन्योन्याभावतो नास्य चरितार्थत्वमिष्यते । अस्मात्पृथगिदं नेति प्रतीतिर्हि विलक्षणा ॥ ११४ ॥ अप्राप्तयोस्तु या प्राप्तिः सैव संयोग ईरितः । कीर्तितस्त्रिविधस्त्वेष आद्योऽन्यतरकर्मजः ॥ ११५ ॥ तथोभय-क्रियाजन्यो भवेत्संयोगजोऽपरः । आदिमः श्येनशैलादिसंयोगः परिकीर्तितः ॥ ११६ ॥ मेषयोः संनिपातो यः स द्वितीय उदाहृतः । कपालतरुसंयोगात्संयोगस्तरुकुम्भयोः ॥ ११७ ॥ तृतीयः स्यात्कर्मजोऽपि द्विधैव परिकीर्तितः । अभिघातो नोदनं च शब्दहेतुरिहादिमः ॥ ११८ ॥ शब्दाहेतुर्द्वितीयः स्याद्विभागोऽपि त्रिधा भवेत् । एककर्मोद्भवस्त्वाद्यो द्वयकर्मोद्भवोऽपरः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

॥ ११६ ॥ विभागजस्तृतीयः स्यात्तृतीयोऽपि द्विधा भवेत् । हेतुमात्रविभागोत्थो हेत्वहेतुविभागजः ॥ १२० ॥ परत्वं चापरत्वं च द्विविधं परिकीर्तितम् । दैशिकं कालिकं चापि मूर्त एव तु दैशिकम् ॥ १२१ ॥ परत्वं मूर्तसंयोगभूयस्त्वज्ञानतो भवेत् । अपरत्वं तदल्पत्वबुद्धितः स्यादितीरितम् ॥ १२२ ॥ तयोरसमवायी तु दिक्संयोगस्तदाश्रये । दिवाकरपरिस्पन्दभूयस्त्वज्ञानतो भवेत् ॥ १२३ ॥ परत्वमपरत्वं तु तदीयाल्पत्वबुद्धितः । अत्र त्वसमवायी स्यात्संयोगः कालपिण्डयोः ॥ १२४ ॥ अपेक्षाबुद्धिनाशेन नाशस्तेषां निरूपितः । बुद्धेः प्रपञ्चः प्रागेव प्रायशो विनिरूपितः ॥ १२५ ॥ अथावशिष्टोऽप्यपरः प्रकारः परिदर्श्यते । अप्रमा च प्रमा चेति द्विविधं ज्ञानमिष्यते ॥ १२६ ॥ तच्छून्ये तन्मतिर्या स्यादप्रमा सा निरूपिता । तत्प्रपञ्चो विपर्यासः संशयोऽपि प्रकीर्तितः ॥ १२७ ॥ आद्यो देहेष्वात्मबुद्धिः शंखादौ पीतता मतिः । भवेन्निश्चयरूपा या संशयोऽथ प्रदर्श्यते ॥ १२८ ॥ किंस्विन्नरो वा स्थाणुर्वेत्यादिबुद्धिस्तु संशयः । तदभावाप्रकाराधीस्तत्प्रकारा तु निश्चयः ॥ १२९ ॥ स संशयो मतिर्या स्यादेकत्राभावभावयोः । साधारणादिधर्मस्य ज्ञानं संशयकारणम् ॥ १३० ॥ दोषोऽप्रमाया जनकः प्रमायास्तु गुणो भवेत् । पित्तदूरत्वादिरूपो दोषो नानाविधः स्मृतः ॥ १३१ ॥ प्रत्यक्षे तु विशेष्येण विशेषणवता समम् । संनिकर्षो गुणस्तु स्यादथ त्वनुमितौ गुणः ॥ १३२ ॥ पक्षे साध्यविशिष्टे तु परामर्शो गुणो भवेत् । शक्ये सादृश्यबुद्धिस्तु भवेदुपमितौ गुणः ॥ १३३ ॥ शाब्दबोधे योग्यतायास्तात्पर्यस्याथ वा प्रमा । गुणः स्याद्भ्रमभिन्नं तु ज्ञानमत्रोच्यते प्रमा ॥ १३४ ॥ अथवा तत्प्रकारं यज्ज्ञानं तद्वद्विशेष्यकम् । तत्प्रमा न प्रमा नापि भ्रमः स्यान्निर्विकल्पकम् ॥ १३५ ॥ प्रकारतादिशून्यं हि सम्बन्धानवगाहि तत् । प्रमात्वं न स्वतो ग्राह्यं संशयानुपपत्तितः ॥ १३६ ॥ व्यभिचारस्याग्रहोऽपि सहचारग्रहस्तथा । हेतुर्व्याप्तिग्रहे तर्कः क्वचिच्छङ्कानिवर्तकः ॥ १३७ ॥ साध्यस्य व्यापको यस्तु हेतोरव्यापकस्तथा । स उपाधिर्भवेत्तस्य निष्कर्षोऽयं प्रदर्श्यते ॥१३८॥ सर्वे साध्यसमानाधिकरणाः स्युरुपाधयः । हेतोरेकाश्रये येषां स्वसाध्यव्यभिचारिता ॥ १३९ ॥ व्यभिचारस्यानुमानमुपाधेस्तु प्रयोजनम् । शब्दोपमानयोर्नैवं पृथक्प्रामाण्यमिष्यते ॥ १४० ॥ अनुमानगतार्थत्वादिति वैशेषिकं मतम् । तन्न सम्यग्विना व्याप्तिबोधं शब्दादिबोधतः ॥ १४१ ॥ त्रैविध्यमनुमानस्य केवलान्वयिभेदतः । द्वैविध्यं तु भवेद्व्याप्तेरन्वयव्यतिरेकतः ॥ १४२ ॥ अन्वयव्याप्तिरुक्तैव व्यतिरेकादथोच्यते । साध्याभावव्यापकत्वं हेत्वभावस्य यद्भवेत् ॥ १४३ ॥ अर्थापत्तेस्तु नैवेह प्रमाणान्तरमिष्यते । व्यतिरेकव्याप्तिबुद्धया चरितार्था हि सा यतः ॥ १४४ ॥ सुखं तु जगतामेव काम्यं धर्मेण जायते । अधर्मजन्यं दुःखं स्यात्प्रतिकूलं सचेतसाम् ॥ १४५ ॥ निर्दुःखत्वे सुखे चेच्छा तज्ज्ञानादेव जायते । इच्छा तु तदुपाये स्यादिष्टोपायत्वधीर्यदि ॥ १४६ ॥ चिकीर्षाकृतिसाध्यत्वप्रकारेच्छा च या भवेत् । तद्धेतुः कृतिसाध्येष्टसाधनत्वमतिर्भवेत् ॥ १४७ ॥ बलवद्द्विष्टहेतुत्वमतिः स्यात्प्रतिबन्धिका । तदहेतुत्वबुद्धेस्तु हेतुत्वं कस्यचिन्मते ॥ १४८ ॥ द्विष्टसाधनताज्ञानं भवेद्द्वेषस्य कारणम् । प्रवृत्तिश्च निवृत्तिश्च तथा जीवनकारणम् ॥ १४९ ॥ एवं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रयत्नत्रैविध्यं तान्त्रिकैः परिकीर्तितम् । चिकीर्षाकृतिसाध्येष्टसाधनत्वमतिस्तथा ॥ १५० ॥ उपादानस्य चाध्यक्षं प्रवृत्तौ जनकं भवेत् । निवृत्तिस्तु भवेद् द्वेषाद्द्विष्टसाधनताधियः ॥१५१॥ यत्नो जीवनयोनिस्तु सर्वदातीन्द्रियो भवेत् । शरीरे प्राणसंचारे कारणं परिकीर्तितम् ॥ १५२॥ अतीन्द्रियं गुरुत्वं स्यात्पृथिव्यादिद्वये तु तत् । अनित्ये तदनित्यं स्यान्नित्ये नित्यमुदाहृतम् ॥ १५३ ॥ तदेवासमवायि स्यात्पतनाख्ये तु कर्मणि । सांसिद्धिकं द्रवत्वं स्यान्नैमित्तिक मथापरम् ॥ १५४ ॥ सांसिद्धिकं तु सलिले द्वितीयं क्षितितेजसोः । परमाणुजले नित्यमन्यत्रानित्यमुच्यते ॥ १५५ ॥ नैमित्तिकं वह्नियोगात्तपनीयघृतादिषु । द्रवत्वं स्यन्दने हेतुर्निमित्तं संग्रहे तु तत् ॥ १५६ ॥ स्नेहो जले स नित्योऽणावनित्योऽवयविन्यसौ । तैलान्तरे तत्प्रकर्षाद् दहनस्यानुकूलता ॥ १५७ ॥ संस्कारभेदो वेगोऽथ स्थितिस्थापकभावने । मूर्तमात्रे तु वेगः स्यात्कर्मजो वेगजः क्वचित् ॥ १५८ ॥ स्थितिस्थापकसंस्कारः क्षितौ केचिच्चतुर्ष्वपि । अतीन्द्रियोऽसौ विज्ञेयः क्वचित्स्पन्देऽपिकारणम् ॥ १५९ ॥ भावनाख्यस्तु संस्कारो जीववृत्तिरतीद्रियः उपेक्षानात्मकस्तस्य निश्चयः कारणं भवेत् ॥ १६० ॥ स्मरणे प्रत्यभिज्ञायामप्यसौ हेतुरुच्यते । धर्माधर्मावदृष्टं स्याद्धर्मः स्वर्गादिसाधनम् ॥ १६१ ॥ गंगास्नानादियागादिव्यापारः स तु कीर्तितः । कर्मनाशाजलस्पर्शादिना नाश्यत्वसौ मतः ॥ १६२ ॥ अधर्मो नरकादीनां हेतुर्निन्दितकर्मजः । प्रायश्चित्तादिनाश्योऽसौ जीववृत्ती त्विमौ गुणौ ॥ १६३ ॥ इमौ तु वासनाजन्यौ ज्ञानादपि विनश्यतः । शब्दो ध्वनिश्च वर्णश्च मृदंगादिभवो ध्वनिः ॥ १६४ ॥ कण्ठसंयोगादिजन्या वर्णास्ते कादयो मताः । सर्वः शब्दो नभोवृत्तिः श्रोत्रोत्पन्नस्तु गृह्यते ॥ १६५ ॥ वीचितरङ्गन्यायेन तदुत्पत्तिस्तु कीर्तिता । कदम्बगोलकन्यायादुत्पत्तिः कस्यचिन्मते ॥ १६६ ॥ उत्पन्नः को विनष्टः क इति बुद्धेरनित्यता । सोऽयं क इति बुद्धिस्तु साजात्यमवलम्बते ॥ १६७ ॥ तदेवौषधमित्यादौ सजातीयेऽपि दर्शनात् । तस्मादनित्या एवेति वर्णाः सर्वे मतं हि नः ॥ १६८ ॥

॥ इति श्रीविश्वनाथपञ्चाननकृता कारिकावली समाप्ता ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

त्रुटिः—

पृष्ठ	पं०	अशुद्धम्	शुद्धम्
८	२५	अलोका....	आलोका
११	१	सादृश्यान्तर्भाव:०....	समवायः ।
१६	१६	वर्त्तमाना या पदार्थ ... विभाजिका०	वर्त्तमानो यः पदार्थविभाजको द्रव्यत्वादिरूपः ।
४१	१	तेजःप्रपञ्चः....	वायुप्रपञ्चः ।
६०	२३	धर्मो चक्षुरादिषु... ...	धर्मश्चक्षुरादिषु ।

अनया रीत्या यत्राशुद्धिः प्रतीयेत तत्र शोधनीया ।

प्रार्थकः—

नृसिंहदेवः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

* श्रीगणेशाय नमः *

कारिकावली।

नूतनजलधररुचये गोपवधूटीदुकूलचौराय।
तस्मै कृष्णाय नमः संसारमहीरुहस्य बीजाय ॥१॥

सिद्धान्तमुक्तावली।

चूडामणीकृतविधुर्वलयीकृतवासुकिः।
भवो भवतु भव्याय लीलाताण्डवपण्डितः॥ १ ॥
निजनिर्मितकारिकावलीमतिसंक्षिप्तचिरन्तनोक्तिभिः।
विशदीकरवाणि कौतुकान्ननु राजीवदयावशंवदः॥ २ ॥

सौभाग्यवती विवृतिः।

शर्वं शिवं शङ्करमादिमीशं गौरीसमावर्जितवामभागम्।
भक्तेष्टदानाय दयार्द्रशार्द्रं सस्पिञ्जरं देवपतिं समीडे ॥१॥
नानाविधग्रन्थविधानमुद्रा-समाधिनिर्धूतमनःप्रयासः।
सोऽहं विलासेन विभावयामि मुक्तावलीव्यावृतिमल्पपाठाम् ॥२॥
इयञ्च सौभाग्यवती बालबोधप्रदायिनी।
विवृतिस्तनुतान्मोदं विदुषामपि मानसे ॥ ३ ॥

(१) कृष्णाय=सच्चिदानन्दपरमात्मने। नमः= प्रह्वीभावोऽस्त्वित्यर्थः। स्वापकर्षबोधानुकूलः स्वकर्तृको व्यापारविशेषो नमःपदार्थ इति। कायिकाद्यन्यतमत्वं वा तत्। गोपेति—गोपानां वधूट्यः स्त्रियः तासां दुकूलानां चौराय अपहर्त्रे। अथवा—जीवाऽविद्यावरणविनाशकाय।

(२) लीलया यत् ताण्डवं नृत्यं तत्र पण्डितः कुशलः। अनेन—नृत्यविशिष्टतया स्मृतिविषयत्वात् प्रार्थिता अर्था भवन्त्येवेति व्यज्यते। 'भव' इति—'संसृतौ च शिवे भवः' इति नानार्थरत्नमाला। अत्राशीरर्थे लोड्विधानात् आशीर्वादात्मकं मङ्गलमिदम्। 'आशीर्वादाद्यन्यतमत्वं मङ्गलत्व' मिति तल्लक्षणात्। निजनिर्मितेति ग्रन्थरचने स्वप्रयोजनं दर्शितम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सद्द्रव्या गुणगुम्फिता सुकृतिनां सत्कर्मणां ज्ञापिका
सत्सामान्यविशेषनित्यमिलिताऽभावप्रकर्षोज्ज्वला ।
विष्णोर्वक्षसि विश्वनाथकृतिना सिद्धान्तमुक्तावली
विन्यस्ता मनसो मुदं वितनुतां सद्युक्तिरेषा चिरम् ॥३॥

विघ्नविघाताय कृतं मङ्गलं शिष्यशिक्षायै निबध्नाति-नूतनेत्यादि । ननु मङ्गलं न विघ्नध्वंसं प्रति न वा समाप्तिं प्रति कारणं विनापि मङ्गलं नास्तिकादीनां ग्रन्थे निर्विघ्नपरिसमाप्तिदर्शनादिति चेन्न । अविगीतशिष्टाचारविषयत्वेन मङ्गलस्य सफलत्वे सिद्धे तत्र च फलजिज्ञासायां संभवति दृष्टफलकत्वे

'सद्द्रव्या' इति श्लोकेन—'द्रव्याद्याः अस्य ग्रन्थस्य प्रतिपाद्यत्वेन विषयः, पदार्थतत्त्वज्ञानं प्रयोजनम्, प्रतिपाद्यप्रतिपादकभावः सम्बन्धः, पदार्थतत्त्वजिज्ञासुरधिकारी' इत्यनुबन्धचतुष्टयं दर्शितम् ।

(१) 'विघ्नविघाताय' इति । प्रारिप्सितप्रतिबन्धकदुरदृष्टं **विघ्नः** । 'विघ्नोऽन्तरायः प्रत्यूहः' इत्यमरः । तस्य विघाताय=नाशाय । 'शिष्यशिक्षायै' इति । यद्यपि कायिकवाचिकमङ्गलेनापि विघ्नविघातः शक्यते कर्त्तुम् तथापि मम वाचिकं मङ्गलं दृष्ट्वा मच्छिष्या अप्येवं करिष्यन्तीति सत्सम्प्रदायरक्षणार्थमेवं कृतमिति भावः ।

(२) व्यतिरेकव्यभिचारमाशङ्कते—'**ननु**' इति । विघ्नध्वंससमाप्त्यन्यतरनिष्ठकार्यतानिरूपिता मङ्गलनिष्ठा कारणता नास्तीति भावः । एवञ्च—'मङ्गलं निष्फलं फलविशेषशून्यत्वात् जलताडनवत्' इति पूर्वपक्षे निष्फलतासाधकमनुमानं फलितम् । **विनापीति**—मङ्गलाचरणं विनैवेत्यर्थः । अस्यायमाशयः—'मङ्गलं विघ्नध्वंसं, समाप्तिं प्रति वा कारणत्वाभाववत् कार्याधिकरणवृत्त्यन्ताभावप्रतियोगित्वात् घटं प्रतिवेमवत्' इति व्यतिरेकव्यभिचारसाधकमनुमानम् ।

अत्रेदं बोध्यम् । कारणसत्त्वे कार्यसत्त्वमन्वयसहचारः । कारणाभावे कार्याभावो व्यतिरेकसहचारः ।

कारणसत्त्वे कार्याभावोऽन्वयव्यभिचारः । कारणाभावे कार्यसत्वं व्यतिरेकव्यभिचारः । कादम्बर्यादावन्वयव्यभिचारः, नास्तिकग्रन्थादौ च व्यतिरेकव्यभिचारो ज्ञेयः ।

(३) **अविगीतेति**—विपरीतं गीतो विगीतः=निन्दितः न विगीतः अविगीतः सचासौ शिष्टानां फलसाधनतांशे भ्रान्तिरहितानामाचारः कृतिः तद्विषयत्वेन अर्थात् तादृशशिष्टकृतिनिष्ठविषयितानिरूपितविषयतावत्त्वेन । सिद्धे=अनुमिते । मङ्गलस्यसफलतासाधकाऽनुमानप्रकारश्चायम्—'मङ्गलं सफलम् अविगीतशिष्टाचारविषयत्वात् दर्शादिवत् ।

(४) 'लभ्यमाने फले दृष्टे नादृष्टपरिकल्पना' इतिवचनादिति भावः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अदृष्टफलकल्पनाया अन्याय्यत्वात् उपस्थितत्वाच्च समाप्तिरेव फलं कल्प्यते। इत्थं च यत्र मङ्गलं न दृश्यते तत्रापि जन्मान्तरीयं तत्कल्प्यते, यत्र च सत्यपि मङ्गले समाप्तिर्न दृश्यते तत्र बलवत्तरो विघ्नो विघ्नप्राचुर्यं वा बोध्यम् प्रचुरस्यास्यैव*बलवत्तरविघ्ननिराकरणकारणत्वम्। †विघ्नध्वंसस्तु मङ्गलस्य द्वारमित्याहुः प्राञ्चः। नव्यास्तु मङ्गलस्य विघ्नध्वंस एव फलं समाप्तिस्तु बुद्धिप्रतिभादिकारणकलापात्। नच स्वतःसिद्धविघ्नविरहवता कृतस्य मङ्गलस्य निष्फलत्वापत्तिरिति वाच्यम्, इष्टापत्तेः। विघ्नशङ्कया तदाचरणात्, तथैव शिष्टाचारात्। नच तस्य

---

(१) कल्प्यते=अनुमीयते। तथाहि—'मङ्गलं समाप्तिफलकं समाप्त्यन्याऽफलकत्वे सति सफलत्वात् यन्नैवं तन्नैवम् यथा दर्शादिः।

(२) यत्र=नास्तिकादिग्रन्थे। जन्मान्तरीयम्=पूर्वजन्मन्यनुष्ठितम्।

तथाचायं प्रयोगः—'अयं नास्तिकग्रन्थः जन्मान्तरीयमङ्गलाश्रयपुरुषवृत्तिकृतिमत्त्वसम्बन्धेन मङ्गलवान् समाप्तिदर्शनात् आस्तिकग्रन्थवत्' इति।

अथवा—'अयं नास्तिको जन्मान्तरीयमङ्गलवान् ग्रन्थपरिसमाप्तेः आस्तिकवत् इति।

* बलवत्तरविघ्नध्वंसनिष्ठकार्यतानिरूपितकारणता अपि बलवत्तरमङ्गलनिष्ठैवेत्यर्थः।

†विघ्नध्वंसस्तु इति। यथा यागस्य स्वर्गम्प्रति मध्येऽपूर्वं द्वारीकृत्यैव कारणत्वं तथा मङ्गलस्य समाप्तिं प्रति विघ्नध्वंसं द्वारीकृत्यैवकारणतेति प्राचामाशयः।

(३) नव्याः=चिन्तामणिकारा गङ्गेशोपाध्यायाः। अस्य 'आहुः' इत्यनेन सम्बन्धः। बुद्धिरिति—

"बुद्धिस्तात्कालिकी ज्ञेया मतिरागामिगोचरा।
प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा मता॥"

अत्रेदं सारभूतं बोध्यम्—

नव्यमते मङ्गलस्य विघ्नध्वंसः फलम्। तत्र प्राचामयमाक्षेपः—यद्येवं तर्हि यस्य स्वत एव विघ्नात्यन्ताभावः, तस्य मङ्गलाचरणे प्रवृत्तिरनुपपन्ना निष्फलत्वात्? अत्रोत्तरम्—स्वतःसिद्धविघ्नात्यन्ताभाववान् पुरुषो मङ्गलं न कुर्यादिति नैव दोष इत्येकं समाधानम्। अथवा—शिष्टसम्प्रदायानुरोधात् विघ्नाशङ्कया मङ्गलं कुर्यात्, यथा पापभ्रमेण प्रायश्चित्ताऽनुष्ठानेऽपि प्रवर्त्तते पुरुषस्तद्वत् इत्यपरं समाधानम्। नचैवं सति—मङ्गलसफलताबोधकवेदस्यैवाप्रामाण्यमिति वाच्यम् मङ्गलेन सतो विघ्नस्य ध्वंसः क्रियते इत्यत्र वेदस्य तात्पर्यात्।

यत्र तु विनायकादिस्तवेन विघ्नध्वंसः तत्र विघ्नवैजात्यं कल्पनीयम् अर्थात्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

निष्फलत्वे तद्बोधकवेदाप्रामाण्यापत्तिरिति वाच्यं, सति विघ्ने तन्नाशस्यैव वेदबोधितत्वात् । अतएव पापभ्रमेण कृतस्य *प्रायश्चितस्य निष्फलत्वेऽपि न तद्बोधकवेदाप्रामाण्यम् । मङ्गलं तु विघ्नध्वंसविशेषे कारणं विघ्नध्वंसविशेषे च विनायकस्तवपाठादि । क्वचिच्च विघ्नात्यन्ताभाव एव समाप्तिसाधनं प्रतिबन्धकसंसर्गाभावस्यैव कार्यजनकत्वात् । इत्थं च नास्तिकादीनां ग्रन्थेषु जन्मान्तरीयमङ्गलजन्यदुरितध्वंसः, स्वतःसिद्धविघ्नात्यन्ताभावो वास्तीति न व्यभिचार इत्याहुः ॥ संसारेति । संसार एव महीरुहो वृक्षस्तस्य बीजाय । एतेन ईश्वरे प्रमाणमपि दर्शितं भवति । तथाहि—यथा घटादिकार्यं कर्तृजन्यं तथा क्षित्यङ्कुरादिकमपि । न च तत्कर्तृत्वमस्मदादीनां संभवतीत्यतस्तत्कर्तृत्वेनेश्वरसिद्धिः । नच[1] शरीराजन्यत्वेन कर्त्रजन्यत्वसाध-

---

मङ्गलाचरणोत्तरं जायमानो विघ्नध्वंसोऽन्यः, विनायकस्तवादिपाठेन जायमानो विघ्नध्वंसोऽन्य इति न कथमपि व्यतिरेकव्यभिचारः । अथ—समाप्तिकामो मङ्गले न प्रवर्त्तिष्यते, अर्थात् मङ्गलेन विघ्नध्वंसो जायेत, तेन च समाप्तिः, विघ्नध्वंसजनितसमाप्तिश्च मङ्गलाचरणे प्रवर्त्तिकेति, एवं सति स्वतः सिद्धविघ्नात्यन्ताभावजनितसमाप्तिस्थले पुनरपि व्यतिरेकव्यभिचारः, विघ्नध्वंसस्य समाप्तिं प्रति साधनत्वाभावादिति चेत् ? अत्र ब्रूमः विघ्नात्यन्ताभावस्थले विघ्नसंसर्गाभाव एव समाप्तिं प्रति कारणमित्येवं सति एतादृशस्थले व्यभिचाराऽभावे न कश्चिद्दोष इति । नास्तिकग्रन्थे च जन्मान्तरीयविघ्नध्वंसः स्वतःसिद्धविघ्नात्यन्ताभावो वास्तीति सर्वं चतुरस्रम् ॥ विस्तरस्तु—मदीयमुक्तावलीप्रभायां द्रष्टव्यः ।

* उक्तञ्चाङ्गिरःस्मृतौ—

प्रायो नाम तपः प्रोक्तं चित्तं निश्चय उच्यते ।
तपो निश्चयसंयुक्तं प्रायश्चित्तमिति स्मृतम् ॥

१ अनीश्वरवादी शङ्कते 'नच' इति । 'क्षित्यङ्कुरादिकं कर्त्रजन्यं शरीराजन्यत्वात् आकाशवत्' इत्येवं विरोध्यनुमानेन पूर्वोक्तमीश्वरसाधकमनुमानं सत्प्रतिपक्षितत्वेन हेत्वाभासरूपमित्यर्थः । साध्याभावसाधकं हेत्वन्तरं यस्य सः सत्प्रतिपक्षः' इति सत्प्रतिपक्षलक्षणम् ।

'अप्रयोजकत्वात्' इति ईश्वरवादिनः समाधानम् । अस्यायमाशयः—हे ! नास्तिक ! यदि तवानुमाने 'शरीराजन्यत्वमस्तु कर्त्रजन्यत्वं माऽस्तु' इत्येवं व्यभिचारशङ्कोत्थाप्येत तदा तद्बाधकोऽनुकूलस्तर्को नास्त्येवेति जगत्कर्तुरभावसाधकं तवानुमानम-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

केन सत्प्रतिपक्ष इति वाच्यम्, अप्रयोजकत्वात्। मम तु कर्तृत्वेन कार्यत्वेन कार्यकारणभाव एव अनुकूलस्तर्कः ॥ "द्यावाभूमी जनयन्देव एकः" "विश्वस्य कर्ता भुवनस्य गोप्ता" इत्यादय आगमा अप्यनुसंधेया ॥ १ ॥

पदार्थान्विभजते—

द्रव्यं गुणास्तथा कर्म सामान्यं सविशेषकम्।
समवायस्तथाऽभावः पदार्थाः सप्त कीर्तिताः ॥२॥

अत्र सप्तमस्याभावत्वकथनादेव षण्णां भावत्वं प्राप्तं तेन भावत्वेन पृथगुपन्यासो न कृतः। एते च पदार्था वैशेषिके प्रसिद्धा नैयायिकानामप्यविरुद्धाः। प्रतिपादितं चैवमेव भाष्ये। अत एवोपमानचिन्तामणौ सप्तपदार्थभिन्नतया शक्तिसादृश्या-

---

प्रमाणम्। 'मम तु' इति। मम सिद्धान्तिनो मते इत्यर्थः। कर्तृत्वेनेति—अर्थात् यदि ममानुमाने 'कर्तृजन्यत्वं माऽस्तु कार्यत्वमस्तु को दोष' इत्याशङ्क्येत तदा पाकार्थं वह्निप्रज्वालनादावपि प्रवृत्तिर्न स्यात्, सर्वं कार्यं कारणं विनैव स्यात् अर्थात् प्रकृते यदि 'कर्तृजन्यत्वं न स्यात्तर्हि कार्यत्वमपि न स्यात्' इत्येव कार्यत्वस्य कारणजन्यत्वाऽव्यभिचारोद्बोधकोऽनुकूलस्तर्क इति ममानुमानं प्रयोजकमेव। उक्तञ्चाचार्यैः—

शङ्काचेदनुमास्त्येव नचेच्छङ्कातातस्तराम्।
व्याघातावधिराशङ्का तर्कः शङ्काऽवधिर्मतः ॥ इति।

एवञ्चोक्तानुमानेनेश्वरसिद्धिः। आहुश्चाभियुक्ताः—

जगतां यदि नोकर्ता कुलालेन विना घटः।
चित्रकारं विना चित्रं स्वत एव भवेत्तदा ॥

प्रश्नाः—मङ्गलस्य किं लक्षणम्? कथञ्च तद्विषये पूर्वोत्तरपक्षप्रकारः? तत्र प्राचामर्वाचाञ्च कीदृशो मतभेदः? इत्यादि सर्वं सारभूतं निजसंस्कृते लिख?

२—'पृथगुपन्यास' इति अर्थात् भावाऽभावभेदेन द्विविधाः पदार्थाः। तत्र भावरूपा षड्विधाः। अभावरूपाः चतुर्विधा इत्येवं न्यायसारप्रभृतिग्रन्थरीत्या पृथगुपन्यासः कुतो न कृत इति यदि पृच्छेत् तदाऽस्योत्तरं 'सप्तमस्याऽभावत्वकथनात्'—इति। परममूले 'सप्त कीर्तिता' इति। अत्र सप्तपदं सप्तैव नाधिका न न्यूना इति बोधनार्थम्। 'भावत्वम्' इति—अत्राऽयमाकारः—द्रव्यादयः षड् भावाः अभावत्वव्यधिकरणधर्मवत्त्वात् यन्नैवं तन्नैवम् यथा अभावः।

पदार्थस्य किं लक्षणमिति चेत्? 'अभिधेयत्वादिकं पदार्थसामान्यलक्षणम्' इति जानीहि।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

दीनामतिरिक्तपदार्थत्वमाशङ्कितम् । ननु[1] कथमेते एव पदार्थाः ? शक्तिसादृश्यादीनामप्यतिरिक्तपदार्थत्वात् । तथाहि—मण्यादिसमवहितेन वह्निना दाहो न जन्यते तच्छून्येन तु जन्यते। तत्र मण्यादिना वह्नौ दाहानुकूला शक्तिर्नाश्यते उत्तेजकेन मण्याद्यपसारणेन च जन्यत इति कल्प्यते[2] । एवं सादृश्यमप्यतिरिक्तः पदार्थः । तद्धि न षट्सु भावेष्वन्तर्भवति सामान्येऽपि सत्त्वात् । यथा[3] गोत्वं नित्यं तथाश्वत्वमपीति सादृश्यप्रतीतेः । नाप्यभावे सत्त्वेन [4]प्रतीयमानत्वादिति चेन्न, मण्याद्यभावविशिष्टवह्न्यादेर्दाहादिकं प्रति स्वातन्त्र्येण मण्यभावादेरेव वा हेतुत्वं कल्प्यते । अनेनैव सामञ्जस्ये अनन्तशक्तितत्प्रागभावध्वंसकल्पनानौचित्यात् । न चोत्तेजके सति प्रतिबन्धकसद्भावेऽपि कथं दाह इति वाच्यम् । उत्तेजका[5]भावविशिष्टमण्यभावस्य हेतु-

---

१—प्राभाकरः शङ्कते 'ननु' इति । अर्थात् कार्यत्वलिङ्गेनेश्वरानुमानवत् शक्तिसादृश्ययोरपि अनुमानेन सिद्धिः शक्यते कर्त्तुम् ।

२—कल्प्यते अनुमीयते इत्यर्थः । अनुमानप्रकारश्चायम्—'वन्हिर्मणिनाश्यदाहानुकूलशक्तिमान् मणिसमवधाने दाहाऽजनकत्वात् यन्नैवं तन्नैवं यथा घटः' इति ।।

प्रश्नाः—पदार्थस्य किं लक्षणम् ? कति च ते ? शक्तिसादृश्यादीनां कथमतिरिक्तपदार्थता ? नैयायिकेन च कुत्र कुत्र तयोरन्तर्भावः कृतः ?

३—'यथा गोत्वम्' हति । गोसत्ता गोत्वम्, अश्वस्य सत्ता अश्वत्वम् । सत्ता च नित्या । 'सा नित्या सा महानात्मा तामाहुस्त्वतलादयः' इति हर्युक्तेः । नापीति—सत्त्वेन=भावरूपेण ।

४—प्रतीयमानत्वात्=प्रमीयमानत्वात् । शक्तिविषये प्रभाकरमतं खण्डयति—'मण्याद्यभावे'ति । अस्यायमर्थः—उत्तेजकाभावविशिष्टो यो मणिः = अर्थात् चन्द्रकान्तो मणिः तदादेर्योऽभावः तद्विशिष्टो यो वन्ह्यादिः तस्येत्यर्थः । इत्थञ्च—'समवायसम्बन्धावच्छिन्नदाहत्वावच्छिन्नदाहनिष्ठा या कार्यता, तन्निरूपिता तादात्म्यसम्बन्धावच्छिन्नोत्तेजकाभावविशिष्टमण्याद्यभावविशिष्टवन्हित्वावच्छिन्ना कारणता' इत्येवं कार्यकारणभावः ।

५—केवलं चन्द्रकान्तमणेरेव दाहादिकं प्रति प्रतिबन्धकत्वं नास्ति किन्तु-उत्तेजकाभावविशिष्टचन्द्रकान्तमणेरित्यर्थः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

त्वात् । सादृश्यमपि[1] न पदार्थान्तरं किंतु तद्भिन्नत्वे सति तद्गत-भूयोधर्मवत्त्वम् । यथा चन्द्रभिन्नत्वे सति चन्द्रगताह्लादकत्वा-दिमत्त्वं मुखे चन्द्रसादृश्यमिति ।२॥

द्रव्याणि* विभजते—

क्षित्यप्तेजोमरुद्व्योमकालदिग्देहिनो मनः ।

२—द्रव्याणि—

क्षितिः पृथिवी, आपो जलानि, तेजो वह्निः, मरुद् वायुः, व्योम आकाशः, कालः समयः, दिगाशा, देही आत्मा, मनः, एतानि नव द्रव्याणीत्यर्थः । ननु द्रव्यत्वजातौ किं मानम् । न हि तत्र प्रत्यक्षं प्रमाणं, घृतजतुप्रभृतिषु द्रव्यत्वाग्रहादिति चेन्न । कार्यसमवायिकारणतावच्छेदकतया संयोगस्य विभागस्य

१—' सादृश्यमपि ' इति । नातिरिक्तः पदार्थ इत्यर्थः । तल्लक्षणमाह—' तद्भिन्नत्वे ' इति । तत्र असाधारण्येन विद्यमाना ये भूयांसो धर्माः तद्वत्त्वम् । ' अनुयोगितासम्बन्धेन तद्गतभूयोधर्मवत्त्वम् ' इत्येव सुवचं लक्षणम् । ' तच्च स्वरूपसम्बन्धविशेष ' इति न्यायकोशः । प्रपञ्चस्तु—श्लोकवार्तिकादिषु द्रष्टव्यः ।

२—' गुणानामाश्रयो द्रव्यं कारणं समवायि च ' इति तार्किकरक्षायां द्रव्यलक्षणमुक्तम् । तत्र ' गुणवत्त्वं द्रव्यत्वजातिमत्त्वं वा ' द्रव्यसामान्यलक्षणं बोध्यम् ।

* व्यापकधर्मोऽवान्तरव्याप्यधर्मपुरस्कारेण धर्मिप्रतिपत्त्यनुकूलो विपूर्वकभजधातोरर्थः ॥

प्रश्नाः—द्रव्यस्य किं लक्षणम् ? तस्य के २ भेदाः ? द्रव्यत्वजातिसाधनप्रकारश्च कीदृशः ? ।

समवायेन कार्यत्वावच्छिन्नं प्रति या तादात्म्येन कारणता सा अवश्यमेव किंचिद्धर्मावच्छिन्नास्ति, स धर्म एव द्रव्यत्वरूपा जातिरिति । अत्रानुमानप्रयोगः—समवायसंबन्धावच्छिन्न—कार्यत्वावच्छिन्न—कार्यतानिरूपिततादात्म्यसंबन्धावच्छिन्ना या कारणता सा किंचिद्धर्मावच्छिन्ना कारणतात्वात् घटगतकार्यतानिरूपितदण्डगतकारणतावत् । अत्र कार्यत्वकुक्षौ यावत्कार्यप्रवेशेन गौरवात्, कार्यत्वस्य ध्वंसेपि सत्त्वात्तत्र च समवायसंबन्धावच्छिन्नकार्यताया अभावादतिप्रसक्तत्वेनावच्छेदकत्वासंभवाच्चाह—**संयोगस्येति** । अनुमानप्रयोगस्तु—समवायसंबन्धावच्छिन्नसंयोगत्वावच्छिन्नकार्यतानिरूपिता तादात्म्यसंबन्धावच्छिन्ना या कारणता सा इत्यादि प्राग्वत् । येषां मते विभुद्वयस्य संयोगस्तेषां संयोगत्वावच्छिन्ना कार्यता अप्रसिद्धा विभूनामिव तत्संयोगस्यापि नित्यत्वादत आह—**विभागस्य**

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वा समवायिकारणतावच्छेदकतया तत्सिद्धेरिति । [1]ननु दशमं द्रव्यं तमः कुतो नोक्तं तद्धि प्रत्यक्षेण गृह्यते, तस्य च रूपवत्त्वात् कर्मवत्त्वाच्च द्रव्यत्वं, तच्च गन्धशून्यत्वान्न पृथिवी, नीलरूपवत्त्वाच्च न जलादिकं, तत्प्रत्यक्षे चालोकनिरपेक्षं चक्षुः कारणमिति चेन्न, आवश्यकतेजोऽभावेनैवोपपत्तौ द्रव्यान्तरकल्पनाया अन्याय्यत्वात् । रूपवत्त्वप्रतीतिरप्यालोकापसरणौपाधिकी भ्रान्तिरेव । तमसोऽतिरिक्तत्वेऽनन्तावयवादिकल्पनागौरवं च स्यात् । स्वर्णस्य यथा तेजस्यन्तर्भावस्तथा वक्ष्यते ।

गुणान्विभजते—

अथ गुणा रूपं रसो गन्धस्ततः परम् ॥३॥
स्पर्शः संख्या परिमितिः पृथक्त्वं च ततः परम् ।
संयोगश्च विभागश्च परत्वं चापरत्वकम् ॥ ४ ॥
बुद्धिः सुखं दुःखमिच्छा द्वेषो यत्नो गुरुत्वकम् ।
द्रवत्वं स्नेहसंस्कारावदृष्टं शब्द एव च ॥ ५ ॥

एते [2]गुणाश्चतुर्विंशतिसंख्याकाः कणादेन कण्ठतः चशब्देन च दर्शिताः । तत्र गुणत्वादिकजातिसिद्धिरग्रे वक्ष्यते ॥

वेति । समवायसंबन्धावच्छिन्नविभागत्वावच्छिन्नकार्यतानिरूपिता तादात्म्यसंबन्धावच्छिन्ना या कारणतेत्यादिप्राग्वदेवानुमानप्रयोगः । कारणतायाः कार्यतायाः प्रतिबन्धकतायाः प्रतिबध्यतायाः पदशक्यतायाश्च अवच्छेदकत्वेन यो धर्मः सिद्ध्यति स जातिरेवेति नैयायिकसिद्धान्तात् द्रव्यत्वं जातिरिति भावः ।

१—अत्र तमोवादिनामयं पूर्वपक्षसङ्ग्रहः—

तमः खलु चलं नीलं परापरविभागवत् ।
प्रसिद्धद्रव्यवैधर्म्यान्नवभ्यो भेत्तुमर्हति ॥ इति

उत्तरपक्षसङ्ग्रहस्तु—मम

आलोकाभाव एवेदं तमो द्रव्यं नतु स्वयम् ।
नील-क्रियाप्रतीतिस्तु भ्रान्तिरेवेति मन्यताम् ॥ इति ॥

२—'द्रव्यकर्मभिन्नत्वे सति सामान्यवत्त्वं' गुणलक्षणम् । गुणपदशक्यतावच्छेदकतयापि गुणत्वजातिसिद्धिर्बोध्या । एतच्चाग्रे स्पष्टीभविष्यति ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कर्माणि विभजते—

उत्क्षेपणं ततोऽपक्षेपणमाकुञ्चनं तथा ।
प्रसारणं च गमनं कर्माण्येतानि पञ्च च ॥६॥

कर्मत्वजातिस्तु प्रत्यक्षसिद्धा । एवमुत्क्षेपणत्वादिकमपि ॥६॥

नन्वत्र भ्रमणादिकमपि पञ्चकर्माधिकतया कुतो नोक्तमत आह—

भ्रमणं रेचनं स्यन्दनोर्ध्वज्वलनमेव च ।
तिर्यग्गमनमप्यत्र गमनादेव लभ्यते ॥ ७ ॥

सामान्यं निरूपयति—

सामान्यं द्विविधं प्रोक्तं परं चापरमेव च ।
द्रव्यादित्रिकवृत्तिस्तु सत्ता परतयोच्यते ॥ ८ ॥

तल्लक्षणं तु नित्यत्वे सति अनेकसमवेतत्वम् । अनेकसमवेतत्वं संयोगादीनामप्यस्त्यत उक्तं नित्यत्वे सतीति । नित्यत्वे सति समवेतत्वं गगनपरिमाणादीनामप्यस्त्यत उक्तमनेकेति । नित्यत्वे सति अनेकवृत्तित्वमत्यन्ताभावेऽप्यस्त्यतो वृत्तित्व-

---

प्रश्नाः—तमः स्वतन्त्रं द्रव्यमस्ति नवा ? अस्ति चेत् कथम् ? नास्ति चेत्तत्र का युक्तिः ? न्यायमते तमसः कुत्रान्तर्भावः ? कथञ्च ?। गुणकर्मणोः किं लक्षणम् ? कथं गुणत्वजातिसिद्धिः ? कर्मत्वजातौ च किं मानम् ? ।

१—' समुच्चितयोः संयोगविभागयोरसमवायिकारणं कर्म ' इति कर्मलक्षणम् । उक्तञ्च—' कर्मचासमवायि स्यात्संयोगविभागयोः ' इति (ता० र०)

' कर्मत्वजाति ' रिति । प्रत्यक्षसिद्धा = ' चलति चलति ' इत्याकारानुगतप्रतीतिसाक्षिकेत्यर्थः । ' एवम् ' इति । कर्मत्ववदित्यर्थः ।

(२) अनेकसमवेतत्वम्=नानाव्यक्तिषु समवायसम्बन्धेन वृत्तिमत्त्वमित्यर्थः ।

(३) अत्यन्ताभावश्च स्वाधिकरणेषु स्वरूपसम्बन्धेन वर्त्तते न समवायेनेत्यतो न दोष इत्याशयः ।

प्रश्नाः—सामान्यस्य किं लक्षणम् ? तल्लक्षणस्य पदकृत्यप्रकारः कीदृशः ?—

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सामान्यं विहाय समवेतत्वमित्युक्तम् । एकमात्रव्यक्तिवृत्तिस्तु न जातिः तथा चोक्तम्—

" व्यक्तेरभेदस्तुल्यत्वं संकरोऽथानवस्थितिः ।
रूपहानिरसम्बन्धो जातिबाधकसंग्रहः " ॥ १ ॥

द्रव्यादीति । परत्वमधिकदेशवृत्तित्वम्, अपरत्वमल्पदेशवृत्तित्वम्, सकलजात्यपेक्षयाऽधिकदेशवृत्तित्वात् सत्तायाः परत्वं, तदपेक्षया चान्यासां जातीनामपरत्वम् ॥ ८ ॥

परभिन्ना च या जातिः सैवापरतयोच्यते ।
द्रव्यत्वादिकजातिस्तु परापरतयोच्यते ॥ ९ ॥
व्यापकत्वात्परापि स्याद्व्याप्यत्वादपरापि च ।

पृथिवीत्वाद्यपेक्षया व्यापकत्वादधिकदेशवृत्तित्वात् द्रव्यत्वादेः परत्वं, सत्तापेक्षया व्याप्यत्वाद् अल्पदेशवृत्तित्वाच्च द्रव्यत्वस्याऽपरत्वं, तथा च धर्मद्वयसमावेशादुभयमविरुद्धम् ।

विशेषं निरूपयति—

अन्त्यो नित्यद्रव्यवृत्तिर्विशेषः परिकीर्तितः ॥ १० ॥

अन्ते अवसाने वर्तत इत्यन्त्यः, यदपेक्षया विशेषो नास्ती-

कानि जातिबाधकानि ? तेषां लक्षणमुदाहरणञ्च स्पष्टीकुरु ?
परत्वाऽपरत्वधर्मयोरेकत्र जातौ कथं न विरोधः ?

(१) तत्रैकव्यक्तिकत्वादाकाशत्वं न जातिः । तुल्यव्यक्तिकत्वाद्घटत्वं कलशत्वं न जातिद्वयम् । संकीर्णत्वाद् भूतत्वं मूर्तत्वं च न जातिः । अनवस्थाभयात्सामान्यत्वं न जातिः विशेषस्य व्यावृत्तस्वभावस्य रूपहानिः स्यादतो विशेषत्वं न जातिः । समवायसम्बन्धाभावात् समवायत्वमभावत्वं च न जातिः ।

परस्परात्यन्ताभावसमानाधिकरणधर्मयोरेकत्र समावेशः संकरः । यथा—भूतत्वाभाववति मनसि मूर्तत्वं वर्तते मूर्तत्वाभाववति चाकाशे भूतत्वं वर्ततेऽनयोरेकत्र पृथिव्यादिचतुष्टये समावेशः । तस्मादेतद्द्वयं जातिरूपं नास्ति ।

(२) बौद्धास्तु—" अयं घटः अयं घटः " इत्यनुगतप्रतीतिर्न घटत्वरूपां जातिं विषयीकरोति किन्तु अतद्व्यावृत्तिम्, साच घटाभिन्नानां पटादीनां घटनिष्ठो भेदः, सचाभावरूपस्तुच्छो नातिरिक्तः किन्त्वपोहपदवाच्य " इत्याहुः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

त्यर्थः। घटादीनां द्व्यणुकपर्यन्तानां तत्तदवयवभेदात्परस्परं भेदः, परमाणूनां परस्परभेदको विशेष एव। स तु स्वत एव व्यावृत्तः, तेन तत्र विशेषान्तरापेक्षा नास्तीति भावः॥६–१०॥

समवायं दर्शयति—

घटादीनां कपालादौ द्रव्येषु गुणकर्मणोः।
तेषु जातेश्च सम्बन्धः समवायः प्रकीर्तितः॥११॥

अवयवावयविनोर्जातिव्यक्त्योर्गुणगुणिनोः क्रियाक्रियावतोर्नित्यद्रव्यविशेषयोश्च यः सम्बन्धः स समवायः। समवायत्वं नित्यसम्बन्धत्वम्। तत्र[३] प्रमाणं तु गुणक्रियादिविशिष्टबुद्धि-

---

(१) अयं परमाणुः एतत्परमाणोर्भिन्नः एतद्विशेषात्। एवं विशेषपदार्थः द्रव्यादिपदार्थात् विशेषान्तराच्च स्वस्यापि स्वत एव व्यावर्त्तकः। अत्रैवमनुमानम्—"विशेषो द्रव्यादिभिन्नः विशेषात्" "एतद्विशेषः तद्विशेषाद् भिद्यते एतद्विशेषात्" इति। अयं नित्योऽतीन्द्रियश्च। विशेषपदार्थसिद्धिरनुमानन्तु—"परमाणुभेदः किञ्चिल्लिङ्गज्ञाप्यः भेदत्वात् कपालभेदज्ञाप्यघटभेदवत्" इति ज्ञेयम्।

प्रश्नाः—विशेषपदार्थस्वीकारे का युक्तिः? किञ्च तत्र प्रमाणम्? तस्य लक्षणमपि दर्शय? समवायस्य किं लक्षणम्? तत्सिद्धौ किं मानम्? मीमांसकाभिमतस्वरूपसम्बन्धखण्डने का युक्तिः? अभावस्य वैशिष्ट्यं सम्बन्धान्तरमस्ति न वा? कीदृशोऽत्र नैयायिकानां सिद्धान्तः? प्राचां मते समवायविषये कीदृशं मतम्?

(२) नन्वेवमत्यन्ताभावेऽतिव्याप्तिः स्यात् अत्यन्ताभावः स्वरूपसम्बन्धेन भूतलादौ तिष्ठति, नित्यश्च स्वरूपसम्बन्धश्चात्यन्ताभावरूप एव? उच्यते—अत्र (समवायसम्बन्धलक्षणे) मुख्यसम्बन्धस्यैव ग्रहणान्नोक्त दोषः, अर्थात् "सम्बन्धिभिन्नत्वे सति सम्बन्ध्याश्रितः सम्बन्धः" इति सम्बन्धलक्षणम्। तादृशसम्बन्धस्तु संयोगः समवायो वा। अन्ये तु कालिक–दैशिक–विशेषणता–विशेष्यता–प्रतियोगिता–ऽनुयोगिताऽऽधारता–ऽऽधेयता–विषयता–विषयितादयः स्वरूपसम्बन्धाः सम्बन्धिभ्यो भिन्ना न भवन्ति। ते केचित् प्रतियोगिरूपाः, केचिदनुयोगिरूपाः, तेषु सम्बन्धशब्दो गौणः। यस्य सम्बन्धः स सम्बन्धस्य प्रतियोगी। यस्मिन् सम्बन्धः स सम्बन्धस्याऽनुयोगी। एवञ्च–घटात्यन्ताभावः विशेषणताख्यस्वरूपसम्बन्धेन भूतले तिष्ठतीति तस्य सम्बन्धस्य भूतलमनुयोगी, अत्यन्ताभावः प्रतियोगी, तस्य उक्तः सम्बन्धोऽप्यत्यन्ताभावरूप एवेति नात्यन्ताभावेऽतिव्याप्तिरित्याशयः।

(३) अत्रेदं बोध्यम्—अयं समवायः विशेषणताख्यस्वरूपसम्बन्धेन द्रव्यादिपञ्चसु वर्त्तते। सचैको नित्यः तथापि वायौ रूपाभावात् न रूपवत्ताबुद्धिः। "इह

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विशेषणविशेष्यसम्बन्धविषया, विशिष्टबुद्धित्वात्, दण्डी पुरुष इति विशिष्टबुद्धिवत् इत्यनुमानम्। एतेन संयोगादिबाधात्स-मवायसिद्धिः। न च स्वरूपसम्बन्धेन सिद्धसाधनम्, अर्थान्तरं वा अनन्तस्वरूपाणां सम्बन्धत्वकल्पने गौरवाल्लाघवादेकसमवा-यसिद्धिः। नच समवायस्यैकत्वे वायौ रूपवत्ताबुद्धिप्रसङ्गः, तत्र रूपसमवायसत्त्वेऽपि रूपाभावात्। नचैवमभावस्य वैशि-ष्ट्यं सम्बन्धान्तरं सिध्येदिति वाच्यम्, तस्य नित्यत्वे भूतले घटानयनानन्तरमपि घटाभावबुद्धिप्रसङ्गात् घटाभावस्य तत्र सत्त्वात्। तस्य नित्यत्वात्, अन्यथा देशान्तरेऽपि तत्प्रतीतिर्न स्यात्। वैशिष्ट्यस्य च तत्र सत्त्वात्।

कपाले घटसमवायः" इति प्रतीतेश्च समवाये प्रत्यक्षमेव प्रमाणम् इति **प्राचां** मतम्। **नव्यानां** मते तु समवायो न प्रत्यक्षः किन्त्वनुमेय इति तदनुमानं दर्शयि-तुमाह—"तत्र प्रमाणम्" इति।

(१) संयोगस्तु द्वयोर्द्रव्यपदार्थयोरेव भवति न तु द्रव्यगुणयोरतः संयोगा-दीनां बाधः।

(२) अयुतसिद्धपदार्थानां स्वरूपसम्बन्धोऽस्तीतिवादिनां मीमांसकानां मतेऽने-नानुमानेन सिद्धसाधनं जातम्। समवायसाधनार्थं प्रवृत्तानां नैयायिकानामर्थान्तरं जातम्। सम्बन्धान्तरेण विशिष्टप्रतीतिजननायोग्यत्वं **स्वरूपसम्बन्धत्वम्।**

(३) अन्यथा—यदि घटाभावस्यानित्यत्वं मन्येत तदा घटशून्यदेशेऽपि घटा-भावस्य प्रतीतिर्न स्यात्—कस्मात् घटाभावस्यैकत्वात् तस्य चाऽनित्यत्वात्।

(४) **वैशिष्ट्यस्येति**—अयमाशयः। विशिष्टज्ञाने प्रकारविशेष्यसंसर्गा अवश्यं भान्ति। तत्र भासमानवैशिष्ट्यप्रतियोगित्वं **प्रकारत्वम्**। भासमानवैशिष्ट्यानु-योगित्वं **विशेष्यत्वम्**। प्रकारत्वविशेष्यत्वे विषयताविशेषौ, तयोश्च वैशिष्ट्यं सम्बन्धः। तच्चेदमभावस्य वैशिष्ट्यं सम्बन्धान्तरं समवायवत् स्वीकरोषि चेत्? तदा तन्नित्यमनित्यं वेति त्वया वाच्यम्। नित्यपक्षे आनीतेऽपि घटे घटाभावप्रमा जायेत? भूतलघटाभावतत्सम्बन्धानां सत्त्वात्। अनित्यपक्षे क्लृप्तस्वरूपसम्बन्धम् अर्थात् अभावीय-विशेषणतासम्बन्धं विहाय अनन्ताऽनित्यवैशिष्ट्याख्यसम्बन्धान्तरस्वीकारे तवैव महद्गौरवम्, स्वरूपविशेषसम्बन्धस्वीकारे तु घटाभावदशायामिव घटानयनदशायां घटाभाववद्भूतल-ज्ञानकालीनतत्तद्भूतलादेः स्वरूपविशेषसम्बन्धस्याऽभावात् न घटाभावप्रतीतिर्भवितुमर्हतीति नास्मत्पक्षे दोषगन्धोऽपि।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मम[1] तु घटे पाकरक्ततादशायां श्यामरूपस्य नष्टत्वान्न तद्वत्ताबुद्धिः। वैशिष्ट्यस्यानित्यत्वे त्वनन्तवैशिष्ट्यकल्पने तवैव गौरवम्। इत्थं च तत्तत्कालीनतत्तद्भूतलादिकं तत्तदभावानां सम्बन्धः ॥ ११ ॥

अभावं विभजते—

अभावस्तु द्विधा संसर्गान्योन्याभावभेदतः।

प्रागभावस्तथा ध्वंसोऽप्यत्यन्ताभाव एव च ॥ १२ ॥

एवं त्रैविध्यमापन्नः संसर्गाभाव इष्यते।

अभावत्वं द्रव्यादिषट्कान्योऽन्याभाववत्त्वम्[2]। संसर्गाभावान्योन्याभावभेदादित्यर्थः। अन्योन्याभावस्यैकविधत्वाच्चद्वि-

---

(१) ममत्विति—पाकेन=विलक्षणतेजःसंयोगेन रक्ते रूपे उत्पन्ने श्यामरूपस्य ध्वंसात् सम्बन्धिनोऽभावादेव सत्यपि नित्ये एके समवाये श्यामरूपस्य न चाक्षुषं प्रत्यक्षमिति तादृशसमवायसम्बन्धाङ्गीकारे न काचिदप्यापत्तिरिति भावः।

(२) द्रव्याद्या ये षड् भावपदार्थाः तन्निष्ठा या प्रतियोगिता, तन्निरूपिता या अनुयोगिता तद्वत्त्वमित्यर्थः। अभावत्वमखण्डोपाधिरिति केचित्? "निषेधमुखप्रतीतिविषयोऽभावः" इति प्राञ्चः।

इदन्तु बोध्यम्—अत्यन्ताभावान्योन्याभावौ विशेषाभावसामान्याभावभेदात् प्रत्येकं द्विविधौ। तत्र भूतले सत्यपि पीतघटे "नीलघटो नास्ति" इति प्रतीतिविषयो **विशेषात्यन्ताभावः**। "पीतघटो नीलघटो न" इति प्रतीतिविषयो **विशेषाऽन्योन्याभावः**। घटशून्यदेशे च "भूतले घटो नास्ति" इति प्रत्ययवेद्यः **सामान्यात्यन्ताभावः**। "भूतलं घटो न" इति प्रतीतिगोचरः **सामान्यान्योन्याभावः**। सामान्याभावविशेषाभावौ च मिथो भिन्नावेव, अन्यथा पीतघटवति भूतले घटो नास्तीति घटसामान्याभावप्रतीत्यापत्तिः स्यात्।

सामान्याभावश्च—स्वान्यूनानतिरिक्तवृत्तित्व—स्वनिष्ठावच्छेदकतानिरूपितत्वोभयसम्बन्धेन सामान्यधर्मविशिष्टप्रतियोगिताकाभावः। उक्तोभयसम्बन्धेन विशेषधर्मविशिष्टप्रतियोगिताकाभावो **विशेषाभावः** इत्यादिविशेषविवरणं न्यायप्रदीप—न्यायकोश—लक्षणावली—प्रभृतिषु द्रष्टव्यम्।

प्रश्नाः—अभावस्य किं लक्षणम्? कति भेदाः? तत्र नवीनप्राचीनमते च कीदृशे?

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भागाभावात्संसर्गाभावं विभजते । प्रागभाव इति । संसर्गाभावत्वम् अन्योन्याभावभिन्नाभावत्वम् । अन्योन्याभावत्वं तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वम् । विनाश्यभावत्वं प्रागभावत्वम् । जन्याभावत्वं ध्वंसत्वम् । नित्यसंसर्गाभावत्वम्-अत्यन्ताभावत्वम् । यत्र तु भूतलादौ घटादिकमपसारितं पुनरानीतं च तत्र घटकालस्य सम्बन्धाघटकतया अत्यन्ताभावस्य नित्यत्वेऽपि घटकाले न घटात्यन्ताभावबुद्धिः । तत्र उत्पादविनाशशाली चतुर्थोऽयमभाव इति केचित् । अत्र ध्वंसप्रागभावयोरधिकरणे नात्यन्ताभाव इति प्राचीनमतम्, श्यामघटे रक्तो नास्तीति रक्तघटे श्यामो नास्तीति धीश्च प्रागभावं ध्वंसं चावगाहते नतु तदत्यन्ताभावम् । नव्यास्तु तत्र विरोधे मानाभावात् ध्वंसादिकालावच्छेदेनाप्यत्यन्ताभावो वर्तते इति प्राहुः । [1]नन्वस्तु अभावानामधिकरणात्मकत्वं लाघवादिति चेन्न, अनन्ताधिकरणात्मकत्वकल्पनापेक्षयाऽतिरिक्तकल्पनाया एव लघीयस्त्वात् । [2]एवं च आधाराधेयभावोऽप्युपपद्यते । [3]एवं च तत्तच्छब्दगन्धरसाद्यभावानां प्रत्यक्षत्वमुपपद्यते । अन्यथा तत्तदधिकरणानां तत्तदिन्द्रियाणामग्राह्यत्वादप्रत्यक्षत्वं स्यात् । एतेन [4]ज्ञानविशेषकालविशेषाद्यात्मकत्वमत्यन्ताभावस्येति प्रत्युक्तमप्रत्यक्षत्वापत्तेः ।

१—प्राभाकरः शङ्कते—'ननु' इति ।

२—एवं चेति । अभावस्यातिरिक्तत्वस्वीकारे भूतलमाधारः, घटाभावश्च आधेयः, भूतलमेव घटाभावस्वरूपञ्चेदुक्तसम्बन्धो न स्यात् अभेदे सम्बन्धाभावात् ।

३—परमतेऽनुपपत्तिं स्वमते चोपपत्तिं दर्शयति 'एवम्' इति । 'येनेन्द्रियेण यद् गृह्यते तेनेन्द्रियेण तन्निष्ठा जातिस्तद्गुणाः, तदभावाश्च गृह्यन्ते' इति नियमादिति भावः ।

४—ज्ञानस्यात्मधर्मत्वेन बाह्येन्द्रियेण ग्राह्येन तस्य प्रत्यक्षं नार्हति भवितुमित्याशयः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

इदानीं पदार्थानां साधर्म्यं वैधर्म्यं च वक्तुं प्रक्रमते—

सप्तानामपि साधर्म्यं ज्ञेयत्वादिकमुच्यते ॥ १३ ॥

समानो धर्मो येषां ते सधर्माणः तेषां भावः साधर्म्यं समानो धर्म इति फलितार्थः । एवं विरुद्धो धर्मो येषां ते विधर्माणः तेषां भावो वैधर्म्यं, विरुद्धो धर्म इति फलितार्थः । ज्ञेयत्वं ज्ञानविषयता सा च सर्वत्रैवास्ति ईश्वरादिज्ञानविषयतायाः केवलान्वयित्वात्[1] । एवमभिधेयत्वप्रमेयत्वादिकं बोध्यम् ॥ १२ ॥ १३ ॥

द्रव्यादयः पञ्च भावा अनेके समवायिनः ।
सत्तावन्तस्त्रयस्त्वाद्या गुणादिर्निर्गुणक्रियः ॥१४॥

द्रव्यगुणकर्मसामान्यविशेषाणां साधर्म्यमनेकत्वं समवायित्वं च; यद्यप्यनेकत्वमभावेऽप्यस्ति तथाप्यनेकत्वे सति भावत्वं पञ्चानां साधर्म्यम् । तथा[2] चानेकभाववृत्तिपदार्थविभाजकोपाधिमत्त्वमिति फलितोऽर्थः । तेन प्रत्येकं घटादावाकाशादौ च नाव्याप्तिः । समवायित्वं च समवायसंबन्धेन संब-

---

१—स्वात्यन्ताभावाऽप्रतियोगित्वं केवलान्वयित्वम् । विषयता च—विषयनिष्ठो ज्ञानादिनिरूपितो धर्मविशेषः । नास्त्येवंविधः कोपि जगति पदार्थो य ईश्वरीयज्ञानविषयो न भवेत्, अत ईश्वरीयज्ञानविषयता केवलान्वयिनी ।

अभिधेयत्वम्=अभिधावृत्तिविषयत्वम् । अभिधा च सङ्केतः शक्तिरिति यावत् । शक्तिश्च—'इदं पदममुमर्थं बोधयतु' इत्याकारिका 'अस्मात्पदादयमर्थो बोद्धव्यः' इत्याकारिका वा ईश्वरेच्छारूपा । एतच्च अग्रे शब्दखण्डे स्फुटीभविष्यति ।

२—तथा चेति । अनेकभावपदार्थेषु वर्तमाना या पदार्थविभाजिका द्रव्यत्वगुणत्वादिरूपा—उपाधिस्तादृशोपाधिमत्त्वमित्यर्थः । उपाधिर्नाम धर्मः ।

प्रश्नाः—सप्तानां पदार्थानां साधर्म्यं ब्रूहि ? केवलान्वयित्वञ्च किम् ? । द्रव्यादित्रयस्य किं साधर्म्यम् ? 'द्रव्यगुणकर्मसामान्यविशेषाणाम्' इति ग्रन्थं स्वसंस्कृतेन व्याख्याहि ?। अथवा—'अनेकत्वे सति भावत्वम्' इत्यत्र साधर्म्ये दोषपरिहारौ मूलानुसारं स्पष्टीकुरु ?

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

न्धित्वं न तु समवायवत्त्वं सामान्यादावभावात् । तथा च समवेतवृत्तिपदार्थविभाजकोपाधिमत्त्वमिति फलितोऽर्थः । तेन नित्यद्रव्येषु नाव्याप्तिः । सत्तावन्त इति । द्रव्यगुणकर्मणां सत्तावत्त्वमित्यर्थः । आदिरिति । यद्यपि गुणक्रियाशून्यत्वमाद्यक्षणे घटादावतिव्याप्तं क्रियाशून्यत्वं च गगनादावतिव्याप्तं तथापि गुणवदवृत्तिधर्मवत्त्वं कर्मवदवृत्तिपदार्थविभाजकोपाधिमत्त्वं तदर्थः । नहि घटत्वादिकं द्रव्यत्वं वा गुणवदवृत्ति कर्मवदवृत्ति वा किन्तु गुणत्वादिकम् । तथा आकाशत्वादिकं तु न पदार्थविभाजकोपाधिः ॥ १४ ॥

सामान्यपरिहीनास्तु सर्वे जात्यादयो मताः ।
पारिमाण्डल्यभिन्नानां कारणत्वमुदाहृतम् ॥१५॥

सामान्यानधिकरणत्वं सामान्यादीनामित्यर्थः । पारिमाण्डल्येति । पारिमाण्डल्यमणुपरिमाणं कारणत्वं तद्भिन्नानामित्यर्थः । अणुपरिमाणं तु न कस्यापि कारणम् । तद्धि स्वाश्रयार-

---

१—समवेतपदार्थे वर्तमाना या पदार्थविभाजिका द्रव्यत्वगुणत्वादिरूपा उपाधिस्तादृशोपाधिमत्त्वम् । एवं च तादृशोपाधिमत्त्वस्य परमाणुषु सत्त्वान्नाव्याप्तिः ।

२—गुणवद् यद् द्रव्यं तत्राऽवर्तमानं यद् गुणत्वादिकं धर्मस्तादृशधर्मवत्त्वम् । क्रियावद् यद् द्रव्यं तत्रावर्तमानो यः पदार्थविभाजकगुणत्वादिरुपाधिस्तादृशोपाधिमत्त्वमित्यर्थः।

३—अणोः परिमाणं पारिमाण्डल्यम् । पृषोदरादित्वात्साधुः । 'कारणत्वञ्चाऽन्यत्र पारिमाण्डल्यादिभ्यः' इति प्रशस्तपाद उक्तम् ।

४—अस्यायमाशयः—यदि परमाणुपरिमाणं द्व्यणुकपरिमाणं वा त्रसरेण्वादिनिष्ठपरिमाणारम्भकं भवेत् तदा तेषां प्रत्यक्षमेव न जायेत, यतः परिमाणं स्वसमानजातीयं स्वोत्कृष्टं च परिमाणं जनयतीति नियमः, यथा महता कपालद्वयवर्तिना परिमाणेन स्वसजातीयं स्वोत्कृष्टञ्च परिमाणं जन्यते, तत्र यथा महताऽऽरब्धे महत्तरादावुत्कर्षः तरपा प्रत्ययेन बोध्यते तथाऽणुपरिमाणेनापि जनिते त्रसरेण्वादिपरिमाणे उत्कर्षस्तरपा चेद्बोध्येत तदाऽणुतरत्वेनातिसूक्ष्मतया त्रसरेणोः चाक्षुषं प्रत्यक्षमेव न स्यात्, भवति च त्रसरेणोः प्रत्यक्षम्, तस्मात् अणुपरिमाणं न कस्यापि कारणम् । अणुपरिमाणपदं द्व्यणुकादिपरिमाणादीनामप्युपलक्षकम् । तद्भिन्नानाञ्च कारणत्वं साधर्म्यम् । अधिकन्त्वस्मन्मुक्तावलीप्रभायां द्रष्टव्यम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ध्धद्रव्यपरिमाणारम्भकं भवेत् तच्च न संभवति, परिमाणस्य स्वसमानजातीयोत्कृष्टपरिमाणजनकत्वनियमान्महदारब्धस्य महत्तरत्ववदणुजन्यस्याणुतरत्वप्रसङ्गात्। एवं परममहत्परिमाणमतीन्द्रियसामान्यं विशेषाश्च बोध्याः। इदमपि योगिप्रत्यक्षे विषयस्य न कारणत्वम्, ज्ञायमानसामान्यं न प्रत्यासत्तिः, ज्ञायमानं लिङ्गं नानुमितिकरणमित्यभिप्रायेणोक्तम्। मानसप्रत्यक्षे आत्ममहत्त्वस्य कारणत्वान्महत्परिमाणं कालादेर्बोध्यम्। तस्यापि न कारणत्वमित्याचार्याणामाशय इत्यन्ये। तन्न। ज्ञानातिरिक्तं प्रत्येवाकारणताया आचार्यैरुक्तत्वात्॥ १५॥

१—योगिप्रत्यक्षे विषयाणां नैव कारणत्वम्, तेषां तादृशप्रत्यक्षे विषयाणां कारणत्वाङ्गीकारे अतीताऽनागतप्रत्यक्षं न स्यात्, कारणभूतानां विषयाणां तदानीमभावात् तथाच—यथा योगिनां विद्यमानविषयप्रत्यक्षं योगजप्रत्यासत्तिबलेन भवति तथाऽतीतानागतविषयप्रत्यक्षमपीति पारिमाण्डल्यस्य अतीन्द्रियसामान्यविशेषाणां परममहत्त्वस्य च योगिप्रत्यक्षम्प्रति न कारणत्वम्।

ज्ञायमानं सामान्यं न प्रत्यासत्तिः, अपितु सामान्यज्ञानमेव। अस्यायमाशयः—सामान्यलक्षणा प्रत्यासत्तिर्द्विविधा। बहिरिन्द्रियस्थले इन्द्रियसम्बद्धविशेष्यकज्ञानप्रकारीभूतं सामान्यम्, मानसस्थले ज्ञानप्रकारीभूतं सामान्यमात्रम्। एवं स्थिते अणुत्वेन यत्किञ्चिदणूपस्थितौ अणुत्वसामान्यलक्षणासम्बन्धेन सकलाणुबोधो भवत्येवेति सामान्यलक्षणया अणुपरिमाणस्य सकलाणुपरिमाणबोधं प्रति कारणत्वं वर्त्तत एवेति पूर्वपक्षे—

अणुपरिमाणज्ञानमेव कारणं नत्वणुपरिमाणमपि, अन्यथा घटवतो भूतलस्य स्मरणे सामान्यलक्षणया तद्घटवतां स्मरणं न भवेत् सामान्यस्य तदानीमसत्त्वात्। सामान्यज्ञानस्य हेतुत्वे तु सकलतद्घटवतां बोधे=स्मृतौ बाधाभावः तस्मात् सामान्यज्ञानमेव प्रत्यासत्तिर्नतु ज्ञायमानं सामान्यमितिसिद्धान्तः।

अथ 'परमाणुः त्रसरेणुभिन्नः अणुपरिमाणात्' इत्याकारानुमितौ त्रसरेणुप्रतियोगिकभेदसाधने लिङ्गविधया परमाणुपरिमाणस्यापि कारणत्वं वर्त्तत एवेति चेद्? अत्र ब्रूमः। उक्तानुमाने ऽणुपरिमाणज्ञानस्यैव कारणत्वं नतु ज्ञायमानाणुपरिमाणस्य। यदि ज्ञायमानविषयस्यैव अनुमितिकारणत्वं स्वीक्रियेत तदा 'इयं यज्ञशाला वह्निमत्यभूत् अतीतधूमात्' इत्याद्याकाराऽनुमितिर्न स्यात् तदानीं धूमलिङ्गात्मकविषयाभावात् लिङ्गज्ञानस्यानुमितिकारणत्वे तु नैष दोषः। अतो ज्ञायमानं लिङ्गं नानुमितिकारणमित्यग्रेऽनुमानखण्डे विशदं भविष्यति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ननु कारणत्वं किम्, अत आह—

[1] अन्यथासिद्धिशून्यस्य नियता पूर्ववर्तिता ।
कारणत्वं भवेत्तस्य त्रैविध्यं परिकीर्तितम् ॥ १६ ॥
समवायिकारणत्वं ज्ञेयमथाप्यसमवायिहेतुत्वम् ।
एवं न्यायनयज्ञैस्तृतीयमुक्तं निमित्तहेतुत्वम् ॥१७॥

तस्य कारणत्वस्य ॥ १६ ॥ १७ ॥

[2] यत्समवेतं कार्यं भवति ज्ञेयं तु समवायिजनकं तत् । तत्रासन्नं जनकं द्वितीयमाभ्यां परं तृतीयं स्यात् ॥ १८ ॥

तत्रेति । समवायिकारणे आसन्नं प्रत्यासन्नं कारणं द्वितीयमसमवायिकारणमित्यर्थः । तत्र यद्यपि तुरीतन्तुसंयोगानां[3] पटाऽसमवायिकारणत्वं स्यात् । एवं वेगादीनामभिघाताद्यसम-[4]वायिकारणत्वं स्यात् । एवं ज्ञानादिकमपीच्छाद्यसमवायि-[5]

१—पूर्वं कारणत्वमुदाहृतमित्युक्तम्, सम्प्रति किं तत् कारणत्वमिति जिज्ञासायां कारणत्वं लक्षयति—"अन्यथासिद्धिशून्यस्य" इति । पूर्ववर्त्तिनो भावः पूर्ववर्त्तिता । साच दैवादागतरासभस्यापि भवति अत उक्तं—"नियता" इति । नियतपूर्ववर्त्तिता दण्डत्वादावप्यस्ति अत आह—"अन्यथासिद्धिशून्यस्य" इति । एवञ्च—"अनन्यथासिद्धनियतपूर्ववर्त्तित्वं कारणत्वम्" इति कारणलक्षणं निष्पन्नं भवति । उदाहरणं यथा घटम्प्रति दण्डादेः ।

२—समवायिकारणलक्षणमाह—"यत्" इति । यस्मिन् समवायसम्बन्धेन कार्यमुत्पद्यते तत्समवायिकारणमित्यर्थः । यथा घटम्प्रति कपालः ।

३—तुरीतन्त्विति—अनुयोगितासम्बन्धेन तुरीतन्तुसंयोगोऽपि तन्तुसमवेतः, पटरूपकार्यजनकश्चेति असमवायिकारणलक्षणस्य तत्रातिव्याप्तिरेव स्यादिति भावः ।

४—वेगः अभिघाताख्यसंयोगम्प्रति असमवायिकारणं स्यात् । स्पर्शो नोदनसंयोगम्प्रति असमवायिकारणं स्यादित्यर्थः । शब्दनिमित्तकारणं संयोगोऽभिघातः । स्पर्शवद्द्रव्यसंयोगो **नोदनम्** ।

५—ज्ञानमिच्छाम्प्रति, इच्छा च प्रवृत्ति प्रत्यसमवायिकारणं स्यादित्यर्थः ।

Kirtikant Sharma Collection, Najafgarh

कारणं स्यात्। *तथापि पटासमवायिकारणलक्षणे तुरीतन्तु-संयोगभिन्नत्वं देयम्। तुरीतन्तुसंयोगस्तु तुरीपटसंयोगं प्रत्य-समवायिकारणं भवत्येव। एवं वेगादिकमपि वेगस्पन्दाद्यसम-वायिकारणं भवत्येवेति, तत्तत्कार्यासमवायिकारणलक्षणे तत्त-द्भिन्नत्वं देयम्। आत्मविशेषगुणानां कुत्राप्यसमवायिकारणत्वं नास्ति तेन तद्भिन्नत्वं[3] सामान्यलक्षणे देयमेव। अत्र समवायि-कारणे प्रत्यासन्नं द्विविधं कार्यैकार्थप्रत्यासत्त्या कारणैकार्थ-प्रत्यासत्त्या च। आद्यं यथा—घटादिकं प्रति कपालसंयोगादि-कमसमवायिकारणम्। तत्र कार्येण घटेन सह कारणस्य कपाल-संयोगस्यैकस्मिन्कपाले प्रत्यासत्तिरस्ति। द्वितीयं यथा—घट-रूपं प्रति कपालरूपमसमवायिकारणम्। तत्र स्वगतरूपादिकं प्रति समवायिकारणं घटः, तेन सह कपालरूपस्यैकस्मिन्कपाले प्रत्यासत्तिरस्ति। तथा च कैंचित्समवायसम्बन्धेन कैंचित्स्व-समवायिसमवायसम्बन्धेनेति फलितोऽर्थः। इत्थं च कार्यैकार्थ-कारणैकार्थान्यतरप्रत्यासत्त्या समवायिकारणे प्रत्यासन्नं कारणं ज्ञानादिभिन्नमसमवायिकारणमिति सामान्यलक्षणं पर्यवसन्नम्।

---

* आक्षेपं परिहरति "तथापि" इति।

प्रश्नाः—कारणलक्षणभेदादिकं सविस्तरं वर्णय ?। "तथाऽपि पटाऽसम-वायिकारणलक्षणे" इत्यादिग्रन्थः भावस्फोटनपूर्वकं व्याख्यातव्यः ?।

१—अर्थात् प्रत्येकघटपटादिकार्योऽसमवायिकारणे निमित्तकारणसमवायिकारण-संयोगभिन्नत्वमवश्यं निवेश्यम्। यथा—पटासमवायिकारणलक्षणे—तुरीतन्तुसंयोगभिन्नत्वे सति, घटासमवायिकारणलक्षणे चक्रकपालसंयोगभिन्नत्वे सति इत्येवं निवेशः कर्त्तव्यः।

२—आत्मविशेषगुणानाम्=ज्ञानादीनाम्।

३—तथाच—"समवायस्वसमवायिसमवायान्यतरसम्बन्धेन समवायिकारणे प्रत्यासन्नत्वे सति, ज्ञानादिभिन्नत्वे सति कारणमसमवायिकारणम्" इत्यसमवायिकारणस्य सामान्यं लक्षणं ज्ञेयमित्यर्थः।

४—यथा घटं प्रति कपालसंयोगः समवायसम्बन्धेन असमवायिकारणमस्ति।

५—यथा घटरूपं प्रति कपालरूपं स्वसमवायिसमवेतत्वसम्बन्धेन कारणमस्ति, स्वं कपालरूपं तत्समवायि कपालं तत्र समवेतो घटः।

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

आभ्यां समवायिकारणासमवायिकारणाभ्यां परं भिन्नं कारणं तृतीयं निमित्तकारणमित्यर्थः * ॥ १८ ॥

इदानीमन्यथासिद्धत्वमेव कियतां पदार्थानामत आह—

येन सह पूर्वभावः कारणमादाय वा यस्य ।
अन्यं प्रति पूर्वभावे ज्ञाते यत्पूर्वभावविज्ञानम् ॥१९॥
जनकं प्रति पूर्ववृत्तितामपरिज्ञाय न यस्य गृह्यते ।
अतिरिक्तमथापि यद्भवेन्नियतावश्यकपूर्वभाविनः॥२०

यत्कार्यं प्रति कारणस्य पूर्ववृत्तिता येन रूपेण गृह्यते तत्कार्यं प्रति तद्रूपमन्यथासिद्धमित्यर्थः । यथा घटं प्रति दण्ड-

---

* इदन्तु बोध्यम्—एतत्कारणत्रयं भावकार्यस्यैव, अभावस्य तु निमित्त-कारणमात्रम् ।

किञ्च—पुनः कारणं द्विधा । साधारणमसाधारणञ्च । तत्र—कार्यत्वावच्छिन्न-कार्यतानिरूपितकारणताशालि **साधारणकारणम्** । यथा कार्यमात्रंप्रति ईश्वरादयः । तेच—'ईश्वरः, तज्ज्ञानेच्छाकृतयः, अदृष्टप्रतिबन्धकाभावौ चेति (सप्त) । 'दिक्कालप्रागभावा अपि' (इत्येवं दश) इति **न्यायप्रदीपे** ।

वाक्यवृत्तौ—तु 'ईश्वरः, तज्ज्ञानेच्छाकृतयः, प्रागभावः, कालः, दिक्, अदृष्टम् (धर्माधर्मौ) इत्येवमष्टौ । केचित्तु—' प्रतिबन्धकसामान्याभावोऽपि नवमं साधारणकारणमङ्गीचक्रुः' इति **न्यायकोशे** प्राक्तनवनारसमुद्रितमुक्तावली उद्धृता ।

ननु—उक्तसाधारणकारणलक्षणे कार्यत्वकार्यतयोरवच्छेद्यावच्छेदकयोरैक्यमापतितमिति चेन्न कार्यतायां कार्यत्वावच्छिन्नत्वञ्च कार्यत्वानतिरिक्तधर्मानवच्छिन्नत्वमेवावच्छेदकत्वमिति नावच्छेद्यावच्छेदकयोरैक्यशङ्कावकाशः । अथवा—अवच्छेदकं कार्यपद-वाच्यत्वम् प्रागभावप्रतियोगित्वं वा, अवच्छेद्यं (कार्यत्वन्तु) कारणपश्चाद्भावित्वं तेन अवच्छेद्यावच्छेदकयोर्भेद एवेति **न्यायमञ्जरीप्रकाशा**शयः ।

कार्यत्वातिरिक्तधर्मावच्छिन्नकार्यतानिरूपितकारणताशालि **असाधारण-कारणम्** । पुनरपि कारणं द्विधा—फलापधायकं, स्वरूपयोग्यञ्च । अव्यवहितपूर्ववृत्तित्वसम्बन्धेन फलविशिष्ट**माद्यम्** । कारणतावच्छेदकधर्मवद् **द्वितीयम्** ।

१—अवश्यक्लृप्तनियतपूर्ववर्तिभिन्नत्व**मन्यथासिद्धत्वम्** ।

प्रश्नाः—अन्यथासिद्धस्य किं सामान्यलक्षणम् ? कतिविधञ्च तत् ? इति लक्षणोदाहरणद्वारा स्पष्टीकुरु ?

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

त्वमिति। द्वितीयमन्यथासिद्धमाह। कारणमिति। यस्य स्वातन्त्र्येणान्वयव्यतिरेकौ न स्तः, किं तु कारणमादायैवान्वयव्यतिरेकौ गृह्यते तदन्यथासिद्धम्। यथा दण्डरूपं। तृतीयमाह। अन्यं प्रतीति। अन्यं प्रति पूर्ववृत्तित्वं गृहीत्वैव यस्य यत्कार्यं प्रति पूर्ववृत्तित्वं गृह्यते तस्य तत्कार्यं प्रत्यन्यथासिद्धत्वम्। यथा घटादिकं प्रत्याकाशस्य। तस्य हि घटादिकं प्रति कारणत्वमाकाशत्वेनैव स्यात्। आकाशत्वं हि शब्दसमवायिकारणत्वम्। एवं च तस्य शब्दं प्रति जनकत्वं गृहीत्वैव घटादिकं प्रति जनकत्वं ग्राह्यमतस्तदन्यथासिद्धम्। ननु शब्दाश्रयत्वेन तस्य कारणत्वे काऽन्यथासिद्धिरिति चेत्[१] पञ्चमीति गृहाण। नन्वाकाशस्य शब्दं प्रति जनकत्वे किमवच्छेदकमिति चेत्[१] कत्वादिकं[२] विशेषपदार्थो वेति। चतुर्थमन्यथासिद्धमाह। जनकं प्रतीति। यत्कार्यजनकं प्रति पूर्ववृत्तित्वं गृहीत्वैव यस्य यत्कार्यं प्रति पूर्ववृत्तित्वं गृह्यते तस्य तत्कार्यं प्रत्यन्यथासिद्धत्वम्। यथा कुलालपितुर्घटं प्रति। तस्य हि कुलालपितृत्वेन घटं प्रति जनकत्वे एवान्यथासिद्धिः। कुलालत्वेन जनकत्वे त्विष्टापत्तिः, कुलालमात्रस्य घटं प्रति जनकत्वात्। पञ्चममन्यथासिद्धमाह। अतिरिक्तमिति। अवश्यक्लृप्त[३]नियतपूर्व-

१—आकाशत्वस्य एकव्यक्तिवृत्तितया जातित्वाभावादवच्छेदकत्वाऽसम्भव एवेति प्रष्टुराशयः।

२—ककारत्वादीनां वर्णधर्माणामित्यर्थः। न्यायनये ककारादिवर्णानामनित्यत्वमनेकत्वञ्च अतोऽवच्छेदकत्वस्वीकारे गौरवमित्यरुचेराह—'विशेषपदार्थो वा' इति।

३—मूले 'नियतावश्यकपूर्वभाविनः' इत्युक्तम्। तत्र नियतो व्यापकः, आवश्यकः यद्विना कार्यसिद्धिर्न स्यात्। नियतश्चासावावश्यकश्चेति नियतावश्यकः, सचाऽसौ पूर्वभावी इति नियतावश्यकपूर्वभावी तस्मात्, इत्येवं समासार्थं हृदि कृत्वा व्याख्याति—"अवश्यक्लृप्त—" इति।

इत्थञ्च—गन्धनियतवृत्तिगन्धप्रागभावादेरेव गन्धोत्पत्तिनिर्वाहेण गन्धसहभूतरूपप्रागभावादेः पाकजगन्धं प्रति अन्यथासिद्धत्वमेव' इति दिनकरभट्टादीनामाशयः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वर्तिन एव कार्यसम्भवे तद्भिन्नमन्यथासिद्धमित्यर्थः। अत एव महत्त्वं कारणम्, अनेकद्रव्यवत्त्वमन्यथासिद्धम्। तत्रहि— महत्त्वमवश्यं क्लृप्तं तेनानेकद्रव्यवत्त्वमन्यथासिद्धम्। नच वैपरीत्ये किं विनिगमकमिति वाच्यम्, महत्त्वत्वजातेः कारणतावच्छेदकत्वे लाघवात् ॥ १९ ॥ २० ॥

एते पञ्चान्यथासिद्धा दण्डत्वादिकमादिमम्।
घटादौ दण्डरूपादि द्वितीयमपि दर्शितम् ॥ २१ ॥
तृतीयं तु भवेद्व्योम कुलालजनकोऽपरः।
पञ्चमो रासभादिः स्यादेतेष्वावश्यकस्त्वसौ ॥२२॥

रासभादिरिति। यद्यपि यत्किंचिद्घटव्यक्तिं प्रति रासभस्य नियतपूर्ववर्तित्वमस्ति, तथापि घटजातीयं प्रति सिद्धकारणभावैर्दण्डादिभिरेव तद्व्यक्तेरपि सम्भवे रासभोऽन्यथासिद्ध इति भावः। एतेष्विति। एतेषु पञ्चस्वन्यथासिद्धेषु मध्ये पञ्चमोऽन्यथासिद्ध आवश्यकः, तेनैव परेषां चरितार्थत्वात्। तथाहि— दण्डादिभिरवश्यक्लृप्तनियतपूर्ववर्तिभिरेव कार्यसम्भवे दण्ड-

---

१—अत्रानेकद्रव्यवत्त्वं नानेकद्रव्यसमवेतद्रव्यत्वत्वम्, तस्य द्व्यणुकेऽपि सत्त्वेन द्व्यणुकप्रत्यक्षापत्तेः, समवेतसमवेतत्वं तदित्यपि न, आत्मनि तस्याभावेन आत्मप्रत्यक्षानुपपत्तेः। किन्त्वणुभिन्नद्रव्यत्वमिति बोध्यम् इति **दिनकरी**।

इदन्तु बोध्यम्—दण्डादिव्यक्तीनां घटादिकार्यनिरूपितकारणतायाः प्रयोजकावन्वयव्यतिरेकावेव। कारणाधिकरणे कार्यसत्त्वमन्वयः, कारणानधिकरणे कार्याऽभावो व्यतिरेकः इति। इमौ चान्वयव्यतिरेकौ स्वातन्त्र्येण दण्डादिव्यक्तिं प्रति सङ्गतौ भवतो नतु दण्डत्वादिकं प्रत्यपि।। दण्डत्वादिकं प्रति तु दण्डाश्रयत्वघटितपरम्परासम्बन्धेनैव ततः स्वाश्रयदण्डसंयुक्तपरम्परायाः सम्बन्धत्वकल्पने गौरवात्, लाघवाद्दण्डादिव्यक्तेरेव कारणत्वमस्तु, दण्डत्वादिकन्त्वन्यथासिद्धमेव।

२—घटपटादिप्रत्यक्षनिष्ठकार्यतानिरूपितकारणताया महत्त्वजातिनिष्ठावच्छेदकत्वे इत्यर्थः। लाघवात्=शरीरकृतलाघवादित्यर्थः। त्रिविधञ्च लाघवं भवति, शरीरकृतमुपस्थितिकृतं सम्बन्धकृतञ्च। प्रकृते च शरीरकृतं दर्शितमेव।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

त्वादिकमन्यथासिद्धम्। नं च वैपरीत्ये किं विनिगमकमिति वाच्यम्, दण्डत्वस्य कारणत्वे दण्डघटितपरम्परायाः सम्बन्धत्वकल्पने गौरवात्। एवमन्येषामप्यनेनैव चरितार्थत्वं सम्भवतीति ॥ २१ ॥ २२ ॥

समवायिकारणत्वं द्रव्यस्यैवेति विज्ञेयम्।
गुणकर्ममात्रवृत्ति ज्ञेयमथाप्यसमवायिहेतुत्वम् ॥२३॥

गुणकर्मेति। असमवायिकारणत्वं गुणकर्मभिन्नानां वैधर्म्यं न तु गुणकर्मणोः साधर्म्यमित्यत्र तात्पर्यम्। अथवा[3] असमवायिकारणवृत्तिसत्ताभिन्नजातिमत्त्वं तदर्थः। तेन ज्ञानादीनामसमवायिकारणत्वविरहेऽपि न क्षतिः ॥ २३ ॥

अन्यत्र नित्यद्रव्येभ्य आश्रितत्वमिहोच्यते।

नित्यद्रव्याणि परमाण्वाकाशादीनि विहायाश्रितत्वं साधर्म्यमित्यर्थः। आश्रितत्वं तु समवायादिसम्बन्धेन वृत्तिमत्त्वम्।

१–दण्डत्वमेव कारणमस्तु दण्डोऽन्यथासिद्धः स्यादिति वैपरीत्ये। विनिगमकम्=नियामकम्। उत्तरमाह—'दण्डत्वस्य' इति। अस्यायमाशयः—यदि घटनिष्ठकार्यतानिरूपिता दण्डत्वनिष्ठा कारणता स्यात् तदा सा स्वाश्रयजन्यभ्रमिवत्तासम्बन्धेन स्वीकरणीया अर्थात् स्वपदग्राह्यं दण्डत्वं, तदाश्रयो दण्डः, तज्जन्या या भ्रमिः=भ्रमणं चक्रस्य, तद्वत्तारूपपरम्परासम्बन्धेन। परन्तु दण्डस्य कारणतायां स्वजन्यभ्रमिवत्तासम्बन्धेन एव कारणत्वमिति, तथासति प्रथमसम्बन्धे दण्डघटितपरम्परासम्बन्धकल्पने गौरवम्, स्व (दण्ड) जन्यभ्रमिवत्तासम्बन्धकल्पने तु लाघवमित्यस्ति विनिगमकम्।

२—अन्यथा आत्मविशेषगुणेष्वव्याप्तिः स्यात्, आत्मविशेषगुणानां कुत्राप्यसमवायिकारणत्वं नास्तीति सिद्धान्तात्।

३—साधर्म्यप्रकरणे वैधर्म्यकथनमयुक्तमिति मूलं साधर्म्यपरतयैव योजयितुमाह—'अथवा' इति। असमवायिकारणवृत्तिर्या सत्ताभिन्ना जातिः गुणत्व-कर्मत्वरूपा तद्वत्त्वं गुणकर्मणोरेव साधर्म्यमिति। तेन=जातिघटितलक्षणकरणेन। ज्ञानादीनाम्=ज्ञानेच्छादीनामात्मविशेषगुणानाम्। न क्षतिः=नाव्याप्तिरित्यर्थः।

४—यावत्पदार्थानामाश्रितत्वरूपोऽनुगतधर्मः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विशेषणतया[1] नित्यानामपि[2] कालादौ वृत्तेः।

इदानीं द्रव्यस्यैव विशिष्य साधर्म्यं वक्तुमारभते—

क्षित्यादीनां नवानां तु द्रव्यत्वगुणयोगिता ॥२४॥

क्षितिर्जलं तथा तेजः पवनो मन एव च।
परापरत्वमूर्तत्वक्रियावेगाश्रया अमी ॥ २५ ॥

पृथिव्यप्तेजोवायुमनसां परत्वापरत्ववत्त्वं मूर्तत्वं क्रियावत्त्वं वेगवत्त्वञ्च साधर्म्यम्। न च यत्र[3] घटादौ परत्वमपरत्वं वा नोत्पन्नं तत्राव्याप्तिरिति वाच्यम्, परत्वादिसमानाधिकरणद्रव्य[4]त्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात्। मूर्तत्वमपकृष्टपरिमाण[5]वत्त्वम्, तच्च तेषामेव, गगनादिपरिमाणस्य कुतोऽप्यपकृष्टत्वाभावात्। पूर्ववत् कर्मवत्त्वं कर्मसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वं, वेगवत्त्वं वेगवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वं च बोध्यम् ॥ २४ ॥ २५ ॥

कालखात्मदिशां सर्वगतत्वं परमं महत्।
क्षित्यादि पञ्च भूतानि चत्वारि स्पर्शवन्ति हि ॥२६॥

कालाकाशात्मदिशां सर्वगतत्वं सर्वमूर्तसंयोगित्वं परममहत्त्वं च। परममहत्त्वत्वं जातिविशेषः। अपकर्षानाश्रयपरि-

---

१—विशेषणतया=कालिकविशेषणतारूपेण सम्बन्धेन।

२—'नित्यानाम्' इति। पृथिव्यादिचतुर्णां परमाणवः, आकाशादिपञ्चकञ्चेति नित्यानि द्रव्याणि ज्ञेयानि, तेषामित्यर्थः।

प्रश्नाः—द्रव्यस्य, गुणकर्मणोश्च साधर्म्यं ब्रूहि ? कानि नित्यद्रव्याणि ? नित्यद्रव्यभिन्नानां किं साधर्म्यम् ?। कथञ्च ? "गुणकर्मभिन्नानां वैधर्म्यम्" इति ग्रन्थः साधर्म्यप्रकरणे कथमुक्तः ?।

३—यत्र=उत्पन्नविनष्टघटपटादिकार्येषु। परत्वमपरत्वं वा=परत्वाऽपरत्वबुद्धिरित्यर्थः।

४—परत्वादिसमानाधिकरणे वर्त्तमाना या द्रव्यत्वव्याप्या जातिः पृथिवीत्वजलत्वादिरूपा तद्वत्त्वस्येत्यर्थः।

५—मूर्त्तद्रव्येषु यत्परिमाणं न वर्त्तते-तादृशपरिमाणवत्त्वं चतुर्णां साधर्म्यमित्यर्थः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

माणत्वं वा । क्षित्यादीति । पृथिव्यप्तेजोवाय्वाकाशानां भूतत्वम् । तच्च [1]बहिरिन्द्रियग्राह्यविशेषगुणवत्त्वम् । [2]अत्र ग्राह्यत्वं लौकिकप्रत्यक्ष-स्वरूपयोग्यत्वं बोध्यम् । तेन ज्ञातो घट इत्यादिप्रत्यक्षे ज्ञानस्याप्यु*पनीतभानविषयत्वात्तद्वति आत्मनि नातिव्याप्तिः । नवा प्रत्यक्षाविषयरूपादिमति परमाण्वादावव्याप्तिः, तस्यापि स्वरूपयोग्यत्वात् । महत्त्वलक्षणकारणान्तरासन्निधानाच्च न प्रत्यक्षम् । [3]अथवा आत्मावृत्तिविशेषगुणवत्त्वं तत्त्वम् । चत्वारीति । पृथिव्यप्तेजोवायूनां स्पर्शवत्त्वम् ॥ २६ ॥

[4]द्रव्यारम्भश्चतुर्षु स्यादथाकाशशरीरिणाम् ।
अव्याप्यवृत्तिः क्षणिको विशेषगुण इष्यते ॥२७॥

पृथिव्यप्तेजोवायुषु चतुर्षु द्रव्यारम्भकत्वम् । नच द्रव्यानारम्भके

१—बहिरिन्द्रियाणि चक्षुरादीनि तैर्ग्राह्यो यो विशेषगुणः रूपरसादिः, तद्वन्तः पृथिव्यादयः, तद्वत्त्वं तेषामित्यर्थः ।

२—**अत्रेयमाशङ्का**—'ज्ञातो घटः' इत्याकारके ज्ञाने प्रकारीभूतं=विशेषणीभूतं ज्ञानम्, घटो विशेष्यः तादृशविशेषणविशिष्टज्ञानम्—अर्थात् "चक्षुःसंयुक्तमनःसंयुक्तात्मसमवेत-ज्ञानविषयत्वसम्बन्धेन" घटज्ञानांशे जायमानं यत् चक्षुरिन्द्रियजन्यं=प्रत्यक्षं ज्ञानमलौकिकं, तदपि बहिरिन्द्रियग्राह्यो विशेषगुण एव, तद्वान् आत्माऽस्तीत्येवमुपनीतभानात्मकं ज्ञानमादाय तज्ज्ञानवति आत्मन्यतिव्याप्तिः ।

किञ्च—बहिरिन्द्रियग्राह्याः स्थूलाः पृथिव्यादयः, तद्वर्त्तिनो विशेषगुणाः रूपाद्याः परमाण्वाद्यास्तु न बहिरिन्द्रियग्राह्याः, नचैवं तेषां तद्वत्त्वमिति तेषु=परमाण्वादिष्वव्याप्तिरित्याशङ्कायां जायमानायां समाधानग्रन्थमाह—'अत्र ग्राह्यत्वम्' इति । **तेन**=उक्ताकारग्राह्यत्व-निर्वचनेन । '**ज्ञातो घट**' इत्यादिप्रत्यक्षे यतो घटांशे लौकिकः सन्निकर्षः, ज्ञानांशे तु ज्ञानलक्षणारूपोऽलौकिकः सन्निकर्षः, अतः तादृशे लौकिकसन्निकर्षजन्यप्रत्यक्षविषयता नास्ति इति ज्ञानलक्षणासम्बन्धेन जायमानाऽलौकिकज्ञानवत्यात्मनि नातिव्याप्तिः । परमाण्वादिषु तु तादृशविशेषगुणभूतरूपादीनां लौकिकप्रत्यक्षविषयतायाः स्वरूपयोग्यता वर्त्ततेऽतो नाऽव्याप्तिरित्याशयः ।

* ज्ञानलक्षणासन्निकर्षजन्यं ज्ञान**मुपनीतभानम्** ।

३—कारणतावच्छेदकधर्मवत्त्वं स्वरूपयोग्यत्वं, तच्च न परमाणुनिष्ठे रूपे, तस्याऽनुद्भूतत्वात् इत्यरुचेः कल्पान्तरमाह—"**अथवा**" इति ।

४—चतुर्षु = द्रव्यारम्भकत्वं चतुर्णां साधर्म्यमित्यर्थः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

घटादावव्याप्तिः, द्रव्यसमवायिकारणवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात्। आकाशशरीरिणामिति। आकाशात्मनामव्याप्यवृत्तिक्षणिकविशेषगुणवत्त्वं साधर्म्यमित्यर्थः। आकाशस्य विशेषगुणः शब्दः, स चाव्याप्यवृत्तिः, यदा किंचिदवच्छेदेन शब्द उत्पद्यते तदान्यावच्छेदेन तदभावस्यापि सत्त्वात्। क्षणिकत्वं च तृतीयक्षणवृत्तिध्वंसप्रतियोगित्वम्। योग्यविभुविशेषगुणानां स्वोत्तरवर्तिगुणनाश्यत्वात्प्रथमशब्दस्य द्वितीयशब्देन नाशः। एवं ज्ञानादीनामपि। ज्ञानादिकं यदात्मनि विभौ शरीराद्यवच्छेदेनोत्पद्यते तदा घटाद्यवच्छेदेन तदभावोऽस्त्येव एवं ज्ञानादिकमपि क्षणद्वयावस्थायि। इत्थं चाव्याप्यवृत्तिविशेषगुणवत्त्वं क्षणिकविशेषगुणवत्त्वं चार्थः। पृथिव्यादौ रूपादिर्विशेषगुणोऽस्तीत्यतोऽव्याप्यवृत्तीत्युक्तम्। पृथिव्यादावव्याप्यवृत्तिः संयोगादिरस्तीत्यतो विशेषगुणेत्युक्तम्। नच रूपादीनामपि कदाचित्तृतीयक्षणे नाशसंभवात्क्षणिकविशेषगुणवत्त्वं क्षित्यादावतिव्याप्तमिति वाच्यं,

---

१—द्रव्यस्य = कार्यद्रव्यस्य यत् समवायिकारणं, तद्वृत्तिर्या द्रव्यत्वस्य व्याप्या जातिः पृथिवीत्वं, जलत्वं, तेजस्त्वं, वायुत्वञ्च, तादृशजातिमत्त्वस्य विवक्षणात् द्रव्यानारम्भके घटादौ नाव्याप्तिदोष इत्यर्थः।

२—न व्याप्य वर्त्तते इत्यव्याप्यवृत्तिः शब्दो हि सर्वमाकाशं व्याप्य न वर्त्तते। कादाचित्कत्वे सति एकदेशवृत्तित्वम्, स्वसमानाधिकरणनिष्ठात्यन्ताभावप्रतियोगित्वं वा अव्याप्यवृत्तित्वम्।

३—आद्ये क्षणे शब्द उत्पद्यते, द्वितीये क्षणे तिष्ठति, तृतीये क्षणे नश्यति, अन्यश्चोत्पद्यते इत्येवंरीत्या शब्दानामुत्पत्तिविनाशौ भवतः, अतः तृतीयक्षणे विद्यमानो यो ध्वंसः तत्प्रतियोगित्वमेव **क्षणिकत्वम्** = द्विक्षणावस्थायित्वमिति यावत्।

४—**योग्येति**—योग्याः = प्रत्यक्षयोग्या ये विभूनाम् = आकाशात्मनां विशेषगुणाः = शब्दज्ञानाद्याः तेषाम्।

५—कदाचित् तृतीयक्षणे घटे वा पटे वा नष्टे तदीयं रूपमपि नष्टं तदा तृतीयक्षणवृत्तिध्वंसस्य रूपमपि प्रतियोगि, एवमुक्तलक्षणस्य पृथिव्यामतिव्याप्तिः। अस्य परिहारमाह—**चतुःक्षणवृत्तीति**। अस्यायमर्थः—चतुःक्षणवृत्तीति यानि जन्यानि घटपटादीनि रूपरसादीनि च तद्वृत्तिः = तत्राऽवर्त्तमाना या जातिः शब्दत्वरूपा ज्ञानत्वादिका वा, तद्वन्तो ये विशेषगुणाः शब्दो ज्ञानाद्याश्च, तद्वत्त्वमाकाशात्मनां साधर्म्यमिति लक्षणसमन्वयः। लक्षणे चतुःक्षणशब्दोऽधिककालोपलक्षणार्थः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

चतुःक्षणवृत्तिजन्यावृत्तिजातिमद्विशेषगुणवत्त्वस्य तदर्थत्वात्। अपेक्षा-बुद्धिः[1] क्षणत्रयं तिष्ठति, क्षणचतुष्टयं तु न किमपि जन्यज्ञानादिकं तिष्ठति। रूपत्वादिकं तु क्षण[2]चतुष्टयस्थायिन्यपि रूपादौ वर्तते इति तद्व्युदासः[3]। ईश्वरज्ञानस्य चतुः[4]क्षणवृत्तित्वाज्ज्ञानत्वस्य तद्वृत्तित्वा-ज्जन्येत्युक्तम्। यद्वाकाशजीवात्मनोः साधर्म्यं तदा जन्येति न देयं, द्वेषत्वादिकमादाय लक्षणसमन्वयात्। परममहत्त्वस्य तादृशगुणत्वाच्च चतुर्थक्षणे द्वित्वादीनामपि नाशाभ्युपगमाद् द्वित्वादीनामपि तथा-त्वात्तद्वारणाय विशेषेति। त्रिक्षणवृत्तित्वं वा वाच्यम्। द्वेषत्वा-दिकमादायात्मनि लक्षणसमन्वयः ॥२७॥

रूपद्रवत्वप्रत्यक्षयोगिनः प्रथमास्त्रयः।

गुरुणी द्वे रसवती द्वयोर्नैमित्तिको द्रवः ॥२८॥

पृथिव्यप्तेजसां रूपवत्त्वं, द्रवत्ववत्त्वं, प्रत्यक्षविषयत्वं चेत्यर्थः। नच चक्षुरादीनां भर्जनकपालस्थवह्नेरूष्मणश्च रूपवत्त्वे किं मान-मिति वाच्यम्, तत्रापि तेजस्त्वेन रूपानुमानात्[5]। एवं वाय्वानीत-पृथिवीजलतेजोभागानामपि पृथिवीत्वादिना रूपानुमानं बोध्यम्। नच घटादौ द्रुतसुवर्णादिभिन्ने तेजसि च द्रवत्ववत्त्वमव्याप्तमिति वाच्यम्, द्रवत्ववद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात्।

१—"अयमेकः अयमेकः इमौ द्वौ" इत्याकारा द्वित्वादिसङ्ख्याविषयिणी बुद्धिः अपेक्षाबुद्धिः।

२—क्षणचतुष्टयकालोपलक्षिताधिककालस्थायिनि रूपादावित्यर्थः।

३—रूपत्वादिकजातिव्युदासः। ततश्च नैव पृथिव्यादावतिव्याप्तिरिति भावः।

४—चतुःक्षणवृत्ति ईश्वरज्ञानमप्यस्ति, एवं ज्ञानत्वजातिः तद्वृत्तिर्न स्यात, किन्तु तद्वृत्तिरेव अतस्तद्वारणाय "जन्य" पदनिवेशः। ईश्वरज्ञानन्तु नित्यं, न जन्यम्। तथासति—चतुःक्षण-वृत्तिजन्यावृत्तिर्जातिरीश्वरज्ञाननिष्ठाऽपि सङ्ग्रहीतुं शक्येति त्रयाणामाकाशजीवपरमात्मनां साधर्म्यं घटते। एतच्च—कारिकास्थबहुवचनान्तपदोपादानेन ज्ञायते। यदि तु—शरीरिपदेन केवलं जीवात्मनामेव ग्रहणमभीष्टं तदा "जन्ये"ति निष्फलम्, किन्तु तन्निष्कास्य द्वेषत्वादिकजातिमादाय लक्षणं समन्वेतव्यम्। अधिकं मत्प्रणीतमुक्तावलीप्रभायां द्रष्टव्यम्।

५—चक्षुरिन्द्रियं रूपवत् तेजस्त्वात्, इत्युनुमानेनेत्यर्थः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

घृतजतुप्रभृतिषु पृथिवीषु, जलेषु, द्रुतसुवर्णादौ तेजसि च द्रवत्व-सत्त्वात्तत्र च पृथिवीत्वादिसत्त्वात्तदादाय सर्वत्र लक्षणसमन्वयः। नच प्रत्यक्षविषयत्वं परमाण्वादावव्याप्तमतिव्याप्तं च रूपादाविति वाच्यम्, चाक्षुषप्रत्यक्षविषयवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात्। आत्मन्यतिव्याप्तिवारणाय चाक्षुषेति। गुरुणी इति। गुरुत्ववत्त्वं रसवत्त्वं पृथिवीजलयोरित्यर्थः। नच घ्राणेन्द्रियादीनां वाय्वानीतपार्थिवादिभागानां च रसादिमत्त्वे किं मानमिति वाच्यम्, तत्रापि पृथिवीत्वादिना तदनुमानात्[1]। द्वयोरिति। पृथिवीतेजसो-रित्यर्थः। नच नैमित्तिकद्रवत्ववत्त्वं घटादौ वह्न्यादौ चाव्याप्तमिति वाच्यम्, नैमित्तिकद्रवत्वसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात्॥ २८॥

आत्मानो भूतवर्गाश्च विशेषगुणयोगिनः।
यदुक्तं यस्य साधर्म्यं वैधर्म्यमितरस्य तत्॥२९॥

आत्मान इति। पृथिव्यप्तेजोवाय्वाकाशात्मनां विशेषगुणवत्त्व-मित्यर्थः। [2]ज्ञेयत्वादिकं विहायेति बोध्यम्। तत्तु न कस्यापि वैधर्म्यं केवलान्वयित्वात्॥ २९॥

स्पर्शादयोऽष्टौ वेगाख्यः संस्कारो मरुतो गुणाः।
स्पर्शाद्यष्टौ रूपवेगौ द्रवत्वं तेजसो[3] गुणाः॥ ३०॥

१—घ्राणेन्द्रियादीनि रसवन्ति पृथ्वीत्वात्, इत्यनुमानेनेत्यर्थः।

२—आदिशब्देन प्रमेयत्वम्, वाच्यत्वम्, अभिधेयत्वम् च गृह्यते। ज्ञेयत्वादीनां केवलान्वयित्वात्साधर्म्याभाव इत्यर्थः।

३—यद्यपि उद्देशानुसारेण पृथिव्यादिक्रमेणैव गुणानां प्रदर्शनमुचितमाभाति तथापि—

वायोर्नवैकादश तेजसो गुणा
जलक्षितिप्राणभृतां चतुर्दश।
दिक्कालयोः पञ्च षडेव चाम्बरे
महेश्वरेऽष्टौ मनसस्तथैव॥ इति—

प्राचीनकारिकानुसारं वाय्वादिक्रमेण गुणान् दर्शयति परममूले इति ज्ञेयम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

स्पर्शादयोऽष्टौ वेगश्च गुरुत्वं च द्रवत्वकम् ।
रूपं रसस्तथा स्नेहो वारिण्येते चतुर्दश ॥ ३१ ॥
स्नेहहीना गन्धयुता क्षितावेते चतुर्दश ।
बुद्ध्यादिषट्कं संख्यादिपञ्चकं भावना तथा ॥ ३२ ॥
धर्माधर्मौ गुणा एते ह्यात्मनः स्युश्चतुर्दश ।
संख्यादिपञ्चकं कालदिशोः शब्दश्च ते च खे ॥३३॥
संख्यादयः पञ्च बुद्धिरिच्छा यत्नोऽपि चेश्वरे ।
परापरत्वे संख्याद्याः पञ्च वेगश्च मानसे ॥ ३४ ॥

ते च खे आकाशे ॥ ३० ॥ ३१ ॥ ३२ ॥ ३२ ॥ ३४ ॥ साधर्म्यवैधर्म्ये निरूप्य संप्रति प्रत्येकं पृथिव्यादिकं निरूपयति—

तत्र क्षितिर्गन्धहेतुर्नानारूपवती मता ।
षड्विधस्तु रसस्तत्र गन्धस्तु द्विविधो मतः ॥ ३५ ॥

गन्धहेतुरिति । गन्धसमवायिकारणमित्यर्थः । यद्यपि गन्धवत्त्वमात्रं लक्षणमुचितम्, तथापि पृथिवीत्वजातौ प्रमाणोपन्यासाय कारणत्वमुपन्यस्तम् । तथाहि—पृथिवीत्वं हि गन्धसमवायिकारणतावच्छेदकतया सिद्ध्यति । अन्यथा गन्धत्वावच्छिन्नस्याकस्मिकत्वापत्तेः । नच पाषाणादौ गन्धाभावाद्गन्धवत्त्वमव्याप्तमिति वाच्यं, तत्रापि गन्धसत्त्वात् । अनुपलब्धिस्त्वनुत्कटत्वेनाप्युपपद्यते, कथमन्यथा तद्भस्मनि गन्ध उपलभ्यते । भस्मनो हि पाषाणध्वंसजन्यत्वात्

१—पृथिवीत्वम्=पृथिवीत्वजातिरित्यर्थः । **गन्धसमवायीति**—समवायेन या गन्धनिष्ठा कार्यता, तादृशकार्यतानिरूपिता या पृथिवीनिष्ठा समवायिकारणता साऽवश्यं किञ्चिद्धर्माऽवच्छिन्ना कारणतात्वात् घटनिष्ठकारणतानिरूपितकपालनिष्ठकारणतावत् । स च धर्मो लाघवात्तदवच्छेदकः पृथिवीत्वजातिरूप एव सिध्यतीत्यर्थः ।

२—विपक्षे बाधकमाह—"**अन्यथा**" इति । गन्धत्वावच्छिन्नं प्रति पृथिव्या हेतुत्वानङ्गीकारे गन्धम्प्रति नियतकारणजन्यतानियमो न स्यात् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पाषाणोपादानोपादेयत्वं सिद्ध्यति। यद् द्रव्यं[2] यद्द्रव्यध्वंसजन्यं तत्तदुपादानोपादेयमिति व्याप्तेः। दृष्टं चैतत्खण्डपटे[3] महापटध्वंसजन्ये। इत्थं च पाषाणपरमाणोः पृथिवीत्वात्[4] तज्जन्यस्य पाषाणस्यापि पृथिवीत्वं, तथा च तस्यापि[5] गन्धवत्त्वे बाधकाभावः। नानारूपेति। शुक्लनीलादिभेदेन नानाजातीयं रूपं पृथिव्यामेव वर्तते न तु जलादौ, तत्र शुक्लस्यैव सत्त्वात्। पृथिव्यां तु एकस्मिन्नपि धर्मिणि पाकवशेन नानारूपसंभवात्। नच यत्र नानारूपं नोत्पन्नं तत्राव्याप्तिरिति वाच्यम्, रूपद्वयवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात्, रूपनाशवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य वा वाच्यत्वात्। वैशेषिकनये पृथिवीपरमाणौ रूपनाशस्य रूपान्तरस्य च सत्त्वात्, न्यायनये घटादावपि तत्सत्त्वाल्लक्षणसमन्वयः। षड्विध इति। मधुरादिभेदेन यः षड्विधो रसः स पृथिव्यामेव। जले च मधुर एव रसः। अत्रापि पूर्ववद्रसद्वयवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वं लक्षणार्थोऽवसेयः। गन्धस्त्विति। द्विविध इति वस्तुस्थितिमात्रं न तु द्विविधगन्धवत्त्वं लक्षणं द्विविधत्वस्य व्यर्थत्वात्। द्वैविध्यं च सौरभासौरभभेदेन बोध्यम्॥२५॥

स्पर्शस्तस्यास्तु विज्ञेयो ह्यनुष्णाशीतपाकजः[6]।

१—उपादानम्=समवायिकारणम्। उपादेयम्=कार्यम्। पाषाणनिष्ठोपादनतानिरूपितोपादेयता भस्मनिष्ठा सिध्यतीत्यर्थः।

२—प्रकृते चैवं योज्यम्—यद्द्रव्यम्=भस्मद्रव्यम्, यद्द्रव्यध्वंसजन्यम्=पाषाणद्रव्यध्वंसजन्यम्, तद् द्रव्यम्=भस्मद्रव्यम्, तदुपादानोपादेयम्=तस्य पाषाणादिद्रव्यस्य यदुपादानं= पृथिवीपरमाण्वादि तस्योपादेयमिति।

३—खण्डपटे=अतिमहतः पटस्य नाशात्=ध्वंसादुद्भूते पटैकदेशे इत्यर्थः।

४—पृथिवीत्वात् = पृथिवीत्वजातिमत्त्वात्।

५—तस्यापि = पाषाणस्यापि।

प्रश्नाः—पृथिव्याः किं लक्षणम्? पृथिवीत्वजातिसिद्धेः कः प्रकारः? पाषाणस्य कथं पृथिवीत्वम्? कुतस्तत्र गन्धस्य नोपलब्धिः? यत्र घटादौ नानारूपं नोत्पन्नं तत्रेदं लक्षणं कथं घटते? पृथिव्यां कतिविधो रसः? कीदृशश्च स्पर्शः?

६—अनुष्णोऽव्यक्तोष्णः, अशीतः = अव्यक्तशीतः अनुष्णश्चासावशीतश्च अनुष्णाशीतः-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तस्याः पृथिव्याः । अनुष्णाशीतस्पर्शवत्त्वं वायोरपि वर्तत इत्युक्तं पाकज इति । इत्थं च पृथिव्याः स्पर्शोऽनुष्णाशीत इति ज्ञापनार्थं तदुक्तम् । वस्तुतस्तु पाकजस्पर्शवत्त्वमात्रं लक्षणम्, अधिकस्य वैयर्थ्यात् । यद्यपि पाकजस्पर्शः पटादौ नास्ति तथापि पाकजस्पर्शवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वमर्थो बोध्यः।

नित्यानित्या च सा द्वेधा नित्या स्यादणुलक्षणा ॥३६॥
अनित्या तु तदन्या स्यात्सैवावयवयोगिनी ।
सा च त्रिधा भवेद्देहमिन्द्रियं विषयस्तथा ॥ ३७ ॥

सा पृथिवी द्विविधा, नित्या अनित्या चेत्यर्थः । अणुलक्षणा परमाणुरूपा पृथिवी नित्या । तदन्या परमाणुभिन्ना पृथिवी द्व्यणुकादिरूपा सर्वाऽप्यनित्येत्यर्थः । सैव अनित्या पृथिव्येवावयववतीत्यर्थः । ननु अवयविनि किं मानम्, परमाणुपुञ्जैरेवोपपत्तेः । नच परमाणूनामतीन्द्रियत्वाद्घटादेः प्रत्यक्षं न स्यादिति वाच्यम्, एकस्य परमाणोरप्रत्यक्षत्वेऽपि तत्समूहस्य प्रत्यक्षत्वात् । यथैकस्य केशस्य दूरेऽप्रत्यक्षत्वेऽपि तत्समूहस्य प्रत्यक्षत्वम् । नचैको घटः स्थूल इति बुद्धेरनुपपत्तिरिति वाच्यम्, एको महान्धान्यराशिरितिवदुपपत्तेः । मैवम्, परमाणोरती-

सचासौ पाकज इति कर्मधारयो बोध्यः । इत्थञ्च—नानारूपवत्त्वम्, षड्विधरसवत्त्वम्, पाकजस्पर्शवत्त्वञ्चेत्यपि लक्षणत्रयं पृथिव्याः सम्पन्नम् ।

२—पाकजस्पर्शवन्तो ये घटाद्याः तेषु वृत्तिर्वर्तनं यस्याः, एवम्भूता या द्रव्यत्वस्य व्याप्या जातिः अर्थात् पृथिवीत्वम् तादृशजातिमत्त्वं लक्षणार्थो विवक्षितः तस्याश्च जातेः पटादावपि सत्त्वान्नाऽव्याप्तिगन्धोऽपीति भावः ।

३—जालान्तरगते भानौ सूक्ष्मं यद् दृश्यते रजः
तस्य षष्ठतमो भागः परमाणुः प्रकीर्त्तितः ॥

जालम् = गवाक्षः ।

४—नित्यत्वञ्च—भावत्वे सति ध्वंसाऽप्रतियोगित्वम् । ध्वंसवारणाय सत्यन्तं बोध्यम ।

५—परमाणुपुञ्जवादी बौद्धः शङ्कते—" ननु " इति ।

६—परमाणुपुञ्जैः = विलक्षणसंस्थान (संयोगविशेष) विशिष्टैः परमाणुभिरेवेत्यर्थः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

न्द्रियत्वेन तत्समूहस्यापि प्रत्यक्षायोग्यत्वात्। दूरस्थकेशस्तु नातीन्द्रियः सन्निधाने तस्यैव प्रत्यक्षत्वात्। नच तदानीमदृश्यपरमाणुपुञ्जाद् दृश्यपरमाणुपुञ्जस्योत्पन्नत्वान्न प्रत्यक्षत्वे विरोध इति वाच्यम्, अदृश्यस्य दृश्यानुपादानत्वात्। अन्यथा चक्षुरूष्मादिसंततेरपि कदाचिद् दृश्यत्वप्रसङ्गात् *। नचातितप्ततैलादौ कथमदृश्यदहनसंततेर्दृश्यदहनोत्पत्तिरिति वाच्यम्, तत्र तदन्तःपातिभिर्दृश्यदहनावयवैः स्थूलदहनोत्पत्तेरुपगमात्। नचादृश्येन द्व्यणुकेन कथं दृश्यत्रसरेणोरुत्पत्तिरिति वाच्यम्,यतो न दृश्यत्वमदृश्यत्वं वा कस्यचित्स्वभावादाचक्ष्महे किंतु महत्त्वोद्भूतरूपादिकारणसमुदायवशाद् दृश्यत्वं तदभावे चादृश्यत्वम्। तथाच त्रसरेणोर्महत्त्वात्प्रत्यक्षत्वं न तु द्व्यणुकादेस्तदभावात्। नहि त्वन्मतेऽपि संभवतीदं परमाणौ महत्त्वाभावात्। इत्थं चावयविसिद्धौ तेषामुत्पादविनाशयोः प्रत्यक्षसिद्धत्वादनित्यत्वम्। तेषां चावयवावयवधारायाः अनन्तत्वे मेरुसर्षपयोरपि साम्यप्रसङ्गः। अतः क्वचिद्विश्रामो वाच्यः। यत्र तु विश्रामस्तस्यानित्यत्वेऽसमवेत-

---

१—तदानीम् = कार्योत्पत्तिकाले।

प्रश्नाः—पृथिव्याः सामान्यतः के भेदाः? विशेषतश्च के? अवयविखण्डने बौद्धस्य कीदृशः पूर्वपक्षः? कथञ्च तत्र सिद्धान्तिनः समाधानम्? कः परमाणुपदार्थः? परमाणुसिद्धिप्रकारश्च कीदृशः?

२—अदृश्यस्य दृश्योत्पादकत्वाङ्गीकारे। चक्षुरूष्मादिसन्ततेः=अदृश्यभूतस्य चक्षुरूष्मादिसन्तानस्येत्यर्थः।

* एवञ्च अदृश्यं न दृश्योपादानमिति भावः।

३—महत्त्वाभावादित्यर्थः।

४—परमाणुपुञ्जवादिनस्तव बौद्धस्य मते इत्यर्थः।

५—तेषाम्=अवयविपदार्थस्येति विवक्षितोऽर्थः। एवञ्च—"अवयवी अनित्यः=उत्पत्तिविनाशशाली सावयवत्वात् घटादिवत्" इत्यनुमानं फलति। अत्र—अवयवित्वं पक्षतावच्छेदकम्, अवयवसमवेतत्वञ्च हेतुतावच्छेदकमिति न साध्यहेत्वोरैक्यम्।

६—तारतम्यम्=न्यूनाधिकभावः। तद्यथा त्रसरेणुमारभ्याकाशादौ विश्रान्तम् एवमणुपरिमाणन्यूनाधिक्यमपि क्वचित् विश्राम्येत, यत्र च विश्राम्यति स एव परमाणुरिति निर्गलितोऽर्थः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भावकार्योत्पत्तिप्रसङ्ग इति तस्य नित्यत्वम् । महत्परिमाणतारतम्यस्य गगनादौ विश्रान्तत्वमिवाणुपरिमाणतारतम्यस्यापि क्वचिद्विश्रान्तत्वमस्तीति तस्य परमाणुत्वसिद्धिः । नच त्रसरेणावेव विश्रामोऽस्त्विति वाच्यम्, त्रसरेणुः सावयवः चाक्षुषद्रव्यत्वात् घटवदित्यनुमानेन तदवयवसिद्धौ, त्रसरेणोरवयवाः सावयवाः महदारम्भकत्वात् कपालवदित्यनुमानेन तदवयवसिद्धेः । नचेदमप्रयोजकम्, अपकृष्टमहत्त्वं प्रत्यनेकद्रव्यत्वस्य प्रयोजकत्वात् । नचैवं क्रमेण तदवयवधारापि सिद्ध्येदिति वाच्यम्, अनवस्थाभयेन तदसिद्धेरिति । सा चेति । सा कार्यरूपा पृथिवी त्रिधेत्यर्थः । शरीरेन्द्रियविषयभेदादित्यर्थः ॥ ३६ ॥ ३७ ॥

तत्र देहमुदाहरति—

योनिजादि भवेद्देहमिन्द्रियं घ्राणलक्षणम् ।
विषयो द्व्यणुकादिश्च ब्रह्माण्डान्त उदाहृतः ॥३८॥

योनिजमयोनिजं चेत्यर्थः । योनिजमपि द्विविधं जरायुजमण्डजं च । जरायुजं मानुषादीनाम् । अण्डजं सर्पादीनाम् । अयोनिजं स्वेदजोद्भिज्जादिकम् । स्वेदजाः कृमिदंशाद्याः । उद्भिज्जास्तरुगुल्माद्याः । नारकिणां शरीरमप्ययोनिजम् । नच मानुषादिशरीराणां पार्थिवत्वे किं मानमिति वाच्यम्, गन्धादिमत्त्वस्यैव प्रमाणत्वात् । नच क्लेदोष्मादेरुपलम्भादाप्यत्वादिकमपि स्यादिति वाच्यम्, तथा सति जलत्वपृथिवीत्वादिना सङ्करप्रसङ्गात् । नच तर्हि जलीयत्वादिकमेवास्तु न पार्थिवत्वमिति वाच्यम्, क्लेदादीनां विनाशेऽपि शरीरत्वेन प्रत्यभिज्ञानाद्गन्धाद्युपलब्धेश्च पृथिवीत्वसिद्धेः । तेन पार्थिवादिशरीरे जलादीनां निमित्तत्वमात्रं बोध्यम् । शरीरत्वं तु न जातिः पृथिवीत्वादिना सांकर्यात् । किंतु चेष्टाश्रयत्वम् । वृक्षादीना-

१—गन्धवच्छरीरं पार्थिवं शरीरम् । २—पृथिवीत्वधर्मं त्यक्त्वा शरीरत्वधर्मः जलादिशरीरेष्वपि वर्तते, एवं शरीत्वधर्मं त्यक्त्वा पृथ्वीत्वं घटादौ वर्तते, अनयोः समावेशः मानुषादिशरीरेषु ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मपि चेष्टासत्त्वान्नाव्याप्तिः। नच वृक्षादेः शरीरत्वे किं मानमिति वाच्यम्, आध्यात्मिकवायुसम्बन्धस्य प्रमाणत्वात्। तत्रैव किं मानमिति चेद्भग्नक्षतसंरोहणादिना तदनुमानात्। यदि हस्तादौ शरीरव्यवहारो न भवति तदाऽन्त्यावयवित्वेन विशेषणीयम्। नच यत्र चेष्टा न जाता तत्राव्याप्तिरिति वाच्यम्, तादृशे प्रमाणाभावात्। अथवा चेष्टावदन्त्यावयविवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वमन्त्यावयविमात्रवृत्तिचेष्टावद्वृत्तिजातिमत्त्वं वा तत्। मानुषत्वचैत्रत्वादिजातिमादाय लक्षणसमन्वयः। नच नृसिंहशरीरे कथं लक्षणसमन्वयः, तत्र नृसिंहत्वस्यैकव्यक्तिवृत्तितया जातित्वाभावाज्जलीयतैजसशरीरवृत्तितया देवत्वस्यापि जातित्वाभावादिति वाच्यम्, कल्पभेदेन नृसिंहशरीरस्य नानात्वेन नृसिंहत्वजात्या लक्षणसमन्वयात्। इन्द्रियमिति। घ्राणेन्द्रियं पार्थिवमित्यर्थः। पार्थिवत्वं कथमिति चेदित्थम्—घ्राणेन्द्रियं पार्थिवं रूपादिषु मध्ये गन्धस्यैव व्यञ्जकत्वात्। कुंकुमगन्धाभिव्यञ्जकगोघृतवत्। नच दृष्टान्ते स्वकीयरूपादिव्यञ्जकत्वादसिद्धिरिति वाच्यम्, परकीयरूपाद्यव्यञ्जकत्वस्य तदर्थत्वात्। न

१—अन्त्यावयवित्वे सति चेष्टाश्रयत्वमित्यर्थः। द्रव्यान्तरानारम्भकत्वमन्त्यावयवित्वम्।

२—चेष्टावदन्त्यावयविनि वर्तमाना या द्रव्यत्वव्याप्या मानुषत्वादिजातिस्तादृशजातिमत्त्वम्। हिताऽहितप्राप्तिपरिहार्था क्रिया चेष्टा।

प्रश्नाः—शरीरस्य किं लक्षणम्? कतिविधञ्च तत्? पार्थिवशरीरस्य किं लक्षणम्? मानुषादिशरीराणां पार्थिवत्वे युक्तिं दर्शय? शरीरत्वस्य जातित्वे किं बाधकम्? कथञ्च घटते?

"चेष्टावदन्त्यावयविवृत्ति"—इत्यादि ग्रन्थं व्याख्याहि?।

३—देवत्वं न जातिः किन्तूपाधिः सांकर्यात्। देवत्वधर्मं त्यक्त्वा तैजसत्वधर्मः सुवर्णादितैजसपदार्थेऽपि वर्तते। एवं तैजसत्वधर्मं त्यक्त्वा देवत्वं जलीयदेवेष्वपि वर्तते, उभयोः समावेशः तैजसदेवशरीरेषु।

४—घृतं कुंकुमादिगतरूपादिमध्ये गन्धस्यैव व्यञ्जकम्।

५—**नचेति**। पूर्वोक्तो हेतुर्जले व्यभिचारी, कथमिति चेत्? शृणु—जलमपि नवशरावीयगन्धस्याभिव्यञ्जकम्। अस्योत्तरम्—जलं न केवलं गन्धाभिव्यञ्जकं किंतु सक्तुरसस्याप्यभिव्यञ्जकमिति न दोषः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

च नवशरावगन्धव्यञ्जकजलेऽनैकान्तिकत्वमिति वाच्यम् तस्य सक्तुरसाभिव्यञ्जकत्वात् । यद्वा परकीयेति न देयम्, वायूपनीतसुरभिभागस्य दृष्टान्तत्वसंभवात् । नच घ्राणेन्द्रियसन्निकर्षस्य गन्धमात्रव्यञ्जकत्वात् तत्र व्यभिचार इति वाच्यम्, द्रव्यत्वे सतीति विशेषणात् । (विषय इति । उपभोगसाधनं विषयः । सर्वमेव हि कार्यजातमदृष्टाधीनम्, यत्कार्यं यददृष्टाधीनं तत्तदुपभोगं साक्षात्परम्परया वा जनयत्येव । नहि बीजप्रयोजनाभ्यां विना कस्यचिदुत्पत्तिरस्ति । तेन द्व्यणुकादि ब्रह्माण्डान्तं सर्वमेव विषयो भवति । शरीरन्द्रिययोर्विषयत्वेऽपि प्रकारान्तरोपन्यासः शिष्यबुद्धिवैशद्यार्थः) ॥ ३८ ॥

जलं निरूपयति—

वर्णः शुक्लो रसस्पर्शौ जले मधुरशीतलौ ।
स्नेहस्तत्र द्रवत्वं तु सांसिद्धिकमुदाहृतम् ॥ ३९ ॥

स्नेहसमवायिकारणतावच्छेदकतया[1] जलत्वजातिः सिद्ध्यति । यद्यपि स्नेहत्वं नित्याऽनित्यवृत्तितया न कार्यतावच्छेदकं तथापि जन्यस्नेहत्वं तथा बोध्यम् । अथ परमाणौ[2] जलत्वं न स्यात्तत्र जन्यस्नेहाभावात्, नित्यस्य च स्वरूपयोग्यत्वे फलावश्यम्भावनियमादिति चेन्न, जन्यस्नेहजनकतावच्छेदकतया[3] जन्यजलत्वजातेः सिद्धौ, तद-

१—समवायसम्बन्धावच्छिन्नस्नेहत्वावच्छिन्नस्नेहनिष्ठकार्यतानिरूपिता तादात्म्यसंबन्धावच्छिन्ना या कारणता सा किंचिद्धर्मावच्छिन्ना कारणतात्वात्, इत्येवं पृथिवीग्रन्थवद्बोध्यम् । समवायेन स्नेहकार्यं प्रति तादात्म्येन जलं समवायिकारणम्' तदवच्छेदकत्वेन च जलत्वोपपत्तिरित्यर्थः ।

प्रश्नाः—जलग्रन्थे पृथिवीग्रन्थवत् प्रश्नाः स्वयं कल्पनीयाः १

२—यदि स्नेहरूपकार्यं प्रति जलीयपरमाणुषु स्वरूपयोग्यतारूपकारणताऽभिमता तर्हि ततोऽपि कदाचित् फलमवश्यं भविष्यति, परंतु फलं न दृश्यते । तस्मात् स्नेहरूपकार्यस्य समवायिकारणतावच्छेदकमेकमनुगतं जलत्वं न सिध्यतीति शङ्काकर्तुराशयः ।

३—समवायसम्बन्धावच्छिन्नजन्यस्नेहत्वावच्छिन्नजन्यस्नेहनिष्ठकार्यतानिरूपिता तादात्म्यसंबन्धावच्छिन्ना या कारणता सा किंचिद्धर्मावच्छिन्ना कारणतात्वात्, इत्यादि । समवायसम्बन्धावच्छिन्नजन्यजलत्वावच्छिन्नजन्यजलनिष्ठकार्यतानिरूपिता तादात्म्यसम्बन्धावच्छिन्ना या कारणता सा किंचिद्धर्मावच्छिन्ना कारणतात्वात्, इत्याद्यनुमानेन जलत्वजातिः सिध्यति—

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वच्छिन्नजनकतावच्छेदकतया जलत्वजातिसिद्धेः। शुक्लरूपमेव जलस्येति दर्शयितुमुक्तं वर्णः शुक्ल इति। न तु शुक्लरूपवत्त्वं लक्षणम्। अथवा नैमित्तिकद्रवत्ववदवृत्तिरूपवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वम्, अभास्वरशुक्लेतररूपासमानाधिकरणरूपवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं वा तदर्थः। तेन स्फटिकादौ नातिव्याप्तिः। रसस्पर्शाविति। जलस्य मधुर एव रसः शीत एव स्पर्शः। तिक्तरसवदवृत्तिमधुरवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं तदर्थः, तेन शर्करादौ नातिव्याप्तिः। शीतेतरस्पर्शवदवृत्तिस्पर्शवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं तदर्थः। ननु शुक्लरूपवत्त्वमेवेति कुतः, कालिन्दीजलादौ नीलिमोपलब्धेरिति चेन्न, नीलजनकतावच्छेदिकायाः पृथिवीत्वजातेरभावाज्जले नीलरूपासंभवात्। कालिन्दीजले नीलत्वप्रतीतिस्त्वाश्रयौपाधिकी। अत एव वियति विक्षेपे धवलिमोपलब्धिः। अथ जले माधुर्ये किं मानम्, नहि प्रत्यक्षेण कोऽपि रसस्तत्रानुभूयते। नच नारिकेलजलादौ माधुर्यमुपलभ्यत एवेति वाच्यम्, तस्याश्रयौपाधिकत्वात्। अन्यथा जम्बीररसादावम्लाद्युपलब्धेरम्लादिमत्त्वमपि स्यादिति चेन्न, हरीतक्यादिभक्षणस्य जलरसव्यञ्जकत्वात्। नच हरीतक्यामेव जलोष्मसंयोगाद्रसान्तरोत्पत्तिरिति वाच्यम्, कल्पनागौरवात्। पृथिवीत्वस्याम्लादिजनकताव-

---

—अत्र—स्नेहत्वस्य कार्यतावच्छेदकत्वे परमाणुषु कार्यस्नेहस्याभावादव्याप्तिः स्यात्। अवच्छेदको धर्मश्च स एव भवति यो न न्यूनवृत्तिर्नाप्यधिकवृत्तिः यथा—गोवृत्तिः (शक्यता—) अवच्छेदको धर्मो गोत्वम्, स च कपिलगवादिषु सर्वत्र वर्त्तते, नतु अश्वादिषु अधिकेनच न्यूने। नीलशृङ्गित्वं तु नीलगवि वर्त्तमानमपि न श्वेतगवि व्याप्तं भवति, नीलमहिषादिषु च वर्त्तते अतो न तदवच्छेदकम्, (अधिकदेशवृत्तित्वात्) एवमेव स्नेहत्वमपि जन्यजले वर्त्तमानं, परमाणुजले चावर्त्तमानं सत् न कार्यतावच्छेदकम् इत्याक्षेप्तुराशयः। तत्समाधानाय—"समवायसम्बन्धावच्छिन्ने" त्यनुमानं दर्शितम्।

प्रश्नाः—जलत्वजातिसिद्धिप्रकारं पूर्वपक्षस्फोटनपूर्वकं सम्यक् स्पष्टीकुरु ?

१—आम्लादिनिष्ठा या जन्यता, तादृशजन्यतानिरूपिता या जनकता=समवायिकारणता तस्या अवच्छेदकत्वात् पृथिवीत्वस्येत्यर्थं।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

च्छेदकत्वाच्च जले नाम्लादिकम्। जम्बीररसादौ * स्वाश्रयौपाधिकी तथा प्रतीतिः। एवं जन्यशीतस्पर्शजनकतावच्छेदकं जन्यजलत्वं तदवच्छिन्नजनकतावच्छेदकं तु जलत्वं बोध्यम्। घृष्टचन्दनादौ तु शैत्योपलब्धिश्चन्दनान्तर्वर्तिशीततरसलिलस्यैव। तेजःसंयोगाज्जले उष्णप्रतीतिरौपाधिकी स्फुटैव, तत्र पाकासम्भवात्। स्नेहस्तत्रेति। घृतादावपि तदन्तर्वर्तिजलस्यैव स्नेहः, जलस्य स्नेहसमवायिकारणत्वात्, तेन जल एव स्नेह इति मन्तव्यम्। द्रवत्वमिति। सांसिद्धिकद्रवत्वत्वं जातिविशेषः प्रत्यक्षसिद्धः[1]। तदवच्छिन्नजनकतावच्छेदकमपि तदेवेति भावः[2]। तैलादावपि जलस्यैव द्रवत्वं स्नेहप्रकर्षेण च दहनानुकूल्यमिति वक्ष्यति॥ ३९॥

नित्यतादि प्रथमवत् किन्तु देहमयोनिजम्।

इन्द्रियं रसनं सिन्धुहिमादिर्विषयो मतः॥ ४०॥

प्रथमवदिति। पृथिव्या इवेत्यर्थः। तथाहि—जलं द्विविधं नित्यमनित्यं च। परमाणुरूपं नित्यं द्व्यणुकादिकं सर्वमनित्यमवयवसमवेतं च। अनित्यमपि त्रिविधं शरीरेन्द्रियविषयभेदात्। पृथिवीतो यो विशेषस्तमाह। किन्त्विति। देहमयोनिजम्, अयोनिजमेवेत्यर्थः। जलीयं शरीरं वरुणलोके प्रसिद्धम्। इन्द्रियमिति। जलीयमित्यर्थः। तथाहि—रसनं जलीयं गन्धाद्यव्यञ्जकत्वे सति रसव्यञ्जकत्वात्[3],

---

* आश्रयौपाधिकी = स्वसमवायिसंयोगसम्बन्धेनोपाधिनिबन्धनैव नतु वास्तविकी। 'स्व' पदेनाम्लादिरसो गृह्यते, तस्य समवायि पृथिवीद्रव्यम्, तस्य संयोगो जले इत्येवं परम्परासम्बन्धेनेत्यर्थः।

१—प्रत्यक्षसिद्धः=संयुक्तसमवायसन्निकर्षेण चाक्षुषप्रत्यक्षसिद्धः इत्यर्थः।

२—स्वाभाविकद्रवत्वत्वावच्छिन्नजन्यतानिरूपितजनकताया अवच्छेदकमपि जन्यजलत्वरूपा जातिरेवेत्यर्थः।

प्रश्नाः—जले माधुर्ये किं मानम्? कथञ्च तदुपपत्तिः? रसनेन्द्रियस्य जलीयत्वसाधनप्रकारं स्पष्टं ब्रूत? तैलादौ द्रवत्वे सति कथं न तेन दहनस्योपशमो भवति?

३—रूपादिषु पञ्चसु मध्ये रसस्यैवाभिव्यञ्जकत्वादिति निष्कर्षः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सक्तुरसाभिव्यञ्जकोदकवत्[1] । रसनेन्द्रियसन्निकर्षे व्यभिचारवारणाय[2] द्रव्यत्वं देयम् । विषयं दर्शयति । सिन्धुहिमादिरिति । सिन्धुः समुद्रः । हिमं तुषारः । आदिपदात्सरित्कासारकरकादिः सर्वोऽपि ग्राह्यः । नच हिमकरकयोः कठिनत्वात्पार्थिवत्वमिति वाच्यम्, ऊष्मणा विलीनस्य तस्य जलत्वस्य प्रत्यक्षसिद्धत्वात् । *यद्द्रव्यं यद्द्रव्यध्वंसजन्यमिति व्याप्तेर्जलोपादानोपादेयत्वासिद्धेः । अदृष्टविशेषेण वा द्रवत्वप्रतिरोधात् । करकादीनां काठिन्यप्रत्ययस्य भ्रान्तित्वात्[3] ॥४०॥

तेजो निरूपयति—

उष्णः स्पर्शस्तेजसस्तु स्याद्रूपं शुक्लभास्वरम् ।
नैमित्तिकं द्रवत्वं तु नित्यतादि च पूर्ववत् ॥ ४१ ॥

उष्णत्वं स्पर्शनिष्ठो जातिविशेषः प्रत्यक्षसिद्धः । इत्थं च जन्योष्णस्पर्शसमवायिकारणतावच्छेदकं[4] तेजस्त्वं जातिविशेषः । तस्य परमाणुवृत्तित्वं तु जलत्वस्येवानुसन्धेयम् । नचोष्णस्पर्शवत्त्वं चन्द्रकिरणादावव्याप्तमिति वाच्यम् तत्राप्युष्णत्वस्य सत्त्वात् । किन्तु

१—सक्तुरसेति—यदा जले सक्तवो मिश्रीक्रियन्ते तदा तत् जलं सक्तुगतानां गन्धादीनां नोद्बोधकं भवति किन्तु रसमात्रव्यञ्जकं तद्वदित्यर्थः ।

२—व्यभिचारः = साध्याभाववद्वृत्तित्वम् । तथाच—हेतोर्व्यभिचारवारणाय "द्रव्यत्वे सति गन्धाद्यव्यञ्जकत्वे च सति रसव्यञ्जकत्वात्" इति पठनीयमिति भावः ।

* अत्रैवं योज्यम्—यद्द्रव्यम् = जलद्रव्यम्, यद्द्रव्यध्वंसजन्यम् = हिमकरकादिद्रव्यध्वंसजन्यम् इति व्याप्तेः = हिमादिनिष्ठोपादानतोपादेयताया जलनिष्ठत्वात् करकादिषु जलत्वोपपत्तेरित्यभिप्रायः ।

३—अन्यस्मिन् अन्या बुद्धिर्भ्रान्तिः ।

४—जन्योष्णस्पर्शनिष्ठा या कार्यता, तादृशकार्यतानिरूपिता या समवायिकारणता तदवच्छेदकं तेजस्त्वं जातिरित्यर्थः । अत्रापि—यद्यपि तेजःपरमाणुषु जन्योष्णत्वं नास्ति तथापि जन्योष्णस्पर्शनिष्ठजन्यतानिरूपितजनकतावच्छेदकत्वरूपेण जन्यतेजस्त्वजातिसिद्धौ जन्यतेजस्त्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकत्वरूपेण शुद्धतेजस्त्वजातिसिद्धिरिति भावः ।

प्रश्नाः—करकादिषु काठिन्यात् कुतो न पार्थिवत्वम् ? तेजसः किं लक्षणम् ? तेजस्त्वजातिसाधने का युक्तिः ? परमाणुषु जन्योष्णस्पर्शाभावात् कथं तत्र तेन तेजस्त्वं सिद्ध्येत् ? रत्नकिरणादावुष्णस्पर्शप्रतीतौ किं बाधकम् ?

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तदन्तःपातिजलस्पर्शेना†भिभवादग्रहः। एवं रत्नकिरणादौ पार्थिवस्पर्शेनाभिभवाच्चक्षुरादौ चानुद्भूतत्वादग्रहः। रूपमित्यादि। वैश्वानरे मरकतकिरणादौ च पार्थिवरूपेणाभिभवाच्छुक्लरूपाग्रहः। ननु तद्रूपाग्रहे धर्मिणोऽपि चाक्षुषत्वं न स्यादिति चेन्न, अन्यदीयरूपेणापि धर्मिणो ग्रहसम्भवात्, शङ्खस्येव पित्त¹पीतिम्ना। वह्नेस्तु शुक्लरूपं नाभिभूतं किन्तु तदीयं शुक्लत्व²मभिभूतमित्यन्ये। नैमित्तिकमिति। सुवर्णादिरूपे तेजसि तत्सत्वात्। नच नैमित्तिकद्रवत्वं दहनादावव्याप्तं घृतादावतिव्याप्तं चेति वाच्यम्, पृ³थिव्यवृत्तिनैमित्तिकद्रवत्ववद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वस्य विवक्षितत्वात्। पूर्ववदिति। जलस्येवेत्यर्थः। तथाहि—तत् द्विविधं नित्यमनित्यं च। नित्यं परमाणुरूपं, तदन्यदनित्यम्। अवयवि च। तच्च त्रिधा, शरीरेन्द्रियविषयभेदात्। शरीरमयोनिजमेव। तच्च सूर्यलोकादौ प्रसिद्धम्॥ ४१॥

अत्र यो विशेषस्तमाह—

इन्द्रियं नयनं वह्निस्स्वर्णादिर्विषयो मतः।

ननु—चक्षुषस्तैजसत्वे किं मानमिति चेत्? चक्षुस्तैजसं परकीयस्पर्शाद्यव्यञ्जकत्वे सति परकीयरूपव्यञ्जकत्वात् प्रदीपवत्। प्रदीपस्य स्वीयस्पर्शव्यञ्जकत्वादत्र दृष्टान्तेऽव्याप्तिवारणाय प्रथमं परकीयेति। घटादेः स्वीयरूपव्यञ्जकत्वाद्व्यभिचारवारणाय द्वितीयं परकीयेति।

---

† बलवत्सजातीयसम्बन्धोऽभिभवः। यथा सुवर्णरूपस्याऽभिभवः। तदुक्तम्—"भूसंसर्गवशाच्चन्यरूपं नैव प्रकाशते" इति।

१—यथा पित्तदोषदूपितचक्षुष्मतः पुरुषस्य श्वेतोऽपि शङ्खः पीतो भाति तत्र शंखस्य पित्तगतपीतरूपेण ग्रहोऽनुभवसिद्धः तद्वदित्यर्थः।

२—स्वसमवायि-समवायि-संयुक्त-समवेततत्वसम्बन्धेन पीतत्वजात्या शुक्लत्वमभिभूतमिति प्राचीना **प्रभा**।

३—**पृथिव्यवृत्तीति**—पृथिव्यां न वृत्तिर्यस्याः सा, नैमित्तिकद्रवत्ववति वृत्तिर्यस्याः सा चासौ द्रव्यत्वस्य साक्षाद्व्याप्या जातिः तेजस्त्वरूपा, तद्वत्त्वस्य विवक्षितत्वात् न तत्र तत्राऽव्याप्त्यतिव्याप्ती स्त इति भावः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अथवा प्रभाया दृष्टान्तत्वसंभवादाद्यं परकीयेति न देयम्। चक्षुःसन्निकर्षे व्यभिचारवारणाय द्रव्यत्वं देयम्। विषयं दर्शयति। वह्निरिति। ननु सुवर्णस्य तैजसत्वे किं मानमिति चेन्न। सुवर्णं तैजसम् असति प्रतिबन्धके अत्यन्तानलसंयोगेऽप्यनुच्छिद्यमानजन्यद्रवत्वात् यन्नैवं तन्नैवम्, यथा पृथिवीति। न चाप्रयोजकं, पृथिवीद्रवत्वस्य जन्यजलद्रव्यत्वस्य चात्यन्ताग्निसंयोगनाश्यत्वात्। ननु पीतिमगुरुत्वाश्रयस्य पार्थिवभागस्यापि तदानीं द्रुतत्वात्तेन व्यभिचार इति चेन्न, जलमध्यस्थमषीचोदवत्तस्याद्रुतत्वात्। अपरे तु पीतिमाश्रयस्य अत्यन्ताग्निसंयोगेऽपि पूर्वरूपापरावृत्तिदर्शनात्तत्प्रतिबन्धकं विजातीयद्रवद्रव्यं कल्प्यते। तथाहि–अत्यन्ताग्निसंयोगे पीतिमगुरुत्वाश्रयः विजातीयरूपप्रतिबन्धकद्रवद्रव्यसंयुक्तः, अत्यन्ताग्निसंयोगे सत्यपि पूर्वरूपविजातीयरूपानधिकरणत्वात्, जलमध्यस्थपीतपटवत्। तस्य च पृथिवीजलभिन्नस्य तेजस्त्वनियमात्।

वायुं निरूपयति–

अपाकजोऽनुष्णाशीतस्पर्शस्तु पवने मतः ॥४२॥
तिर्यग्गमनवानेष ज्ञेयः स्पर्शादिलिङ्गकः।
पूर्ववन्नित्यताद्युक्तं देहव्यापि त्वगिन्द्रियम् ॥४३॥

१—चक्षुर्घटादीनां संयोगसन्निकर्षे इत्यर्थः।

२—चन्द्रकान्तमणिरूपप्रतिबन्धकसत्त्वेऽत्यन्तप्रज्वलितेनापि वह्निना पृथिव्या जलस्य च द्रवत्वं नाशयितुं न शक्यते अतस्तत्राप्यतिव्याप्तिः (तैजसत्वप्रसङ्गः) स्यात् अत उक्तम्—"असति प्रतिबन्धके इति।

३—पूर्वोक्तमनुमानमप्रयोजकम्, अर्थात्—अनुकूलतर्करहितम्, अतः—सुवर्णस्य तैजसत्वे न साधकमिति चेन्न। घृतलाक्षादिपृथ्व्यां जन्यजले च यद् द्रवत्वमस्ति तदग्निसंयोगान्नश्यति सुवर्णद्रवत्वं न नश्यति स एवानुकूलतर्कः।

प्रश्नः—सुवर्णस्य तैजसत्वं साधय ?

४—सुवर्णस्य तैजसत्वे मतान्तरमाह—अपरेत्विति।

५—जलमध्यस्थेति—जलपूर्णपात्रमध्यस्थापितपीते पटेऽनलसंयोगे सत्यपि विजातीयरूपाऽदर्शनादिति भावः।

६—निरूपयति=लक्षयतीत्यर्थः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अनुष्णाशीतस्पर्शस्य पृथिव्यामपि सत्त्वादुक्तमपाकज इति । अपाकजस्पर्शस्य जलादावपि सत्त्वादुक्तमनुष्णाशीत इति । तेन वायवीयो विजातीयः स्पर्शो दर्शितः । तज्जनकतावच्छेदकं वायुत्वमिति भावः । एष वायुः स्पर्शादिलिङ्गकः । वायुर्हि स्पर्शशब्दधृतिकम्पैरनुमीयते विजातीयस्पर्शेन विलक्षणशब्देन तृणादीनां धृत्या शाखादीनां कम्पेन च वायोरनुमानात् । यथाच वायोर्न प्रत्यक्षं तथाग्रे* वक्ष्यते। पूर्ववदिति। वायुर्द्विविधो नित्योऽनित्यश्च। परमाणुरूपो नित्यस्तदन्योऽनित्योऽवयवसमवेतश्च । सोऽपि त्रिविधः, शरीरेन्द्रियविषयभेदात् । तत्र शरीरमयोनिजं पिशाचादीनाम् । परन्तु जलीयतैजसवायवीयशरीराणां पार्थिवभागोपष्टम्भादुपभोगक्षमत्वं जलादीनां प्राधान्याज्जलीयत्वादिकमिति । अत्र यो विशेषस्तमाह । देहव्यापीति । शरीरव्यापकं स्पर्शग्राहकमिन्द्रियं त्वक् । तच्च वायवीयं रूपादिषु मध्ये स्पर्शस्यैवाभिव्यञ्जकत्वात्—† अङ्गसङ्गिसलिलशैत्याभिव्यञ्जकव्यजनपवनवत् ॥ ४२ ॥ ४३ ॥

विषयं दर्शयति—

प्राणादिस्तु महावायुपर्यन्तो विषयो मतः ।

यद्यप्यनित्यो वायुश्चतुर्विधः तस्य चतुर्थी विधा प्राणादिरित्युक्तमाकरे, तथापि संक्षेपादत्र त्रैविध्यमुक्तम् । प्राणस्त्वेक एव

१—विलक्षणतेजःसंयोगः पाकः । तस्मात् जातः पाकजः । न पाकजोऽपाकजः । अनुष्णाशीतः=अव्यक्तशीतोष्णः पार्थिवजलीयस्पर्शाभ्यां विजातीय इत्यर्थः । "अपाकजाऽनुष्णाशीतस्पर्शवत्त्वं वायोर्लक्षणम्" इत्यर्थः ।

२—विलक्षणस्पर्शनिष्ठजन्यतानिरूपितजनकतावच्छेदकतया वायुत्वजातिसिद्धिरित्यर्थः ।

* अग्रे—"रूपमत्रापि कारणम्"—इत्यादिकारिकाव्याख्यानावसरे ।

३—एतच्च वायुलोके प्रसिद्धम् । ननु—तच्छरीरस्य वायुत्वे किंमानमिति चेन्न, वायुत्वं शरीरसमवेतं परमाणुसमवेतजातित्वात् पृथिवीत्ववदित्यनुमानस्यैव प्रमाणत्वादिति प्राञ्ची नृसिंही ।

† यथा व्यजनपवनः शरीरसंबन्धिस्वेदरूपजलगतशैत्यस्य व्यञ्जको नान्यस्येति भावः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

हृदादिनानास्थानवशान्मुखनिर्गमादिनानाक्रियावशाच्च नानासंज्ञां लभत इति।

आकाशं निरूपयति—

आकाशस्य तु विज्ञेयः शब्दो वैशेषिको गुणः ॥४४॥

आकाशकालदिशामेकैकव्यक्तित्वादाकाशत्वादिकं न जातिः। किंतु आकाशत्वं शब्दाश्रयत्वम्। वैशेषिके[2] इति कथनं तु विशेषगुणान्तरव्यवच्छेदाय[3]। एतेन प्रमाणमपि दर्शितम्। तथाहि—शब्दो विशेषगुणः चक्षुर्ग्रहणाऽयोग्यबहिरिन्द्रियग्राह्यजातिमत्त्वात् स्पर्शवत्। शब्दो द्रव्यसमवेतो गुणत्वात् संयोगवत्—इत्यनुमानेन शब्दस्य द्रव्यसमवेतत्वे सिद्धे, शब्दो न स्पर्शवद्विशेषगुणः अग्निसंयोगाऽसमवायिकारणकत्वाभावे सत्यकारणगुणपूर्वकप्रत्यक्षत्वात् सुखवत्। पाकजरूपादौ व्यभिचारवारणाय सत्यन्तम्। पटरूपादौ व्यभिचारवारणायाऽकारणगुणपूर्वकेति। जलपरमाणुरूपादौ व्यभिचारवारणाय प्रत्यक्षेति। शब्दो न दिक्कालमनसां गुणः विशेषगुणत्वात्। नात्मविशेषगुणो बहिरिन्द्रियग्राह्यत्वाद्रूपवत्। इत्थं च शब्दा-

---

प्रश्नाः—वायुलक्षणादिकं प्रपञ्चयित्वा वायुत्वजातिसिद्धिप्रकारं लिखत ?

१—'हृदि प्राणो गुदेऽपानः समानो नाभिसंस्थितः।
उदानः कण्ठदेशे स्याद्व्यानः सर्वशरीरगः॥'

इति स्थानभेदान्नाना संज्ञां भजते इत्यर्थः।

२—विशेष एव वैशेषिकः 'विनयादिभ्यष्ठक्' (५।४।३४) इति सूत्रेण स्वार्थे ठक्।

३—व्यवच्छेदोऽभावबोधनम्। एवञ्च—शब्दगुणकत्वमाकाशस्य लक्षणं फलति।

४—अनेनानुमानेन परिशेषानुमाने विशेष्याभावप्रयुक्तां स्वरूपाऽसिद्धिं परिहरति, अन्यैस्तु विशेषणाभावप्रयुक्तामिति ज्ञेयम्।

५—स्पर्शवन्तः=पृथिव्यप्तेजोवायवः।

६—लौकिकविषयतासम्बन्धेनेन्द्रियग्राह्यत्वे सति द्वीन्द्रियग्रहणाऽयोग्यत्वे सति च गुणत्वव्याप्यजातिमत्त्वं विशेषगुणत्वम्।

प्रश्नाः—आकाशस्य किं लक्षणम् ? शब्दस्य विशेषगुणत्वस्थापनप्रकारः कीदृशः ? कथञ्चाकाशस्य सिद्धिः ?

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

धिकरणं नवमं द्रव्यं गगननामकं सिध्यति । नच वाय्ववयवेषु सूक्ष्मशब्दक्रमेण वायौ कारणगुणपूर्वकः शब्द उत्पद्यतामिति वाच्यम्, अयावद्द्रव्यभावित्वेन वायुविशेषगुणत्वाभावात् ॥ ४४ ॥

तत्र शरीरस्य विषयस्य चाभावादिन्द्रियं दर्शयति—

इन्द्रियं तु भवेच्छ्रोत्रमेकः सन्नप्युपाधितः ।

नन्वाकाशं लाघवादेकं सिद्धं श्रोत्रं तु पुरुषभेदेन भिन्नं कथमाकाशं स्यादिति चेत्तत्राह । एकः सन्नपीत्यादि । आकाश एक एव सन्नपि उपाधेः कर्णशष्कुल्यादेर्भेदाद्भिन्नं श्रोत्रात्मकं भवतीत्यर्थः ।

कालं निरूपयति—

जन्यानां जनकः कालो जगतामाश्रयो मतः ॥ ४५ ॥

तत्र प्रमाणं दर्शयितुमाह । जगतामिति । तथाहि । इदानीं घट इत्यादिप्रतीतिः सूर्यपरिस्पन्दादिकं यदा विषयीकरोति तदा सूर्यपरिस्पन्दादिना घटादेः सम्बन्धो[2] वाच्यः । स च सम्बन्धः संयोगादिर्न सम्भवतीति काल एव तत्सम्बन्धघटकः कल्प्यते । इत्थं च तस्याश्रयत्वमपि सम्यक् ।

प्रमाणान्तरं दर्शयति—

परापरत्वधीहेतुः क्षणादिः स्यादुपाधितः ।

परत्वापरत्वबुद्धेरसाधारणं निमित्तं काल एव । परत्वापरत्वयोरसमवायिकारण[3]संयोगाश्रयो लाघवादतिरिक्तः काल एव कल्प्यत[4] इति

१—स्वाश्रयद्रव्यस्थितिकालस्थितिकत्वं यावद्द्रव्यभावित्वम्, तद्भिन्नमयावद्द्रव्यभावित्वम्, अर्थात् आश्रयद्रव्यनाशात् जायमानो यो नाशः = ध्वंसः तदप्रतियोगित्वम् ।

२—स च सम्बन्धः स्वाश्रयतपनसंयोगिसंयोगरूप एव । स्वपदेन सूर्यस्य क्रिया गृह्यते तदाश्रयः सूर्यः—तत्संयोगी कालः—तस्य घटादिभिः सह संयोगरूपः सम्बन्धः ।

३—असमवायिकारणं कालपिण्डसंयोगः ।

४—कल्प्यते = अनुमीयते, तत्प्रकारश्चायम्—"इदं शरीरं बहुतरसूर्यक्रियाविशिष्टमिति ज्ञानं परम्परासम्बन्धसापेक्षं भवितुमर्हति साक्षात्सम्बन्धबाधे सति परम्परासम्बन्धघटकत्वात् लोहितकुसुमसम्बन्धिस्फटिकवत् । किंवा—परत्वापरत्वयोरसमवायिकारणसंयोगः पृथिव्याद्यष्टद्रव्यातिरिक्त-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भावः । नन्वेकस्य कालस्य सिद्धौ क्षणदिनमासवर्षादिसमयभेदो न स्यादत आह । क्षणादिरिति । कालस्त्वेकोऽपि उपाधिभेदात्क्षणादिव्यवहारविषयः । उपाधिस्तु [1]स्वजन्यविभागप्रागभावावच्छिन्नं कर्म, पूर्वसंयोगावच्छिन्नविभागो वा, पूर्वसंयोगनाशावच्छिन्नोत्तरसंयोगप्रागभावो वा, उत्तरसंयोगावच्छिन्नं कर्म वा । नचोत्तरसंयोगानन्तरं क्षणव्यवहारो न स्यादिति वाच्यम् [2]कर्मान्तरस्यापि सत्त्वादिति । महाप्रलये क्षणादिव्यवहारो यद्यस्ति तदानायत्या [3]ध्वंसेनोपपादनीय इति । दिनादिव्यवहारस्तु [4]तत्तत्क्षणकूटैरेवेति ।

दिशं निरूपयति—

दूरान्तिकादिधीहेतुरेका नित्या दिगुच्यते ॥ ४६ ॥

दूरत्वमन्तिकत्वं च [5]दैशिकं परत्वमपरत्वं बोध्यम् । तद्बुद्धेरसाधारणं बीजं दिगेव । दैशिकपरत्वापरत्वयोरसमवायिकारणं[6]संयोगाश्रयतया

द्रव्याश्रितः पृथिव्याद्यष्टद्रव्यानाश्रितत्वे सति द्रव्याश्रितत्वात् ” इति । प्रपञ्चो मत्प्रणीतमुक्तावलीप्रभायां द्रष्टव्यः ।

प्रश्नाः—कालस्य सिद्धौ किं मानम् ? किञ्च—तल्लक्षणम् ? एकस्यापि कालस्य क्षणादिभेदे किं बीजम् ? इति सुस्पष्टं व्याख्यातव्यम् ।

१—'स्व' शब्देन सूर्यादिनिष्ठक्रियाग्रहणम् तज्जन्यो यो विभागः, तस्य यः प्रागभावः, तदवच्छिन्नं यत् कर्म, सः प्रथमक्षणोपाधिरित्यर्थः । द्वितीयक्षणोपाधिमाह—पूर्वसंयोगेति । तृतीयक्षणोपाधिमाह—पूर्वसंयोगनाशेति । चतुर्थक्षणोपाधिमाह—उत्तरसंयोगावच्छिन्नमिति ।

२—पूर्वकर्मसमाप्त्युत्तरं तत्रैव मूर्त्तद्रव्ये तद्व्यवहारनियामककर्मान्तरस्यापि सद्भावात् न पञ्चमादिक्षणाऽनुपपत्तिरिति भावः ।

३—ध्वंसेन=तत्तत्पदार्थानां ध्वंसाभावरूपोपाधिनेत्यर्थः ।

४—तत्तत्क्षणसंघातैरित्यर्थः ।

५–विप्रकृष्टदैशिकं=दिक्कृतं परत्वम् । सन्निकृष्टे दिक्कृतमपरत्वमित्यर्थः । तद्बुद्धेरिति–दैशिकपरत्वापरत्वबुद्धेरित्यर्थः । एकत्र दिश्यवस्थितयोः समीपस्थं पुरुषादिकमवधिं कृत्वा 'अयमस्माद् दूर' इति यज्ज्ञानं तस्याऽसाधारणं निमित्तं यत् सैव दिशेत्यर्थः ।

६—पिण्डपरदिक्संयोगः तदाश्रयतया=समवायसम्बन्धेन । दैशिकपरत्वापरत्वप्रकारकबुद्धिनिष्ठकार्यतानिरूपितकारणता परत्वाऽपरत्वनिष्ठाऽस्तीत्याशयः । इदन्तु बोध्यम्—कालः क्रियामात्रोपनायकत्वान्न संयोगोपनायकः, दिक् तु पूर्वापरादिधीसंयोगोपनायिकेत्यत एव सा इतरेभ्यो भिन्नेति केचित् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

लाघवादेका दिक् सिध्यतीति भावः ॥ ४६ ॥

नन्वेकैव दिक् तदा प्राचीप्रतीच्यादिव्यवहारः कथमुपपद्यता-मित्यत आह—

उपाधिभेदादेकापि प्राच्यादिव्यपदेशभाक् ।

यत्पुरुषस्य उदयगिरिसंनिहिता या दिक् सा तस्य प्राची। एवमुदयगिरिव्यवहिता या दिक् सा प्रतीची। एवं यत्पुरुषस्य सुमेरु-सन्निहिता या दिक् सोदीची। तद्व्यवहिता त्ववाची। "सर्वेषामेव वर्षाणां मेरुरुत्तरतः स्थितः" इति नियमात्।

आत्मानं निरूपयति—

आत्मेन्द्रियाद्यधिष्ठाता करणं हि सकर्तृकम् ॥ ४७ ॥

आत्मेन्द्रियाद्यधिष्ठातेति। आत्मत्वजातिस्तु सुखदुःखादिसमवा-यिकारणतावच्छेदकतया सिद्ध्यति। ईश्वरेऽपि सा जातिरस्त्येव। अदृष्टादिरूपकारणाभावान्न सुखदुःखाद्युत्पत्तिः। नित्यस्य स्वरूप-योग्यत्वे फलावश्यम्भाव इति नियमस्याप्रयोजकत्वात्। परे त्वीश्वरे सा जातिर्नास्त्येव प्रमाणाभावात्। नच दशमद्रव्यत्वापत्तिः, ज्ञान-वत्त्वेन विभजनादित्याहुः। इन्द्रियादीति। इन्द्रियाणां शरीरस्य च परंपरया चैतन्यसंपादकः। यद्यप्यात्मनि "अहं जाने अहं सुखी" इत्यादिप्रत्यक्षविषयत्वमस्त्येव तथापि विप्रतिपन्नं प्रति प्रथमत एव शरीरादिभिन्नस्तत्प्रतीतिगोचर इति प्रतिपादयितुं न शक्यत इत्यतः प्रमाणान्तरं दर्शयति—करणमिति। कुठारादीनां छिदा-

---

१—अत्र पुरुषपदं पदार्थमात्रोपलक्षकम्।

उदयाचलसन्निहितमूर्त्तावच्छिन्नादिक् प्राची। अस्ताचलसन्निहितमूर्त्तावच्छिन्ना दिक् प्रतीची। सुमेरुसन्निहितमूर्त्तावच्छिन्ना दिक् उदीची। सुमेरुव्यवहितमूर्त्तावच्छिन्ना दिक् अवाची=दक्षिणेत्यर्थः।

२—इन्द्रियाणां जनकतासम्बन्धेन शरीरस्य अवच्छेदकतासम्बन्धेन चैतन्यसम्पादकः=ज्ञानवत्त्वसम्पादकः। एतेन आत्मनि प्रमाणं दर्शितम्—'अचेतनं चेतनाधिष्ठितं सदेव कार्यं करोति' इति व्याप्तेः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

दिकरणानां कर्तारमन्तरेण फलानुपधानं दृष्टम् । एवं चक्षुरादीनां ज्ञानकरणानां फलोपधानमपि कर्तारमन्तरेण नोपपद्यत इत्यतिरिक्तः कर्ता कल्प्यते ॥ ४७ ॥

ननु शरीरस्यैव कर्तृत्वमस्त्वत आह—

[3]शरीरस्य न चैतन्यं मृतेषु व्यभिचारतः ।
तथात्वं चेदिन्द्रियाणामुपघाते कथं स्मृतिः ॥ ४८ ॥

[4]ननु चैतन्यं ज्ञानादिकमेव मुक्तात्मनां त्वन्मत इव मृतशरीराणामपि तदभावे का क्षतिः, प्राणाभावेन ज्ञानाभावस्य सिद्धेरिति चेन्न, शरीरस्य चैतन्ये [5]बाल्ये विलोकितस्य [6]स्थाविरे स्मरणानुपपत्तेः, शरीराणामवयवोपचयापचयैरुत्पादविनाशशालित्वात् । नच पूर्वशरीरोत्पन्नसंस्कारेण द्वितीयशरीरे संस्कार उत्पद्यत इति वाच्यम्, अनन्तसंस्कारकल्पने गौरवात् । एवं शरीरस्य चैतन्ये बालकस्य स्तन्यपाने प्रवृत्तिर्न स्यात्, इष्टसाधनताज्ञानस्य तद्धेतुत्वात्तदानी-

---

१—फलं द्वैधीभावः छिदात्मकः तस्य अनुपधानम्=अनुत्पादः ।

२—कल्पनाप्रकारश्चायम्—'इन्द्रियाणि सकर्तृकाणि करणत्वात् कुठारवत्' इति । एवञ्च यः करणानामिन्द्रियाणां प्रयोक्ता स आत्मेति भावः ।

३—देहात्मवादिचार्वाकमतमुत्थाप्य खण्डयति—'**शरीरस्य**' इति ।

४—चार्वाकः । शङ्कते—'ननु' इति । अस्यायमाशयः—ज्ञानेच्छादीनि यथा तव नैयायिकस्य मते मुक्तात्मनि न भवन्ति मुक्तावस्थायां शरीरादिसम्बन्धाभावात् तथा मन्मतेऽपि मृतशरीरेषु ज्ञानाद्यभाव इति समः समाधिः, अतो न मत्पक्ष एव दोष उद्भावनीयः । नैयायिकः समाधत्ते—शरीरस्येति ।

५—बाल्ये=शैशवे ।

६—स्थाविरे=वार्द्धक्ये । **स्मरणाऽनुपपत्तेरिति**—'यस्याऽनुभवः तस्यैव स्मरणम्' इति नियमात् । यदि शरीरमात्मा स्यात् तर्हि बाल्यानुभूतं वार्द्धक्ये न स्मर्येत द्वयोः शरीरयोर्भिन्नत्वादिति भावः ।

७—पूर्वशरीरोत्पन्नसंस्कारनिष्ठजनकतानिरूपितोत्तरशरीरसंस्कारनिष्ठजन्यतास्वीकार इत्यर्थः ।

८—तद्धेतुत्वात्=स्तन्यपानप्रवृत्तिकारणत्वात् ।

प्रश्नाः—आत्मनः किं लक्षणम् ? आत्मत्वजातौ किं मानम् ? ईश्वरे सा जातिरस्ति नवा ? अस्ति चेत् जीववत् तत्र सुखदुःखाद्युत्पत्तिः कुतो न ? नास्ति चेत्तर्हि दशमद्रव्यस्वीकारापत्तिः कथं परिहार्या ?—

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मिष्टसाधनतास्मारकाभावात्। मन्मते तु जन्मान्तरानुभूतेष्टसाधनत्वस्य तदानीं स्मरणादेव प्रवृत्तिः। [1]नच जन्मान्तरानुभूतमन्यदपि स्मर्यतामिति वाच्यम्, [2]उद्बोधकाभावात्। [3]अत्र त्वनायत्या [4]जीवनादृष्टमेवोद्बोधकं कल्प्यते। इत्थं च संसारस्यानादितया आत्मनोऽनादित्वसिद्धावनादिभावस्य नाशासंभवान्नित्यत्वं सिद्ध्यतीति बोध्यम्। [5]ननु चक्षुरादीनामेव ज्ञानादिकं प्रति करणत्वं [6]कर्तृत्वं चास्तु [7]विरोधे साधकाभावादत आह—तथात्वमिति। चैतन्यमित्यर्थः। उपघाते नाशे सति अर्थाच्चक्षुरादीनामेव। कथमिति। पूर्वं चक्षुषा साक्षात्कृतानां चक्षुषोऽभावे स्मरणं न स्यात्। [8]अनुभवितुरभावात्। [9]अन्यदृष्टस्यान्येन स्मरणासंभवात्। अनुभवस्मरणयोः [10]सामानाधिकरण्येन कार्यकारणभावादिति भावः ॥ ४८ ॥

—चार्वाकमतस्य कथमुत्थानम्? तत्परिहारश्च कथम्? अनुभवस्मृत्योः समानाधिकरण्यं वैयाधिकरण्यं वा? अन्यतरस्मिन् पक्षे का युक्तिः?

१ स्तन्यपानप्रवृत्तिहेतुभूतेष्टसाधनताज्ञानवत् अन्यत्रापि इष्टसाधनताज्ञानपूर्वकं स्मृतिद्वारा प्रवृत्तिः स्यादिति शङ्काकर्तुराशयः।

२—उत्तरमाह—"उद्बोधकाभावात्" इति। यद्यपि स्मृतौ पूर्वानुभवः कारणम् तथापि उद्बोधके सहकारिणि स्मृतिर्जायते नत्वन्यथेति भावः।

३—अत्र=प्रकृते इष्टसाधनत्वस्मारकसंस्कारेत्वित्यर्थः। अनायत्या=अगतिकगत्या। अन्यथा शिशुर्न जीवेदिति भावः।

४—जीवनादृष्टमेवेति। अन्यथा बालस्य शुष्ककण्ठतया मरणापत्तिरिति भावः कल्प्यते=अनुमीयते। तत्प्रकारश्चायम्—बालस्य स्तन्यपानप्रवृत्तिहेतुभूतसंस्कारः स्वोद्बोधककारणान्तरसापेक्षो भवितुमर्हति संस्कारत्वात् चैत्रीयभोजनप्रवृत्तिहेतुभूतसंस्कारवत्"। तच्चोद्बोधकं दृष्टाभावेऽदृष्टमेव। अन्यथा बालस्य मरणं स्यादित्यवाचोम।

५—इन्द्रियात्मवादी शङ्कते—"ननु" इति।

६—ज्ञानादिनिरूपितव्यापारसम्बन्धावच्छिन्नकारणत्वमित्यर्थः। कर्तृत्वम्=कृत्याश्रयत्वमित्यर्थः।

७–विरोधे=विभिन्नाधिकरणवृत्तित्वे साधकाभावात्=मानाभावात्, तथाच–कर्तृत्वकरणत्वलक्षणोपाधिभेदात् एकस्मिन्नेव कर्तृकरणादिव्यवहारभेदोपपत्तिरित्याशयः।

८—अनुभवितुः=अनुभवाश्रयस्यात्मनः।

९—नहि चैत्रदृष्टं मैत्रः स्मरतीति भावः।

१०—समवायघटितसामानाधिकरण्येनेत्यर्थः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ननु[1] चक्षुरादीनां चैतन्यं मास्तु मनसस्तु नित्यस्य चैतन्यं स्यादत आह—

मनोऽपि न तथा ज्ञानाद्यनध्यक्षं तदा भवेत्[2] ।
धर्माधर्माश्रयोऽध्यक्षो विशेषगुणयोगतः ॥ ४९ ॥

मनोपीति । न तथा, न चेतनम् । ज्ञानादीति । मनसोऽणुत्वात्प्रत्यक्षे च महत्त्वस्य हेतुत्वान्मनसि ज्ञानसुखादिसत्त्वे तत्प्रत्यक्षानुपपत्तिरित्यर्थः । यथा मनसोऽणुत्वं तथा वक्ष्यते । नन्वस्तु[3] विज्ञानमेवात्मा, तस्य * स्वतःप्रकाशरूपत्वाच्चेतनत्वम्, ज्ञानसुखादिकं तु तस्यैवाकारविशेषः तस्यापि † भावत्वादेव क्षणिकत्वं पूर्वपूर्वविज्ञानस्योत्तरोत्तरविज्ञाने हेतुत्वात् सुषुप्तावप्यालयविज्ञानधारा निराबाधैव, मृगमदवासनावासितवसन[4] इव पूर्वपूर्वविज्ञानजनितसंस्काराणामुत्तरोत्तरविज्ञाने संक्रान्तत्वान्नानुपपत्तिः स्मरणादेरिति चेन्न, तस्य[5] जगद्विषयकत्वे सर्वज्ञत्वापत्तिः । यत्किंचिद्विषयकत्वे विनिगमनाविरहः[6] ।

१—मनश्चात्मवादी शङ्कते "ननु" इति ।

२—मनसोऽप्रत्यक्षत्वात् तदाश्रितसुखादीनामपि प्रत्यक्षत्वं न स्यादिति भावः ।

३—योगाचरः क्षणिकविज्ञानवादी बौद्धः शङ्कते—"नन्वस्तु" इति ।

अत्रेदं बोध्यम्—योगाचारमते द्विविधं विज्ञानम् । प्रवृत्तिविज्ञानम्, आलयविज्ञानञ्चेति । तत्र "अयं घटः, अयं पटः" इत्यादि प्रवृत्तिविज्ञानम् । "अहमहम्" इत्याकारकमालयविज्ञानम् । आलयविज्ञानस्यैव प्रतिक्षणं परिणामिनी धारा सुषुप्तावपि तिष्ठति । एवञ्च क्षणिकविज्ञानमेवात्मेति ।

प्रश्नाः—आत्मविषये इन्द्रियमनःक्षणिकविज्ञानवादिमतानि परिष्कुरु ? सिद्धान्तयुक्त्या तेषां खण्डनमपि लिख्यताम् ?

* प्रकाशकान्तरापेक्षारहितत्वादित्यर्थः ।

† "यत् सत् तत् क्षणिकम्" इति व्याप्तेरिति भावः ।

४—कस्तूरीसुगन्धितवस्त्र इव ।

५—नैयायिको बौद्धमतं खण्डयति—**तस्येति** । तस्य=विज्ञानस्य । जगद्विषयकत्वे=यावद्वस्तुविषयकत्वे ।

६—विनिगमनाविरहः=घटविषयकत्वं वा स्यात्, पटविषयकत्वं वा स्यादित्येकतरपक्षसाधकयुक्तेरभाव इत्यर्थः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सुषुप्तावपि[1] विषयावभासप्रसङ्गाच्च। ज्ञानस्य सविषयत्वात्। तदानीं निराकारा चित्सन्ततिरनुवर्तेत इति चेन्न, तस्याः स्वप्रकाशत्वे प्रमाणाभावात्। [2]अन्यथा घटादीनामपि ज्ञानत्वापत्तिः। न [3]चेष्टापत्तिर्विज्ञानव्यतिरिक्तवस्तुनोऽभावादिति वाच्यम्, [4]घटादेरनुभूयमानस्यापलपितुमशक्यत्वात्। [5]आकारविशेष एवायं विज्ञानस्येति चेत्, किमयमाकारोऽतिरिच्यते विज्ञानात्तर्हि समायातं विज्ञानव्यतिरिक्तेन, नातिरिच्यते चेत्तर्हि समूहालम्बने [6]नीलाकारोऽपि पीताकारः स्यात्। स्वरूपतो विज्ञानस्याविशेषात्।* अपोहरूपो नीलत्वादिर्विज्ञानधर्म इति चेन्न, नीलत्वादीनां विरुद्धानामेकस्मिन्नसमावेशात्। इतरथा विरोधावधारणस्यैव दुरुपपादत्वात्। नच वासनासङ्क्रमः संभवति, मातृपुत्रयोरपि [7]वासनासङ्क्रमप्रसङ्गात्। नचोपादानोपादेयभावो नियामक इति वाच्यम्, वासनायाः संक्रमासभवात्। उत्तरस्मिन्नुत्पत्तिरेव संक्रम इति चेन्न, तदुत्पादकाभावात्। चितामेवोत्पादकत्वे तदानन्त्यप्रसङ्गः। क्षणिकविज्ञानेऽतिशयविशेषः कल्प्यत इति चेन्न, मानाभावात्कल्पनागौरवाच्च। एतेन क्षणिकशरीरेष्वेव चैतन्यमपि प्रत्युक्तं, गौरवादतिशये मानाभावाच्च। [8]बीजादावपि सहकारिसमवधानाऽसमवधानाभ्यामेवोपपत्तेः कुर्वद्रूपत्वाकल्पनाच्च।

१—क्षणिकविज्ञानवादी शङ्कते—तदानीमिति। सुषुप्तिकाले इत्यर्थः।

२—अन्यथा=प्रमाणं विना ज्ञानस्वरूपताया अङ्गीकारे।

३—"मन्येत" इति शेषः।

४—घटादेः बाह्यविषयतास्वरूपेण अनुभूयमानस्य अपलपितुम्=अपन्होतुम्।

५—घटपटादि वस्तुजातं विज्ञानस्यैवाकारविशेष इत्यर्थः।

६—"इमे नीलपीते" इत्याकारकसमूहालम्बनज्ञाने नीलाकारोऽपि पीताकारः स्यात् विज्ञाने भेदाभावादित्यर्थः।

* अतद्व्यावृत्तिरूपः।

७—मातृदृष्टपदार्थानां गर्भस्थस्य बालकस्यापि स्मरणप्रसङ्गः स्यात्।

८—क्षेत्रे उप्तस्य बीजस्याङ्कुरोत्पत्तिर्भवति नतु कुसूले पतितस्य, तथा चाङ्कुररूपं कार्यं प्रति कुर्वद्रूपतया=अङ्कुरजननयोग्यजातिविशेषरूपेण कारणता मन्यते सा च फलोत्पादनसमर्थबीजमात्रे तिष्ठति; तथैव प्रकृते क्षणिकशरीरेषु 'कुर्वद्रूपत्वेन' उत्तरोत्तरवासनाजनकजातिविशेषरूपेण कारणता स्वीकर्तव्या, साच कुर्वद्रूपता दृष्टान्ते बीजत्वेन सह समव्याप्ता दार्ष्टान्ते विज्ञानत्वेन सह-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

[1]अस्तु तर्हि क्षणिकविज्ञाने गौरवान्नित्यविज्ञानमेवात्मा '[2]अविनाशी वाऽरेऽयमात्मा (बृहदा० अ० ४। ब्रा० ५। कं० १४) सत्यं ज्ञानमनन्तं ब्रह्म' (तैत्ति०व० २। अनु०१) इत्यादिश्रुतेरिति चेन्न, तस्य विषयत्वासंभवस्य दर्शितत्वान्निर्विषयस्य ज्ञानत्वे मानाभावात्सविषयत्वस्याप्यननुभवात्। अतो [3]ज्ञानादिभिन्नो नित्य आत्मेति सिद्धम्। [4]सत्यं ज्ञानमिति हि ब्रह्मपरं जीवेषु नोपयुज्यते। ज्ञानाज्ञानसुखित्वादिभिर्जीवानां भेदसिद्धौ सुतरामीश्वरभेदः, अन्यथा † बन्धमोक्षव्यवस्थानुपपत्तिः। योऽपीश्वराऽभेदबोधको वेदः सोऽपि तदभेदेन तदीयत्वं प्रतिपादयन्स्तौति। अभेदभावनयैव च यतितव्यमिति वदति। अत एव 'सर्वे एवात्मनि समर्पिताः' इति श्रूयते। मोक्षदशायामज्ञाननिवृत्तावभेदो जायत इत्यपि न, [5]भेदस्य नित्यत्वेन नाशाऽयोगात्। भेदनाशेऽपि व्यक्तिद्वयं स्थास्यत्येव। नच द्वित्वमपि नश्यतामिति वाच्यम्, तव निर्धर्मके ब्रह्मणि सत्यत्वाभावेऽपि सत्यस्वरूपं तदितिवद्द्वित्वाभावेऽपि व्यक्तिद्वयात्मकौ ताविति सुवचत्वात्। मिथ्यात्वाऽभावोऽधिकरणात्मकस्तत्र सत्यत्वमिति चेदेकत्वाऽभावो व्यक्तिद्वयात्मको द्वित्वमित्यप्युच्यताम्। [6]प्रत्येकमेकत्वेऽपि पृथिवीजलयोर्न गन्ध इतिवदुभयं नैकमित्यस्य सर्वजनसिद्धत्वात्। योऽपि

समव्याप्तास्ति, तथा च वासनासंचारः संभवति। दृष्टान्तरूपबीजेष्वेव 'कुर्वद्रूपत्वस्य' अङ्कुरजनयोग्यजातिविशेषस्य कल्पनाऽनुचिता। अङ्कुरादीनामुत्पत्तिस्तु सहकारिजलादीनां संयोगेनापि भवतीति भावः।

१—अद्वैती वेदान्ती शंकते 'अस्तु' इति।

२—बृहदारण्यकश्रुतिं पठति 'अविनाशी' इति।

३—ज्ञानादिभिन्नः=ज्ञानादिगुणवान्।

४—'सत्यं ज्ञानम्—' इति तैत्तिरीयश्रुतिं परमात्मपरतया योजयति।

† बन्धमोक्षव्यवस्था=कश्चित् संसारी कश्चिन्मुक्तः इति व्यवहारः। वेदान्तिमते सर्वस्यैव ब्रह्मात्मकत्वादिति भावः।

५—भेदस्य=अन्योन्याभावस्य।

६—प्रत्येकमेकत्वेऽपि—उभयं नैकमित्यन्वयः।

प्रश्नाः—कथं वेदान्तिमतमुत्थापितम्? कथञ्च तद् दूषितम्? अभेदबोधकवाक्यानां भेदवादिमते कथं सङ्गतिः?

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तदानीमभेदप्रतिपादको A वेदः सोऽपि निर्दुःखत्वादिना B साम्यं प्रतिपादयति । संपदाधिक्ये पुरोहितोऽयं राजा संवृत्त इतिवत् । अत एव 'निरञ्जनः परमं साम्यमुपैति' इति श्रूयते । ईश्वरो न ज्ञानसुखात्मा किंतु ज्ञानाद्याश्रयः 'नित्यं विज्ञानमानन्दं ब्रह्म' इत्यादौ विज्ञानपदेन ज्ञानाश्रय[1] एवोक्तः । 'यः सर्वज्ञः स सर्ववित्' इत्यनुरोधात् । आनन्दमित्यस्याप्यानन्दवदित्यर्थः । अर्शआदित्वान्मत्वर्थीयोऽच्प्रत्ययः, अन्यथा पुँल्लिङ्गत्वापत्तिः । आनन्दोऽपि दुःखाऽभावे उपचर्यते, भाराद्यपगमे सुखी संवृत्तोऽहमितिवत्, दुःखाभावेन सुखित्वप्रत्ययात् । अस्तु वा तस्मिन्नानन्दो नत्वसावानन्दः 'असुखम्[2]' इति श्रुतेः । न विद्यते सुखं यस्येति कुतो नार्थ इति चेन्न, क्लिष्टकल्पनापत्तेः[3], प्रकरणविरोधादानन्दमित्यत्र मत्वर्थीयाच्प्रत्ययविरोधाच्चेति संक्षेपः ।

एतेन[4] प्रकृतिः कर्त्री पुरुषस्तु पुष्करपलाशवन्निर्लेपः किंतु चेतनः कार्यकारणयोरभेदात् । कार्यनाशे सति कार्यरूपतया तन्नाशो[5] न स्यादित्यकारणत्वं तस्य । बुद्धिगतचैतन्याऽभिमानान्यथानुपपत्त्या तत्कल्पनम्[6] । बुद्धिश्च प्रकृतेः परिणामः । सैव महत्तत्त्वम्, अन्तःकरणमित्युच्यते । तत्सत्त्वासत्त्वाभ्यां पुरुषस्य संसारापवर्गौ । तस्या एव-

---

A वेदः='तत्त्वमसि' इत्यादिमहावाक्यम् ।

B साम्यम्=ब्रह्मसादृश्यम् ।

१—ज्ञानाश्रयः=समवायसम्बन्धेन ज्ञानवान् । अधिकरणे ल्युड्विधानादिति भावः ।

२—असुखम्—अत्रत्यो नञ् ब्रह्मणः सकाशात् सुखस्य भेदबोधनं करोति ।

३—बहुव्रीहिसमासेऽन्यपदार्थकल्पनं तत्पुरुषापेक्षया गौरवम् ।

४—एतेनेत्यस्याग्रे वक्ष्यमाणेन इति मतमपास्तमित्यनेनान्वयः। सत्त्वरजस्तमसां साम्यावस्था प्रकृतिरिति **साङ्ख्याः** ।

५—तन्नाशः पुरुषनाशः न स्यान्माभूदित्यकारणत्वं तस्य पुरुषस्य ।

६—जडप्रधानस्य कार्यं बुद्धिः, सापि जडरूपैव भवत्यतश्चेतनरूपपुरुषमन्तरा चैतन्य न भवत्यतः पुरुषकल्पनम् ।

प्रश्नाः—साङ्ख्यमते—प्रकृतेः किं स्वरूपम् ? पुरुषश्च कथमसङ्गः ? अनात्मविषये कीदृशी साङ्ख्यप्रक्रिया अवतारिता ? तत्परिहारश्च कथं कृतः ?

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

न्द्रियप्रणालिकया परिणतिर्ज्ञानरूपा घटादिना संबन्धः । पुरुषे कर्तृत्वाभिमानो बुद्धौ चैतन्याभिमानश्च भेदाऽग्रहात् । ममेदं कर्तव्य-मिति मदंशः पुरुषोपरागो बुद्धेः स्वच्छतया तत्प्रतिबिम्बादतात्त्विको दर्पणस्येव मुखोपरागः । इदमिति विषयोपरागः, इन्द्रियप्रणालिकया परिणतिभेदस्तात्त्विको निःश्वासाभिहतदर्पणस्येव मलिनिमा । कर्त-व्यमिति व्यापारांशः । तेनांशत्रयवती बुद्धिस्तत्परिणामेन ज्ञानेन पुरुषस्यातात्त्विकः सम्बन्धो दर्पणमलिनिम्नेव मुखस्योपल-ब्धिरुच्यते । ज्ञानादिवत्सुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मा अपि बुद्धेरेव कृतिसामानाधिकरण्येन प्रतीतेः । नच बुद्धिश्चेतना परिणामि-त्वादिति मतमपास्तम्, कृत्यदृष्टभोगानामिव चैतन्यस्यापि सामाना-धिकरण्यप्रतीतेस्तद्भिन्ने मानाभावाच्च । चेतनोऽहं करोमीति प्रतीति-श्चैतन्यांशे भ्रम इति चेत्कृत्यंशे किं नेष्यते । अन्यथा बुद्धेर्नित्यत्वे मोक्षाभावोऽनित्यत्वे तत्पूर्वमसंसारापत्तिः । नन्वचेतनायाः प्रकृतेः कार्यत्वाद्बुद्धेरचैतन्यं कार्यकारणयोस्तादात्म्यादिति चेन्न, असिद्धेः । कर्तुर्जन्यत्वे मानाभावात् । वीतरागजन्मादर्शनादनादित्वम् । अना-

१—व्यापारांशः=व्यापारांशः ।

२—प्रकृतेः प्रथमः परिणामो बुद्धिः । अस्या एव इन्द्रियनालिकाद्वारा घटादि-विषयाकारः परिणामः वृत्तिरिति ज्ञानमिति च व्यवह्रियते, बुद्धिवृत्तिरूपज्ञानस्य पुरुषेण सह योग्यतालक्षणः सम्बन्धो भुक्तिपदवाच्यः उपलब्धिरिति इति भाष्यते इति सांख्यानां प्रक्रिया । नैयायिकास्तु—"बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तरम्" (न्या० १।१।१५) इत्याहुः ।

३—बुद्धेरेवेति—नह्यसङ्गस्य पुरुषस्य धर्मलक्षणोऽपि परिणामो भवितुमर्हतीति भावः ।

४—कृतिसामानाधिकरण्येन—"अहं कर्त्ता, अहं सुखी" इत्यादि प्रतीतिबलात् सुखादीनां कृत्या=बुद्धिधर्मेण सहैकाधिकरणत्वेन भानादित्यर्थः ।

५—यथा-अहं कर्ता—अहं धार्मिकः अहं भोक्ता, इत्यादिप्रत्ययः एकाधिकरणे प्रतीयते तथा 'अहं चेतनः' इति प्रत्ययोऽपि तस्मिन्नेवाधिकरणे प्रतीयते इति कर्त्रभिन्ने चेतने प्रमाणं नास्तीति भावः ।

६—पुरुषश्चेतनः, तस्यैव सम्बन्धात् यो बुद्धौ चैतन्यप्रतिबिम्बः, तेन बुद्धौ मिथ्यैव चैतत्यन्याभिमानः इत्याशयः ।

७—यदि कर्तृचेतनयोर्भेदः अर्थात् कर्ता अन्यः पदार्थः चेतनोऽन्यः पदार्थः तदा तस्मिन् सुखदुःखयोरभावात् बन्धमोक्षव्यवस्थैव साङ्ख्यसिद्धान्ते दत्तजलाञ्जलितामापद्येतेति भावः ।

८—बुद्धेः प्रकृतिकार्यत्वस्याऽभावादित्यर्थः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

देर्नाशासम्भवान्नित्यत्वम्। तत्किं प्रकृत्यादिकल्पनेन। नच—

"प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः।

अहंकारविमूढात्मा कर्ताहमिति मन्यते" (गीता अ. ३ श्लो. २७)

इत्यनेन विरोध इति वाच्यम्, प्रकृतेरदृष्टस्य गुणैरदृष्टजन्यैरिच्छादिभिः कर्ताहमेवेत्यस्य तदर्थत्वात्। "तत्रैवं सति कर्तारमात्मानं केवलं तु यः" इत्यादि वदता भगवता प्रकटीकृतोऽयमुपरिष्टादाशय इति संक्षेपः। धर्माधर्माश्रय इति। आत्मेत्यनुषज्यते। शरीरस्य तदाश्रयत्वे देहान्तरकृतकर्मणां देहान्तरेण भोगानुपपत्तेः। विशेषगुणयोगत इति। योग्यविशेषगुणस्य ज्ञानसुखादेः सम्बन्धेनात्मनः प्रत्यक्षत्वं सम्भवति न त्वन्यथा, अहं जाने अहं करोमीत्यादिप्रतीतेः॥ ४६॥

प्रवृत्त्याद्यनुमेयोऽयं रथगत्येव सारथिः।

अहङ्कारस्याश्रयोऽयं मनोमात्रस्य गोचरः॥ ५०॥

अयमात्मा परदेहादौ[1] प्रवृत्त्यादिनाऽनुमीयते। प्रवृत्तिरत्र चेष्टा। ज्ञानेच्छायत्नादीनां देहेऽभावस्योक्तप्रायत्वाच्चेष्टायाश्च प्रयत्नसाध्यत्वाच्चेष्टया प्रयत्नवानात्माप्यनुमीयत इति भावः। अत्र दृष्टान्तमाह। रथेति। यद्यपि रथकर्म चेष्टा न भवति, तथापि तेन कर्मणा सारथिर्यथाऽनुमीयते तथा चेष्टात्मकेन कर्मणा परात्मापीति भावः। अहङ्कारस्येति। अहङ्कारोऽहमिति प्रत्ययस्तस्याश्रयो विषयः आत्मा न शरीरादिरिति। मन इति। मनोभिन्नेन्द्रियजन्यप्रत्यक्षाविषयो मानसप्रत्यक्षविषयश्चेत्यर्थः। रूपाद्यभावेनेन्द्रियान्तरायोग्यत्वात्॥५०॥

विभुर्बुद्ध्यादिगुणवान्बुद्धिस्तु द्विविधा मता।

अनुभूतिः स्मृतिश्च स्यादनुभूतिश्चतुर्विधा॥५१॥

विभुत्वं परममहत्त्वम्। तच्च पूर्वोक्तमपि स्पष्टार्थमुक्तम्। बुद्ध्या-

१—अयमात्मा परदेहादौ प्रवृत्त्यादिना अनुमेयः=अनुमातुं शक्य इत्यर्थः। अनुमानप्रकारश्चायम्—"इदं चैत्रशरीरं चेतनाधिष्ठितं प्रवृत्तिमत्त्वाद्रथवत् इति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

दीति । बुद्धिसुखदुःखेच्छादयश्चतुर्दश गुणाः पूर्वोक्ता वेदितव्याः । अत्रैव प्रसङ्गाद् बुद्धेः कतिपयं प्रपञ्चं दर्शयति । बुद्धिस्त्विति । द्वैविध्यं व्युत्पादयति । अनुभूतिरिति । अनुभूतिश्चतुर्विधेति । एतासां चतसृणां करणानि चत्वारि प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानीति सूत्रोक्तानि वेदितव्यानि ॥ ५१ ॥

प्रत्यक्षमप्यनुमितिस्तथोपमितिशब्दजे ।
घ्राणजादिप्रभेदेन प्रत्यक्षं षड्विधं मतम् ॥ ५२ ॥

इन्द्रियजन्यं ज्ञानं प्रत्यक्षम् । यद्यपि मनोरूपेन्द्रियजन्यं सर्वमेव ज्ञानं तथापीन्द्रियत्वेन रूपेणेन्द्रियाणां यत्र ज्ञाने कारणत्वं तत्प्रत्यक्षमिति विवक्षितम् । ईश्वरप्रत्यक्षं तु न लक्ष्यम् । "इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम्" इति (न्या० १।१।४)सूत्रे तथैवोक्तत्वात् । अथवा ज्ञानाकरणकं ज्ञानं प्रत्यक्षम् । अनुमितौ व्याप्तिज्ञानस्य, उपमितौ सादृश्यज्ञानस्य, शाब्दबोधे पदज्ञानस्य, स्मृतावनुभवस्य करणत्वात्तत्र तत्र नातिव्याप्तिः । इदं लक्षणमीश्वरप्रत्यक्षसाधारणम् । परामर्शजन्यं ज्ञानमनुमितिः । यद्यपि परामर्शप्रत्यक्षादिकं परामर्शजन्यं तथापि परामर्शजन्यं हेत्वविषयकं यज्ज्ञानं तदेवानुमितिः । नच कादाचित्कहेतुविषयका-

---

१—प्रत्यक्षप्रमाणस्य सर्वप्रमाणज्येष्ठत्वात् प्रथमं प्रत्यक्षं लक्षयति—"इन्द्रियजन्यम्" इति । "शरीरसंयुक्तत्वे सति ज्ञानकरणमतीन्द्रियमिन्द्रियम्" इतीन्द्रियस्य सरलं लक्षणम् ।

२—ज्ञानमात्रं प्रति मनस इन्द्रियत्वेन रूपेण कारणता नास्ति किन्तु मनस्त्वेन रूपेणेति भावः ।

३—ईश्वरप्रत्यक्षस्यापि लक्ष्यत्वमभिप्रेत्य पक्षान्तरमाह—**अथवेति** ।

४—"हेत्वविषयकम्" इति । केवलं "पर्वतो वह्निमान्" इत्याकारकमित्यर्थः ।

५—कादाचित्केति—"धूमवान् पर्वतो वह्निमान्" इत्यादौ धूमरूपहेतोरपि पक्षतावच्छेदकरूपेण भानात् ।

प्रश्नाः—अनुभूतेः के भेदाः? प्रत्यक्षादीनां किं लक्षणम्? कतिविधं प्रत्यक्षम्? ईश्वरज्ञाने कथं प्रत्यक्षलक्षणं घटते, नहि तज्जन्यं भवति? इत्यादि सुविविच्य सविस्तरं लिख्यताम्?

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

नुमितावव्याप्तिरिति वाच्यम्, तादृशज्ञानवृत्त्यनुभवत्वव्याप्यजाति-सत्त्वस्य विवक्षितत्वात्। अथवा व्याप्तिज्ञानकरणकं ज्ञानमनुमितिः। एवं सादृश्यज्ञानकरणकं ज्ञानमुपमितिः। पदज्ञानकरणकं ज्ञानं शाब्दबोधः। वस्तुतो यां कांचिदनुमितिव्यक्तिमादाय तद्व्यक्तिवृत्ति-प्रत्यक्षावृत्तिजातिमत्त्वमनुमितित्वम्। एवं यत्किंचित्प्रत्यक्षादिकमादाय तद्व्यक्तिवृत्त्यनुमित्यवृत्तिजातिमत्त्वं प्रत्यक्षत्वादिकं वाच्यमिति। जन्य-प्रत्यक्षं विभजते—घ्राणजादीति। घ्राणजं रासनं चाक्षुषं स्पार्शनं श्रौत्रं मानसमिति षड्विधं प्रत्यक्षम्। न चेश्वरप्रत्यक्षस्याविभजनान्न्यूनत्वम्, जन्यप्रत्यक्षस्यैव निरूपणीयत्वादुक्तसूत्रानुसारात्॥ ५२॥

घ्राणस्य गोचरो गन्धो गन्धत्वादिरपि स्मृतः।
तथा रसो रसज्ञायास्तथा शब्दोऽपि श्रुतेः॥ ५३॥

गोचर इति ग्राह्य इत्यर्थः। गन्धत्वादिरिति। आदिपदात् सुरभित्वादिपरिग्रहः। गन्धस्य प्रत्यक्षत्वात्तद्वृत्तिजातिरपि प्रत्यक्षा। गन्धाश्रयग्रहणे तु घ्राणस्य न सामर्थ्यमिति बोध्यम्। तथा रस इति। रसत्वादिसहित इत्यर्थः। तथा शब्दोऽपि शब्दत्वादिसहितः। गन्धो रसश्च उद्भूतो बोध्यः॥ ५३॥

उद्भूतरूपं नयनस्य गोचरो
द्रव्याणि तद्वन्ति पृथक्त्वसंख्ये।
विभागसंयोगपरापरत्व-
स्नेहद्रवत्वं परिमाणयुक्तम्॥ ५४॥

१—तादृशज्ञानेति—व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यानुमितिज्ञानवृत्तिर्योऽनुभवत्वस्य व्याप्या जातिः अर्थात् अनुमितित्वं, तन्मत्त्वस्य विवक्षायामुक्ताऽव्याप्तिदोषाभाव इत्यर्थः।

२—निरूपणीयत्वात्=विभाज्यत्वात्। तथात्वे प्रमाणमाह—उक्तसूत्रेति। "इन्द्रियार्थ-सन्निकर्षोत्पन्नं ज्ञानम्"—इति दर्शितसूत्रानुसारादित्यर्थः।

३—येषामिन्द्रियाणां यद्ग्रहणे सामर्थ्यं तत् पृथक् दर्शयति—"घ्राणस्य" इति।

४—गन्धाश्रयस्य पृथिव्यात्मकद्रव्यस्य पुष्पादेर्ग्रहणे तु घ्राणस्य न सामर्थ्यम्, इन्द्रियाणां

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ग्रीष्मोष्मादावनुद्भूतरूपमिति न तत्प्रत्यक्षम्। तद्वन्ति उद्भूतरूपवन्ति ॥ ५४ ॥

क्रिया जातिर्योग्यवृत्तिः समवायश्च तादृशः ।
गृह्णाति चक्षुः संयोगादालोकोद्भूतरूपयोः ॥ ५५ ॥

योग्येति। पृथक्त्वादिकमपि योग्यवृत्तितया बोध्यम्। तादृशः योग्यव्यक्तिवृत्तिरित्यर्थः। चक्षुर्योग्यत्वमेव कथं तदाह—गृह्णातीति। आलोकसंयोग[1] उद्भूतरूपं[2] च चाक्षुषप्रत्यक्षे कारणम्। द्रव्यचाक्षुषं प्रति तयोः[3] समवायसंबन्धेन कारणत्वम्। द्रव्यसमवेतरूपादिप्रत्यक्षे स्वाश्रयसमवायसंबन्धेन। द्रव्यसमवेतसमवेतस्य रूपत्वादेः प्रत्यक्षे स्वाश्रयसमवेतसमवायसंबन्धेनेति ॥ ५५ ॥

उद्भूतस्पर्शवद्द्रव्यं गोचरः सोऽपि च त्वचः ।
रूपान्यच्चक्षुषो योग्यं रूपमत्रापि कारणम् ॥ ५६ ॥

द्रव्याध्यक्षे—

उद्भूतस्पर्शवद्द्रव्यं त्वचो गोचरः। सोऽपि उद्भूतस्पर्शोऽपि स्पर्शत्वादिसहितः। रूपान्यदिति। रूपभिन्नं रूपत्वादिभिन्नं यच्चक्षुषो योग्यं तत्त्वगिन्द्रियस्यापि ग्राह्यम्। तथाच पृथक्त्वसंख्यादयो ये चक्षुर्ग्राह्या गुणा उक्ता एवं क्रियाजातयो योग्यवृत्तयश्च ते त्वचो ग्राह्या इत्यर्थः। अत्रापि त्वगिन्द्रियजन्येऽपि रूपं द्रव्यप्रत्यक्षे कार-

---

योग्यविषयावभासकत्वनियमादिति बोध्यम्। गन्धाभावग्रहणेऽपि घ्राणस्यैव सामर्थ्यम् "येनेन्द्रियेण यद् गृह्यते तेनेन्द्रियेण तन्निष्ठा जातिस्तदभावश्च गृह्यते" इति न्यायादिति भावः।

[1]—तेनान्धकारे न चाक्षुषं प्रत्यक्षमिति भावः।

[2]—तेन पिशाचस्य न चाक्षुषं प्रत्यक्षम्।

[3]—तयोः=आलोकसंयोगोद्भूतरूपयोः।

प्रश्नाः—केनेन्द्रियेण किं किं गृह्यते? चक्षुषः प्रत्यक्षयोग्यानि कानि? ग्रीष्मोष्मादेः पिशाचादेश्च कुतो न चाक्षुषं प्रत्यक्षम्? आलोकोद्भूतरूपयोः कुत्र केन २ सम्बन्धेन कारणता?

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

णम् । तथाच[1] बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षे रूपं कारणम् । नवीनास्तु[2] बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षे न रूपं कारणं प्रमाणाभावात् । किन्तु चाक्षुषप्रत्यक्षे रूपं स्पार्शनप्रत्यक्षे स्पर्शः कारणमन्वयव्यतिरेकात्[3] । बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षमात्रे किं कारणमिति[4] चेन्न किंचित् । आत्माऽवृत्तिशब्दभिन्नविशेषगुणवत्त्वं वा प्रयोजकमस्तु । रूपस्य कारणत्वे लाघवमिति चेन्न, वायोस्त्वगिन्द्रियेणाग्रहणप्रसङ्गात् । इष्टापत्तिरिति चेदुद्भूतस्पर्श एव लाघवात्कारणमस्तु । प्रभाया अप्रत्यक्षत्वे त्विष्टापत्तिरेव किं नेष्यते । तस्मात् प्रभां पश्यामीतिवत् वायुं स्पृशामीति प्रत्ययस्य संभवाद्वायोरपि प्रत्यक्षं संभवत्येव । बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षमात्रे न रूपस्य न वा स्पर्शस्य हेतुत्वम् । वायुप्रभयोरेकत्वं गृह्यते एव, क्वचिद्द्वित्वादिकमपि, क्वचित्संख्यापरिमाणाद्यग्रहो दोषादित्याहुः ॥ ५६ ॥

—त्वचो योगो मनसा ज्ञानकारणम् ।

त्वङ्मनःसंयोगो † ज्ञानसामान्ये कारणमित्यर्थः । किं तत्र प्रमाणं ?, सुषुप्तिकाले त्वचं त्यक्त्वा पुरीतति वर्तमानेन मनसा ज्ञानाऽजननमिति[5] । ननु[6] सुषुप्तिकाले किं ज्ञानं भविष्यति अनुभवरूपं स्मरणरूपं वा । नाद्यः । अनुभवसामग्र्यभावात् । तथाहि[7]—प्रत्यक्षे चक्षुरादिना मनःसंयोगस्य हेतुत्वात्तदभावादेव न चाक्षुषादिप्रत्यक्षम् ।

१—तथा च—बहिरिन्द्रियजन्यमूर्त्तद्रव्यप्रत्यक्षत्वावच्छिन्नं प्रति रूपं कारणम्, तेन वायुर्न प्रत्यक्ष इति भावः ।

२—वायोः प्रत्यक्षत्ववादिनां मतमुत्थापयति—नवीनास्त्विति । गङ्गेशोपाध्यायप्रभृतय इत्यर्थः । अस्य 'आहु' रित्यनेनाग्रे सम्बन्धः ।

३—रूपसत्त्वे चाक्षुषं प्रत्यक्षम्, रूपाभावे चाक्षुषप्रत्यक्षाभाव इत्यन्वयव्यतिरेकादित्यर्थः ।

४—अनुगतकारणम् ।

† जन्यज्ञानसामान्य इत्यर्थः ।

५—ज्ञानाजननमित्यत्र प्रमाणमित्यनुषज्यते ।

६—सुषुप्तौ त्वङ्मनःसंयोगसत्त्वेऽपि ज्ञानसम्भावनैव नास्तीति मन्वानः शङ्कते—'ननु' इति ।

७—अनुभवसामग्र्या अभावं दर्शयति 'तथाहि' इत्यादिना ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ज्ञानादेरभावादेव न मानसं प्रत्यक्षम्। ज्ञानाद्यभावे चात्मनोऽपि न प्रत्यक्षमिति। एवं व्याप्तिज्ञानाभावादेव नानुमितिः, सादृश्यज्ञानाभावान्नोपमितिः, पदज्ञानाभावान्न शाब्दबोधः, इत्यनुभवसामग्र्यभावान्नानुभवः, उद्बोधकाभावाच्च न स्मरणम्। [1]मैवम्। [2]सुषुप्तिप्राक्कालोत्पन्नेच्छादिव्यक्तेस्तत्सम्बन्धेनात्मनश्च प्रत्यक्षत्वप्रसङ्गात्। [3]तदतीन्द्रियत्वे मानाभावात्। सुषुप्तिप्राक्काले [4]निर्विकल्पकमेव नियमेन जायते इत्यत्रापि प्रमाणाभावात्। अथ ज्ञानमात्रे त्वङ्मनःसंयोगस्य यदि कारणत्वं तदा रासनचाक्षुषादिप्रत्यक्षकाले त्वाचप्रत्यक्षं स्यात्। विषयत्वक्संयोगस्य त्वङ्मनःसंयोगस्य च सत्वात्। परस्परप्रतिबन्धादेकमपि वा न स्यादिति। [5]अत्र केचित्पूर्वोक्तयुक्त्या त्वङ्मनोयोगस्य ज्ञानहेतुत्वे सिद्धे चाक्षुषादिसामग्र्याः स्पार्शनादिप्रतिबन्धकत्वमनुभवानुरोधात्कल्प्यते इति। [6]अन्ये तु सुषुप्त्यनुरोधाच्चर्ममनःसंयोगस्य ज्ञानहेतुत्वं कल्प्यते। चाक्षुषादिप्रत्यक्षकाले त्वङ्मनःसंयोगाभावान्न स्पार्शनप्रत्यक्षमिति वदन्ति।

मनोग्राह्यं सुखं दुःखमिच्छा द्वेषो मतिः कृतिः ॥५७॥

मनोग्राह्यमिति। मनोजन्यप्रत्यक्षविषयमित्यर्थः। मतिर्ज्ञानम्। कृतिः प्रयत्नः। एवं सुखत्वादिकमपि मनोग्राह्यम्। एवमात्मापि मनोग्राह्यः। किन्तु मनोमात्रस्य गोचर इत्यनेन पूर्वमुक्तत्वादत्र नोक्तः॥ ५७॥

१—सिद्धान्ती परिहरति—'मैवम्' इति।

२—सुषुप्तिप्राक्काले=सुषुप्त्यव्यवहितपूर्वकाले उत्पन्ना या इच्छाया आदिव्यक्तिः=ज्ञानव्यक्तिः 'अयं घटः अयं पट' इत्याकारको ज्ञानविशेषः तत्सम्बन्धेन=ज्ञानीयसमवायेन अहं सुखी, अहं ज्ञानवान् इत्याकारकतया आत्मनः प्रत्यक्षप्रसङ्गादित्यर्थः।

३—नच सुषुप्तिप्राक्काले ज्ञानव्यक्तिरतीन्द्रियाऽस्तीति भावः।

४—निर्विकल्पकम् = प्रकारतादिसम्बन्धानवगाहि।

५—ज्ञानसामान्यम्प्रति त्वङ्मनःसंयोगकारणवादी समाधत्ते—अत्र केचिदिति।

६—अत्रैव पक्षधरमिश्रस्य मतमाह—अन्ये त्विति।

प्रश्नाः—ज्ञानसामान्यम्प्रति कस्य कारणता? कथञ्च सा सूपपाद्या? तत्र केषां कीदृशं मतमिति मूलाऽनुसन्धेन स्पष्टं व्याख्याहि?

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ज्ञानं यन्निर्विकल्पाख्यं तदतीन्द्रियमिष्यते।
महत्त्वं षड्विधे हेतुरिन्द्रियं करणं मतम्॥ ५८॥

चक्षुःसंयोगाद्यनन्तरं घट इत्याकारकं घटत्वादिविशिष्टं ज्ञानं न सम्भवति पूर्वं विशेषणस्य घटत्वादेर्ज्ञानाभावात्। विशिष्टबुद्धौ विशेषणज्ञानस्य कारणत्वात्। तथाच प्रथमतो घटघटत्वयोर्वैशिष्ट्यानवगाह्येव ज्ञानं जायते। तदेव निर्विकल्पकम्। तच्च न प्रत्यक्षम्। तथाहि—वैशिष्ट्यानवगाहिज्ञानस्य प्रत्यक्षं न भवति घटमहं जानामीति प्रत्ययात्। तत्रात्मनि ज्ञानं प्रकारीभूय भासते। ज्ञाने घटस्तत्र घटत्वम्। यः प्रकारः स एव विशेषणमित्युच्यते। विशेषणे यद्विशेषणं तद्विशेषणतावच्छेदकमित्युच्यते। विशेषणतावच्छेदकप्रकारकं ज्ञानं विशिष्टवैशिष्ट्यज्ञाने कारणम्। निर्विकल्पके च घटत्वादिकं न प्रकारस्तेन घटत्वादिविशिष्टघटादिवैशिष्ट्यभानं ज्ञाने न सम्भवति। घटत्वाद्यप्रकारकं च घटादिविशिष्टज्ञानं न सम्भवति, जात्यखण्डोपाध्यतिरिक्तपदार्थज्ञानस्य किंचिद्धर्मप्रकारकत्वनियमात्। महत्त्वमिति। द्रव्यप्रत्यक्षे महत्त्वं समवायसम्बन्धेन कारणम्। द्रव्यसमवेतानां गुणकर्मसामान्यानां प्रत्यक्षे स्वाश्रयसमवायसम्बन्धेन कारणम्। द्रव्यसमवेतसमवेतानां गुणत्वकर्मत्वादीनां प्रत्यक्षे स्वाश्रयसमवेतसमवायसम्बन्धेन कारणमिति। इन्द्रियमिति। अत्रापि

१—निर्विकल्पकज्ञाने प्रमाणं दर्शयितुमाह—चक्षुःसंयोगादीति। महत्त्वावच्छिन्नोद्भूतरूपावच्छिन्नालोकसंयोगावच्छिन्नचक्षुःसंयोगाद्यनन्तरमित्यर्थः। आदिना त्वक्संयोगपरिग्रहः।

२—"घट" इत्याकारकमिति—तथाच—तस्य विशिष्टवैशिष्ट्याद्यवगाहित्वाभावात् विशेषणताऽवच्छेदकप्रकारकज्ञानस्याऽहेतुतया निर्विकल्पकापेक्षाऽऽवश्यकीति भावः।

३—इमे घटघटत्वे-इति वैशिष्ट्यानवगाहिज्ञानम्। वैशिष्ट्यानिष्ठसांसर्गिकविषयतानिरूपितविषयिताशून्यमित्यर्थः।

४—चतुर्थविषयताशालिज्ञानमेवेत्यर्थः

५—भासमानवैशिष्ट्यप्रतियोगित्वं विशेषणत्वम्। भासमानवैशिष्ट्यानुयोगित्वं विशेष्यत्वम्।

६—प्रतियोगित्वानुयोगित्वाद्यनिर्वचनीयो धर्मोऽखण्डोपाधिः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

षड्विध इत्यनुषज्यते । इन्द्रियत्वं तु न जातिः पृथिवीत्वादिना साङ्कर्यप्रसङ्गात् । शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारण-मनःसंयोगाश्रयत्वमिन्द्रियत्वम् । आत्मादिवारणाय सत्यन्तम् । उद्भूतविशेषगुणस्य शब्दस्य श्रोत्रे सत्त्वाच्छब्देतरेति । विशेषगुणस्य रूपादेश्चक्षुरादावपि सत्त्वादुद्भूतेति । उद्भूतत्वं न जातिः शुक्ल-त्वादिना सांकर्यात् । नच शुक्लत्वादिव्याप्यं नानैवोद्भूतत्वमिति वाच्यम्, उद्भूतरूपवत्त्वादिना चाक्षुषादौ जनकतानुपपत्तेः किन्तु शुक्लत्वादिव्याप्यं नानैवानुद्भूतत्वं तदभावकूटश्चोद्भूततत्त्वम् । तच्च संयोगादावप्यस्ति तथाच शब्देतरोद्भूतगुणः संयोगादिश्चक्षुरादेर-प्यस्त्यतो विशेषेति । कालादिवारणाय विशेष्यदलम् । इन्द्रिया-वयवविषयसंयोगस्यापि प्राचां मते प्रत्यक्षजनकत्वादिन्द्रियावयववार-णाय, नवीनमते कालादौ रूपाभावप्रत्यक्षे सन्निकर्षघटकतया कारणी-भूतचक्षुःसंयोगाश्रयस्य कालादेश्च वारणाय मनःपदम् । ज्ञानकारण-मित्यपि तद्वारणाय । करणमिति । असाधारणं कारणं करणम् । असाधारणत्वं व्यापारवत्त्वम् ॥ ५८ ॥

विषयेन्द्रियसम्बन्धो व्यापारः सोऽपि षड्विधः ।
द्रव्यग्रहस्तु संयोगात्संयुक्तसमवायतः ॥ ५९ ॥
द्रव्येषु समवेतानां तथा तत्समवायतः ।
तत्रापि समवेतानां शब्दस्य समवायतः ॥ ६० ॥
तद्वृत्तीनां समवेतसमवायेन तु ग्रहः ।
प्रत्यक्षं समवायस्य विशेषणतया भवेत् ॥ ६१ ॥

१—पृथिवीत्वधर्मं त्यक्त्वा इन्द्रियत्वरूपो धर्मो चक्षुरादिषु वर्त्तते; इन्द्रियत्वरूपं धर्मं त्यक्त्वा पृथिवीत्वधर्मो घटादिषु वर्त्तते, अनयोर्द्वयोरेकत्र घ्राणेन्द्रिये समावेशः ।

प्रश्नाः—निर्विकल्पकज्ञाने किं मानम् ? किञ्च तल्लक्षणम् ? इत्यादिसर्वं मूलाऽनुरोधेन प्रपञ्च्यताम् ? अङ्काः—१५

२—शुक्लत्वरूपं धर्मं त्यक्त्वा—उद्भूतत्वमुद्भूतगन्धे वर्तते । एवमुद्भूतत्वं धर्मं त्यक्त्वा शुक्लत्वधर्मः—अनुद्भूतशुक्ले वर्तते । द्वयोः समावेश उद्भूतशुक्ले ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विशेषणतया तद्वदभावानां ग्रहो भवेत्।
यदि स्यादुपलभ्येतेत्येवं यत्र प्रसज्यते ॥ ६२ ॥

व्यापारः संनिकर्षः। षड्विधं सन्निकर्षमुदाहरणद्वारा दर्शयति। द्रव्यग्रह इति। द्रव्यप्रत्यक्षमिन्द्रियसंयोगजन्यम्। द्रव्यसमवेतप्रत्यक्षमिन्द्रियसंयुक्तसमवायजन्यम्। एवमग्रेऽपि। वस्तुतस्तु द्रव्यचाक्षुषं प्रति चक्षुःसंयोगः कारणम्। द्रव्यसमवेतचाक्षुषं प्रति चक्षुःसंयुक्तसमवायः कारणम्। द्रव्यसमवेतसमवेतचाक्षुषं प्रति चक्षुःसंयुक्तसमवेतसमवायः। एवमन्यत्रापि विशिष्यैव कार्यकारणभावः। परन्तु पृथिवीपरमाणुनीले नीलत्वं पृथिवीत्वं च चक्षुषा कथं न गृह्यते तत्र परम्परयोद्भूतरूपसम्बन्धस्य महत्त्वसम्बन्धस्य च सत्त्वात्। तथाहि—नीलत्वं जातिरेकैव घटनीले परमाणुनीले च वर्तते। तथाच महत्त्वसंबन्धो घटनीलमादाय वर्तते। उद्भूतरूपसंबन्धस्तूभयमादायैव वर्तते[1]। एवं पृथिवीपरमाणौ पृथिवीत्वेऽपि घटादिकमादाय महत्त्वसंबन्धो बोध्यः[2]। एवं वायौ तदीयस्पर्शादौ च सत्तायाश्चाक्षुषप्रत्यक्षं स्यात्। तस्मादुद्भूतरूपावच्छिन्नमहत्त्वावच्छिन्नचक्षुःसंयुक्तसमवायस्य द्रव्यसमवेतचाक्षुषप्रत्यक्षे, तादृशचक्षुःसंयुक्तसमवेतसमवायस्य द्रव्यसमवेतसमवेतचाक्षुषे कारणत्वं वाच्यम्। इत्थं च परमाणुनीलादौ न नीलत्वादिग्रहः, परमाणौ चक्षुसंयोगस्य महत्त्वावच्छिन्नत्वाभावात्। एवं वाय्वादौ न सत्तादिचाक्षुषं तत्र चक्षुःसंयोगस्य रूपावच्छिन्नत्वाभावात्। एवं यत्र घटस्य मध्यावच्छेदेनालोकसंयोगः चक्षुःसंयोगस्तु बाह्यावच्छेदेन तत्र घटप्रत्यक्षाभावादालोकसंयोगावच्छिन्नत्वं चक्षुःसंयोगे विशेषणं देयम्। द्रव्यस्पार्शनप्रत्यक्षे त्वक्संयोगः कारणं, द्रव्यसमवेतस्पार्शनप्रत्यक्षे त्वक्संयुक्तसमवायः, द्रव्यसमवेतसमवेतस्पार्शनप्रत्यक्षे त्वक्संयुक्तसमवेतसमवायः कारणम्। अत्रापि महत्त्वावच्छिन्नत्वमुद्भूतस्पर्शावच्छिन्नत्वं च पूर्ववदेव

१—घटनीलं परमाणुनीलं चोभयमादायैव वर्तते।
२—एवं पूर्वोक्तपरम्परासंबन्धेन पार्थिवपरमाणुनिष्ठपृथ्वीत्वेऽपि संबन्धः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

बोध्यम्। एवं गन्धप्रत्यक्षे घ्राणसंयुक्तसमवायः। गन्धसमवेतस्य घ्राणजन्यप्रत्यक्षे घ्राणसंयुक्तसमवेतसमवायः कारणम्। एवं रसप्रत्यक्षे रसनासंयुक्तसमवायः। रससमवेतरासनप्रत्यक्षे रसनासंयुक्तसमवेतसमवायः कारणम्। शब्दप्रत्यक्षे श्रोत्रावच्छिन्नसमवायः कारणम्। शब्दसमवेतश्रावणप्रत्यक्षे श्रोत्रावच्छिन्नसमवेतसमवायः कारणम्। अत्र सर्वं प्रत्यक्षं लौकिकं बोध्यम्। वक्ष्यमाणमलौकिकं प्रत्यक्षमिन्द्रियसंयोगादिकं विनापि भवति। एवमात्मनः प्रत्यक्षे मनःसंयोगः, आत्मसमवेतमानसप्रत्यक्षे मनःसंयुक्तसमवायः, आत्मसमवेतसमवेतमानसप्रत्यक्षे मनःसंयुक्तसमवेतसमवायः कारणम्। अभावप्रत्यक्षे समवायप्रत्यक्षे चेन्द्रियसंबद्धविशेषणता हेतुः। वैशेषिकमते तु समवायो न प्रत्यक्षः। अत्र यद्यपि विशेषणता[1] नानाविधा। तथाहि भूतलादौ घटाद्यभावः संयुक्तविशेषणतया गृह्यते। संख्यादौ रूपाद्यभावः संयुक्तसमवेतविशेषणतया। संख्यात्वादौ रूपाद्यभावः संयुक्तसमवेतसमवेतविशेषणतया। शब्दाभावः केवलश्रोत्रावच्छिन्नविशेषणतया। कादौ खत्वाद्यभावः श्रोत्रावच्छिन्नसमवेतविशेषणतया। एवं कत्वाद्यवच्छिन्नाभावे गत्वाभावादिकं श्रोत्रावच्छिन्नविशेषणविशेषणतया। एवं घटाभावादौ पटाभावः चक्षुःसंयुक्तविशेषणविशेषणतया। एवमन्यदप्यूह्यम्। तथापि विशेषणतात्वरूपेणैकैव सा गण्यते अन्यथा षोढा सन्निकर्ष इति प्राचां प्रवादो व्याहन्येतेति। यदि स्यादुपलभ्येतेति। अत्राऽभावप्रत्यक्षे योग्यानुपलब्धिः कारणम्। तथाहि—भूतलादौ घटादिज्ञाने जाते घटाभावादिकं न ज्ञायते। तेनाभावोपलम्भे प्रतियोग्युपलम्भाभावः कारणम्। तत्र योग्यताप्यपेक्षिता, सा च[2] प्रतियोगिसत्त्वप्रसञ्जनप्रसञ्जितप्रतियोगिकत्वरूपा। तदर्थश्च प्रतियोगिनो घटादेः सत्त्वप्रसक्त्या प्रसञ्जित उपलम्भरूपः

१—अभावनिरूपिताविशेषणता नानाविधा।

२—ननु—कीदृशी योग्यता सेति जिज्ञासायां न्यायचिन्तामणिकारगङ्गेशोपाध्यायमतेन तां निर्वक्ति—सा चेति। योग्यप्रतियोग्युपलम्भाभावोऽभावप्रत्यक्षे हेतुरिति निष्कर्षः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रतियोगी यस्य सोऽभावप्रत्यक्षे हेतुः। तथाहि—यत्रालोकसंयोगादिकं वर्तते तत्र यद्यत्र घट स्यात्तर्हि उपलभ्येतेत्यापादयितुं शक्यते। तत्र घटाभावादिप्रत्यक्षं भवति। अन्धकारे तु नापादयितुं शक्यते। तेन घटाभावादेरन्धकारे न चाक्षुषप्रत्यक्षम्, स्पार्शनप्रत्यक्षं तु भवत्येव, आलोकसंयोगं विनापि स्पार्शनप्रत्यक्षस्यापादयितुं शक्यत्वात्। गुरुत्वादिकं यदयोग्यं तदभावस्तु न प्रत्यक्षस्तत्र गुरुत्वादिप्रत्यक्षस्यापादयितुमशक्यत्वत्। वायौ रूपाभावः। पाषाणे सौरभाभावः। गुडे तिक्ताभावः। श्रोत्रे शब्दाभावः। आत्मनि सुखाभावः। एवमादयस्तत्तदिन्द्रियैर्गृह्यन्ते तत्तत्प्रत्यक्षस्यापादयितुं शक्यत्वात्। संसर्गाभावप्रत्यक्षे प्रतियोगिनो योग्यता। अन्योन्याभावप्रत्यक्षे त्वधिकरणयोग्यताऽप्यपेक्षिता। अतः स्तम्भादौ पिशाचादिभेदोऽपि चक्षुषा गृह्यते एव ॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥

एवं प्रत्यक्षं लौकिकभेदेन द्विविधम्। तत्र लौकिकप्रत्यक्षे षोढा सन्निकर्षो वर्णितः। अलौकिकसन्निकर्षस्त्विदानीमुच्यते—

अलौकिकस्तु व्यापारस्त्रिविधः परिकीर्तितः।
सामान्यलक्षणो ज्ञानलक्षणो योगजस्तथा ॥ ६१ ॥

व्यापारः संनिकर्षः। समान्यलक्षण इति। सामान्यं लक्षणं[1] यस्येत्यर्थः। तत्र लक्षणपदेन यदि स्वरूपमुच्यते तदा सामान्यस्वरूपा प्रत्यासत्तिरित्यर्थो[2] लभ्यते। तच्चेन्द्रियसम्बद्धविशेष्यकज्ञाने[3] प्रकारीभूतं

१—सामान्यलक्षणपदं बहुव्रीहिसमासेन स्पष्टयति—'सामान्यम्' इति। लक्षणपदस्य स्वरूपं विषयश्चेति अर्थद्वयमभिप्रेत्याह—'यदि स्वरूपम्' इति।

२—प्रत्यासत्तिः = सम्बन्धः।

३—**अस्यायमर्थः**—इन्द्रियेण चक्षुरादिना संयुक्तो यो धूमादिः स विशेष्यो यस्य ज्ञानस्य तज्ज्ञानम्—इन्द्रियसम्बद्धविशेष्यकम्। तत्र प्रकारीभूतं नाम विशेषणीभूतं धूमत्वम्, तेनैतेन सन्निकर्षेण 'धूमा' इत्येवं सकलधूमानामुपस्थितिर्जायते, तस्मात् धूमत्वस्याश्रयाणां धूमानामुपस्थितौ धूमत्वमेव सन्निकर्षः। विस्तरस्तु—मुक्तावलीप्रभायां द्रष्टव्यः।

प्रश्नाः—अलौकिकसन्निकर्षस्य के भेदाः? तत्र सामान्यलक्षण इत्यस्य कीदृशोऽर्थः? पूर्वपक्षीयसिद्धान्ते सामान्यलक्षणप्रत्यासत्तेर्लक्षणं लक्ष्ये योजयित्वा स्पष्टीकुरु?

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

बोध्यम्। तथाहि। यत्रेन्द्रियसंयुक्तो धूमादिस्तद्विशेष्यकं धूम इति ज्ञानं यत्र जातं तत्र ज्ञाने धूमत्वं प्रकारः। तत्र धूमत्वेन सन्निकर्षेण धूमा इत्येवंरूपं सकलधूमविषयकं ज्ञानं जायते। अत्र यदीन्द्रियसंबद्धमित्येवोच्यते तदा धूलीपटले धूमत्वभ्रमानन्तरं सकलधूमविषयकं ज्ञानं न स्यात् तत्र धूमत्वेन सहेन्द्रियसम्बन्धाभावात्। मन्मते तु इन्द्रियसम्बद्धं धूलीपटलं तद्विशेष्यकं धूम इति ज्ञानम्, तत्र प्रकारीभूतं धूमत्वं प्रत्यासत्तिः। इन्द्रियसम्बन्धश्च लौकिको ग्राह्यः। इदं च वहिरिन्द्रियस्थले। मानसस्थले तु ज्ञानप्रकारीभूतं सामान्यमात्रं [1]प्रत्यासत्तिः, अतः शब्दादिना यत्किञ्चित्पिशाचाद्युपस्थितौ मानसः सकलपिशाचादिबोध उपपद्यते॥ ६३॥

परंतु समानानां भावः सामान्यम्। तच्च क्वचिन्नित्यं धूमत्वादि, क्वचिच्चानित्यं घटादि। यत्रैको घटः † संयोगेन भूतले, समवायेन कपाले ज्ञातस्तदनन्तरं सर्वेषामेव तद्घटवतां भूतलादीनां कपालादीनां वा ज्ञानं भवति, [2]तत्रेदं बोध्यम्। [3]परंतु सामान्यं येन संबन्धेन ज्ञायते तेन सबन्धेनाधिकरणानां प्रत्यासत्तिः। किं तु यत्र तद्घटनाशानन्तरं [4]तद्घटवतः स्मरणं जातं तत्र सामान्यलक्षणया सर्वेषां तद्घटवतां भानं न स्यात्। सामान्यस्य तदानीमभावात्। [5]किंचेन्द्रियसम्बद्धविशेष्यकं

१—पूर्वोक्तरीत्या ज्ञानशब्देन पिशाचादिविषयकं शाब्दज्ञानमपि गृह्यते।

† भूतलं संयोगेन घटवत्, कपालः समवायेन घटवान्’ इत्याकारकलौकिकसाक्षात्कारद्वितीयक्षणे ‘सर्वाणि भूतलानि संयोगेन घटवन्ति, सर्वे कपालाः समवायेन घटवन्तः’ इत्याकारकमलौकिकं ज्ञानं जायते, तत्रेदं बोध्यम्=अर्थात् एतादृशस्थले ज्ञायमानमनित्यं घटादिरूपं सामान्यमेव प्रत्यासत्तिः।

२—एवंविधस्थले ज्ञायमानमनित्यसामान्यमेव प्रत्यासत्तिः। अर्थात् स्थलभेदेन लक्षणविभागकरणे ज्ञानपदेन शाब्दज्ञानमपि धर्तुं शक्यते, तत्र प्रकारीभूतं पिशाचत्वम्, तदेव मनोजन्यज्ञानप्रकारीभूतपिशाचत्ववत्तासम्बन्धेन सकलपिशाचविषयकाऽलौकिकसाक्षात्कारहेतुरित्यर्थः।

३—अन्यथा सववायसंबन्धेन ज्ञानप्रकारीभूतघटत्वादिसामान्यप्रत्यासत्त्या कालाकाशादिपदार्थानां ज्ञानस्याप्यापत्तिः—अलौकिकप्रत्यासत्त्या स्यात्।

४—तद्भूतलं घटवदासीत्—इत्याकारकं स्मरणं जातम्।

५—दूषणान्तरमाह अपरमपीति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

घट इति ज्ञानं यत्र जातं तत्र परदिने इन्द्रियसम्बन्धं विनापि तादृशज्ञानप्रकारीभूतसामान्यस्य सत्त्वात्तादृशज्ञानं कुतो न जायते, तस्मात्सामान्यविषयकं ज्ञानं प्रत्यासत्तिर्न तु सामान्यमित्याह—

आसत्तिराश्रयाणां तु सामान्यज्ञानमिष्यते ।

आसत्तिः प्रत्यासत्तिरित्यर्थः । तथाच सामान्यलक्षण इत्यत्र लक्षणशब्दस्य विषयोऽर्थः । तेन सामान्यविषयकं ज्ञानं प्रत्यासत्तिरित्यर्थो लभ्यते ।

ननु—चक्षुःसंयोगादिकं विनापि सामान्यज्ञानं यत्र वर्तते तत्र सकलघटादीनां चाक्षुषादिप्रत्यक्षं स्यादत आह—

तदिन्द्रियजतद्धर्मबोधसामग्र्यपेक्ष्यते ॥ ६४ ॥

अस्यार्थः । यदा बहिरिन्द्रियेण सामान्यलक्षणया ज्ञानं जननीयं तदा यत्किंचिद्धर्मिणि तत्सामान्यस्य तदिन्द्रियजन्यज्ञानस्य सामग्री अपेक्षिता । सा च सामग्री चक्षुःसंयोगालोकसंयोगादिकम् । तेनान्धकारादौ चक्षुरादिना तादृशं ज्ञानं न जायते ॥ ६३ ॥ ६४ ॥

ननु ज्ञानलक्षणा प्रत्यासत्तिर्यदि ज्ञानरूपा सामान्यलक्षणापि ज्ञानरूपा तदा तयोर्भेदो न स्यादत आह—

[1]विषयी यस्य तस्यैव व्यापारो ज्ञानलक्षणः ।

प्रश्नाः—सामान्यलक्षणायाः सिद्धान्तलक्षणं लिख ? कतिविधं च तत् सामान्यम् ? तत्र कीदृशी सामग्री अपेक्षिता ?

१—यस्य सौरभादेः=विषयी=ज्ञानम्, तस्यैव=सौरभादेः व्यापारः=सन्निकर्षः ज्ञानलक्षणा प्रत्यासत्तिरस्तीत्यर्थः । सुरभि चन्दनम्—इत्याकारकचाक्षुषज्ञाने सौरभं चन्दनं चदनत्वम्, एतत्त्रयं भासते । तत्र चन्दनचन्दनत्वयोर्यथाक्रमं नेत्रसंयोगेन तथा नेत्रसंयुक्तसमवायेन लौकिकप्रत्यक्षं भवति, परंतु सौरभांशे तादृशसाक्षात्कारजनकसंबन्धो दुर्घटस्तस्य चक्षुर्ग्राह्यत्वाभावात्, घ्राणग्राह्यत्वेपि घ्राणेन्द्रियस्यापि तदानीं सम्बन्धाभावात्, अतस्तद्ज्ञाननिर्वाहायाऽलौकिकः संनिकर्षः=चक्षुःसंयुक्तमनःसंयुक्तात्मसमवेतज्ञानरूपः कल्प्यते । स च पूर्वगृहीतसौरभस्य स्मरणरूपः । तस्य चक्षुर्निरूपितत्वं तु—चक्षुःसंयुक्तमनःसंयुक्तात्मसमवेतत्वाद्विज्ञेयम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सामान्य[1]लक्षणा प्रत्यासत्तिर्हि तदाश्रयस्य ज्ञानं जनयति । ज्ञानलक्षणा प्रत्यासत्तिस्तु यद्विषयकं ज्ञानं तस्यैव प्रत्यासत्तिरिति । अत्रायर्थः । प्रत्यक्षे संनिकर्षं विना भानं न संभवति । तथा च सामान्यलक्षणां विना धूमत्वेन सकलधूमानां वह्नित्वेन सकलवह्नीनां च भानं कथं भवेत्, तदर्थं सामान्यलक्षणा स्वीक्रियते । न च सकलवह्निधूमभानाऽभावे का क्षतिरिति वाच्यम्, प्रत्यक्षधूमे वह्निसम्बन्धस्य गृहीतत्वादन्यधूमस्य चानुपस्थितत्वाद्धूमो वह्निव्याप्यो नवेति संशयानुपपत्तेः । मन्मते तु सामान्यलक्षणया सकलधूमोपस्थितौ कालान्तरीयदेशान्तरीयधूमे [2]वह्निव्याप्यत्वसंदेहः संभवति । नच सामान्यलक्षणास्वीकारे प्रमेयत्वेन सकलप्रमेयज्ञाने जाते सार्वज्ञ्यापत्तिरिति वाच्यम्, प्रमेयत्वेन सकलप्रमेयज्ञाने जातेऽपि विशिष्य सकलपदार्थानामज्ञातत्वेन सार्वज्ञ्याभावात् । एवं ज्ञानलक्षणाया अस्वीकारे सुरभि चन्दनमिति ज्ञाने सौरभस्य भानं कथं स्यात् । यद्यपि सामान्यलक्षणयापि [3]सौरभभानं संभवति तथापि [4]सौरभत्वस्य भानं ज्ञानलक्षणया । एवं यत्र धूमत्वेन धूलीपटलं ज्ञातं तत्र धूलीपटलस्यानु[5]व्यवसाये भानं [6]ज्ञानलक्षणया ।

१—घटत्वादिधर्मविशिष्टस्यैकधर्मिणो लौकिकसाक्षात्कारो जातः, पश्चात्तद्धर्माश्रयभूतानां देशान्तरीयकालान्तरीययावद्धटानां ज्ञानं सामान्यलक्षणप्रत्यासत्तिद्वारा भवति ।

२—पर्वतो वह्निमान् नवेति संशयः ।

प्रश्नाः—सामान्यलक्षणाज्ञानलक्षणयोः परस्परं भेदं स्पष्टीकुरु ?

३—चाक्षुषे सौरभत्वप्रकारेण सकलसौरभस्य विषयत्वं सम्भवतीत्यर्थः तथाच—ज्ञानलक्षणा न स्वीकार्येति भावः ।

४—सौरभत्वजातिभानमित्यर्थः । कश्चित्तु—"सौरभत्वजातिभानम्" इत्येव मूलपाठः । जातिग्रहणं तादृशचाक्षुषे सौरभत्वस्य स्वरूपतो विषयत्वसंरक्षणाय । तथाच—तादृशप्रत्यक्षे सौरभत्वस्य स्वरूपत एव भानात् तस्य सामान्यप्रत्यासत्या अनिर्वाहादिति भाव इति प्राचीना **प्रभा** । **स्वरूपतः** इति किञ्चिद्रूपमनुल्लिख्येत्यर्थः । किञ्चिद्रूपमपुरस्कृत्य भानविषयतैव "निरवच्छिन्न विषयता.." इत्युच्यते इत्याद्यन्यत्र विस्तरः ।

५—ज्ञानविषयकं ज्ञानमनुव्यवसायः । व्यवसायगोचरं प्रत्यक्षमिति यावत् । यथा घटज्ञानानन्तरं "घटमहञ्जानामि" इति मानसं ज्ञानम् ।

६—ज्ञानलक्षणयेति—धूलीपटलेन सह मनसः लौकिकसन्निकर्षाभावात् स्वविषयधूमत्व-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

योगजो द्विविधः प्रोक्तो युक्तयुञ्जानभेदतः ॥ ६५ ॥

योगाभ्यासजनितो धर्मविशेषः श्रुतिपुराणादिप्रतिपाद्य इत्यर्थः। युक्तयुञ्जानभेदत इति। युक्तयुञ्जानरूपयोगिद्वैविध्याद्धर्मस्यापि द्वैविध्यमिति भावः ॥ ६५ ॥

युक्तस्य सर्वदा भानं चिन्तासहकृतोऽपरः।

युक्तस्य तावद्योगजधर्मसहायेन मनसा आकाशपरमाण्वादिनिखिलपदार्थगोचरं ज्ञानं सर्वदैव भवितुमर्हति। द्वितीयस्य चिन्ताविशेषोऽपि सहकारीति।

इति श्रीविश्वनाथपञ्चाननभट्टाचार्यविरचितायां सिद्धान्तमुक्तावल्यां प्रत्यक्षखण्डम्।

अनुमितिं व्युत्पादयति—

व्यापारस्तु परामर्शः करणं व्याप्तिधीर्भवेत् ॥ ६६ ॥

अनुमायां ज्ञायमानं लिङ्गं तु करणं नहि।

अनुमायामनुमितौ व्याप्तिज्ञानं करणम्। परामर्शो व्यापारः। तथाहि—येन पुरुषेण महानसादौ धूमे वह्नेर्व्याप्तिर्गृहीता पश्चात्स एव पुरुषः क्वचित्पर्वतादावविच्छिन्नमूलां धूमलेखां पश्यति। तदनन्तरं धूमो वह्निव्याप्य इत्येवंरूपं व्याप्तिस्मरणं भवति। पश्चाच्च वह्निव्याप्यधूमवानयमिति ज्ञानं भवति, स एव परामर्श इत्युच्यते। तदनन्तरं पर्वतो वह्निमानिति ज्ञानम्भवति, तदेवानुमितिः। अत्र प्राचीनास्तु व्याप्यत्वेन ज्ञायमानं लिङ्गमनुमितिकरणमिति वदन्ति। तद्दूषयति ज्ञायमानमिति।

अनागतादिलिङ्गेन न स्यादनुमितिस्तदा ॥ ६७ ॥

वत्तासम्बन्धेन सामान्यलक्षणायाः तत्राऽवर्त्तमानत्वात् ज्ञानलक्षणयैव निर्वाह इति भावः।

प्रश्नाः—सामान्यलक्षणयैव सौरभभाननिर्वाहे किमर्थं ज्ञानलक्षणास्वीकारः? योगजसन्निकर्षस्य भेदं सोदाहरणं प्रपञ्चय?।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

लिङ्गस्यानुमित्यकरणत्वे युक्तिमाह—अनागतादीति । * यद्यनुमितौ लिङ्गं करणं स्यात्तदाऽनागतेन विनष्टेन वा लिङ्गेन अनुमितिर्न स्यादनुमितिकरणस्य लिङ्गस्य तदानीमभावात् ॥६६॥६७॥

व्याप्यस्य पक्षवृत्तित्वधीः परामर्श उच्यते ।

व्याप्यस्येति । [1]व्याप्तिविशिष्टस्य पक्षेण सह वैशिष्ट्यावगाहिज्ञानमनुमितिजनकम् । तच्च [2]व्याप्यः पक्षे इति ज्ञानं पक्षो व्याप्यवानिति ज्ञानं वा । अनुमितिस्तु पक्षे व्याप्य इति ज्ञानात्पक्षे साध्यमित्याकारिका, पक्षो व्याप्यवानिति ज्ञानात्पक्षः साध्यवानित्याकारिका । द्विविधादपि परामर्शात्पक्षः साध्यवानित्येवानुमितिरित्यन्ये । ननु वह्निव्याप्यधूमवान्पर्वत इति ज्ञानं विनापि यत्र पर्वतो धूमवानिति प्रत्यक्षं ततो धूमो वह्निव्याप्य इति स्मरणं, तत्र ज्ञानद्वयादेवानुमितिदर्शनाद्व्याप्तिविशिष्टवैशिष्ट्यावगाहि ज्ञानं न सर्वत्र कारणं किन्तु व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानत्वेनैव कारणत्वस्यावश्यकत्वात्, तत्र विशिष्टवैशिष्ट्यज्ञानकल्पने गौरवाच्चेति चेन्न[3], व्याप्यता-

---

* यदीति—अस्यायमाशयः । व्याप्तिबलेन लीनमर्थं गमयतीति लिङ्गम्, नतु परामर्शः तस्य निर्व्यापरत्वेन व्यापारत्वाऽसम्भवात् इति मतं न युक्तम् अनागतेन=भविष्यता विनष्टेन=भूतेन लिङ्गेन अनुमित्यसम्भवात् । तथाच—इयं यज्ञशाला वह्निमती भविष्यति भाविधूमात् इयं यज्ञशाला वह्निमत्यासीत् भूतधूमात् इत्येवमनुमानं न स्यात् यदि ज्ञायमानलिङ्गमेव करणं स्यात्, अनुमितिकरणीभूतहेतोर्लिङ्गस्य अनागतादिदशायामभावात् । लिङ्गज्ञानस्य करणत्वे तु नैव दोष इति भावः ।

१—साध्यनिरूपित व्याप्तिविशिष्टस्य हेतोरित्यर्थः । **वैशिष्ट्यावगाहि** ज्ञानमिति—व्याप्त्यवच्छिन्नविषयतानिरूपितपक्षतावच्छेदकावच्छिन्नशालीति यावत् । भवति हि "वह्निव्याप्यधूमवान् पर्वत" इति ज्ञानं व्याप्त्यवच्छिन्नधूमादिनिष्ठविषयतानिरूपितपर्वतत्वाद्यवच्छिन्नविषयताशालीति लक्षणसमन्वयः ।

२—तादृशपरामर्शज्ञानस्यैव विशेषणविशेष्यभावव्यत्यासेन स्वरूपद्वयमस्ति । तत्रैकं पक्षप्रकारकं व्याप्तिविशिष्टविशेष्यकं व्याप्यः पक्षे इत्याकारकम् । द्वितीयं व्याप्तिविशिष्टप्रकारकं पक्षविशेष्यकं पक्षो व्याप्यवान् इत्याकारकम् । प्रथमपरामर्शेन पक्षप्रकारकं साध्यविशेष्यकं पक्षे साध्यमिति अनुमितिज्ञानं जायते । द्वितीयेन साध्यप्रकारकं पक्षविशेष्यकं पक्षः साध्यवान् इत्याकारकं ज्ञानम् ।

३—"अयमालोको धूमो वा" इत्याकारकसन्देहस्थले व्याप्यतावच्छेदकप्रकारकनिर्णयाऽभावेपि वह्न्यभाववदवृत्तिमानयमित्याकारकज्ञानादपि अनुमितिदर्शनाद् व्याप्यतावच्छेदकेत्यादि व्यभिचरितमेवातः सर्वत्र कारणं वक्तुं न शक्यते ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वच्छेदकाऽज्ञानेऽपि वह्निव्याप्यवानिति ज्ञानादनुमित्युत्पत्तेर्लाघवाच्च व्याप्तिप्रकारकपक्षधर्मताज्ञानत्वेनैव हेतुत्वम् । किंच–धूमवान्पर्वत इतिज्ञानादनुमित्यापत्तिः, व्याप्यतावच्छेदकीभूतधूमत्वप्रकारकपक्षधर्मताज्ञानस्य सत्त्वात् । न च तदानीं गृह्यमाणव्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानस्य हेतुत्वमिति वाच्यम्, चैत्रस्य व्याप्तिग्रहे मैत्रस्य पक्षधर्मताज्ञानादनुमितिः स्यादिति । यदि तु तत्पुरुषीयगृह्यमाणव्याप्यतावच्छेदकप्रकारकं तत्पुरुषीयपक्षधर्मताज्ञानं तत्पुरुषीयाऽनुमितौ हेतुरित्युच्यते, तदाऽनन्तकार्यकारणभावः । मन्मते तु समवायसम्बन्धेन व्याप्तिप्रकारकपक्षधर्मताज्ञानं समवायसम्बन्धेनानुमितिं जनयतीति नानन्तकार्यकारणभावः । यदि तु व्याप्तिप्रकारकं ज्ञानं पक्षधर्मताज्ञानं च स्वतन्त्रं कारणमित्युच्यते, तदा कार्यकारणभावद्वयं, वह्निव्याप्यो धूम आलोकवान् पर्वत इति नाज्ञादप्यनुमित्यापत्तिः स्यात् । इत्थं च यत्र ज्ञानद्वयं तत्रापि

१—लाघवाच्चेति । व्याप्यतावच्छेदकप्रकारकत्वापेक्षया व्याप्तिप्रकारकपक्षधर्मताज्ञानत्वेन कारणतायां लाघवं तु कारणतावच्छेदककोटाववच्छेदकधर्मप्रवेशाद्बोध्यम् । पुनर्मीमांसकः शंकते:—"त्वयावच्छेदकस्य लाघवं दर्शितं, परन्तु पूर्वोक्तज्ञानद्वयम्, परामर्शश्चेति ज्ञानत्रयं त्वया स्वीकर्त्तव्यमिति तदपेक्षयाऽस्मन्मते परं लाघवमस्ति" इति । तम्प्रति नैयायिक उत्तरयति–किंचेति—व्याप्त्यनवगाहि "धूमवान् पर्वतः" इत्याकारकज्ञानादप्यनुमितिः स्यात्तव मते, एतादृशं ज्ञानमपि व्याप्यतावच्छेदकीभूतधूमत्वप्रकारकपक्षधर्मताज्ञानरूपमेव ।

२ नचेति–अनुमितिज्ञानाऽव्यवहितपूर्वकाले चक्षुरादिना अर्थात् संयुक्तसमवायसम्बन्धेन ज्ञातं यद्व्याप्यतावच्छेदकं, तत्प्रकारकपक्षधर्मताज्ञानत्वेन हेतुताऽस्तु, तथाच–कालान्तरीयं तादृशज्ञानमादाय न दोषः । केषुचिद् ग्रन्थेषु "तदानीम्" इति पाठो नास्ति ।

३—यदि त्विति । **मीमांसक आह**—व्याप्तिप्रकारकं यत्पक्षधर्मताज्ञानं तत्त्वेन, पक्षधर्मताविषयकं यद्व्याप्तिप्रकारकं ज्ञानं तत्त्वेनेत्येवं विशेष्यविशेषणभावव्यत्यासेन विशिष्टज्ञानस्य कारणत्वे कार्यकारणभावद्वयं विनिगमनाविरहेण तवापि स्थित एव । **नैयायिक आह**—एवं कार्यकारणभावस्तु स्वीकर्त्तव्य एव, परन्तु तव मते "वह्निव्याप्यो धूमः" तथा "आलोकवान् पर्वतः" इति ज्ञानद्वयादप्यनुमितिः स्यात् ? कस्माद् भवदुक्तरीत्या अत्रापि व्याप्तिप्रकारकं ज्ञानं तथा पक्षधर्मताज्ञानं कारणरूपेण विद्यमानमेव । पुनः **मीमांसकः** शङ्कते—तव मतेऽपि पूर्वोक्तज्ञानद्वयेनानुमितिः कस्मान्न भवति ।

४—अस्योत्तरमाह इत्थं चेति नैयायिकः । मम मते व्याप्तिप्रकारतानिरूपितपक्षनिष्ठविशेष्यताशालिज्ञानत्वेनानुमितिं प्रति हेतुता विवक्षिता । अतः "वह्निव्याप्यो धूमः" आलोकवान्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विशिष्टज्ञानं कल्पनीयं फलमुखगौरवस्यादोषत्वात् ।

व्याप्तिः साध्यवदन्यस्मिन्नसम्बन्ध उदाहृतः ॥ ६८ ॥

व्याप्यो नाम व्याप्त्याश्रयः, तत्र का व्याप्तिरित्यत आह व्याप्तिरिति । साध्यवदन्येति । वह्निमान् धूमादित्यादौ साध्यो वह्निः साध्यवान्महानसादिः तदन्यो जलहृदादिः तदवृत्तित्वं धूमस्येति लक्षणसमन्वयः । धूमवान् वह्नेरित्यादौ साध्यवदन्यस्मिंस्तप्तायःपिण्डादौ वह्नेः सत्त्वान्नातिव्याप्तिः । अत्र येन सम्बन्धेन साध्यं तेनैव संबन्धेन साध्यवान्बोध्यः । अन्यथा समवायसंबन्धेन *वह्निमान्वह्नेरवयवस्तदन्यो महानसादिस्तत्र विद्यमानत्वादव्याप्तिप्रसङ्गात् । साध्यवदन्यश्च साध्यवत्त्वावच्छिन्नप्रतियोगिताकभेदवान्बोध्यः । 'तेन

पर्वतः" इत्याकारकज्ञानद्वयादनुमित्यापत्तिर्न स्यात् । एतत्स्थलद्वयेऽपि व्याप्तिप्रकारतानिरूपितधूमनिष्ठविशेष्यताया पर्वतनिष्ठविशेष्यतानिरूपिप्रकारतात्वाऽभावात् अतो ज्ञानद्वयस्थलेऽपि परामर्शात्मकविशिष्टज्ञानस्य कल्पना कर्त्तव्यैव ।

प्रश्नाः—परामर्शस्य किं लक्षणम् ? तदाकारश्च कीदृशः ? द्विविधपरामर्शादेकाकाराऽनुमितिर्भिन्नाकारा वा ? अत्र मीमांसकस्य कथमाक्षेपः ? नैयायिकस्य कथं परिहारः ? द्वयोर्मतयोः किन्ते युक्तियुक्तमाभाति ?

१—"नासङ्गतं प्रयोक्तव्यम्" इत्यभियुक्तोक्तेः उपोद्घातसङ्गत्या व्याप्तिस्वरूपं निरूपयितुमाह—"व्याप्यो नाम" इति । "चिन्तां प्रकृतसिद्ध्यर्थामुपोद्घातं विदुर्बुधाः" इति ।

२—वाक्यार्थबुद्धौ पदार्थबुद्धेर्हेतुत्वात् व्याप्यघटकीभूता व्याप्तिरेव तावत् कः पदार्थ इति पृच्छति—**तत्र** केति । *"**वन्हेरवयव**" इति । अवयवावयविनोः समवायाद् अवयवेष्ववयविनोवृत्तेर्निष्प्रत्यूहत्वादिति—भावः । **अव्याप्ति**प्रसङ्गादिति—साध्यसाध्यवतोरेकसम्बन्धविवक्षणे तु नोक्तदोषावसर इति भावः ।

प्रश्नाः—(पूर्वपक्षीय) व्याप्तेः किं लक्षणम् ? कथञ्चोदाहरणे तत्सङ्गतिः ? उक्तलक्षणस्य "धूमवान् वन्हे" रित्यत्र कुतो नातिव्याप्तिः । उक्तलक्षणे "साध्यवदन्य" पदेन कीदृशी विवक्षा ? किञ्च तस्याः फलम् ? अथवा—तादृशविवक्षाया अकरणे कुत्र दोषः ?

३—साध्यवदन्यश्चेति—अर्थात् **साध्यतावच्छेदक**—संबन्धावच्छिन्नसाध्यवत्त्वावच्छिन्नप्रतियोगिकभेदाधिकरणनिरूपितवृत्तित्वाभावो व्याप्तिरिति व्याप्तिलक्षणे—साध्यवदन्यशब्देन यावत्साध्यवत्सु स्थितो यः साध्यवत्त्वरूपो धर्मस्तद्धर्मावच्छिन्नप्रतियोगिताकभेदवान् बोध्यः । अन्यथा वह्निमान् धूमादित्यत्र पुनरप्यव्याप्तिः । यत्किंचिच्छब्देन वह्नेरधिकरणं पर्वतो वा महानसादिर्वाऽपि गृहीतुं शक्यते, ततो भिन्नो द्वितीयः पर्वतो गोष्ठादिर्वाऽप्यस्ति, तत्र धूमरूपहेतोर्वृत्तित्वमेव वृत्तित्वाभावो नास्तीति—अव्याप्तिः । साध्यवत्त्वावच्छिन्नपदेन साध्यवत्त्वरूपधर्मावच्छिन्नसाध्यवद्यावदधिकरणानां ग्रहणेन तद्भिन्नं जलहृदाद्येव भविष्यति, तन्निरूपितवृत्तित्वाभावो धूमे वर्त्तते ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

यत्किंचिद्वह्निमतो महानसादेर्भिन्ने पर्वतादौ धूमस्य सत्त्वेऽपि न क्षतिः । येन संबन्धेन हेतुता तेनैव संबन्धेन साध्यवदन्यावृत्तित्वं बोध्यम् । तेन साध्यवदन्यस्मिन्धूमावयवे धूमस्य समवायसंबन्धेन सत्त्वेऽपि न क्षतिः । साध्यवदन्यावृत्तित्वं च साध्यवदन्यवृत्तित्वत्वावच्छिन्नप्रतियोगिताकाभावः, तेन धूमवान् वह्नेरित्यत्र साध्यवदन्यजलह्रदादिवृत्तित्वाभावेऽपि नातिव्याप्तिः । अत्र यद्यपि द्रव्यं गुण-

---

१—सम्बन्धेनेति । प्रकृते येन संबन्धेन हेतुता विवक्षिता, साध्यवद्भिन्नाधिकरणेऽवृत्तित्वमपि तस्य हेतोस्तेनैव संबन्धेनोचितम् । अन्यथा वह्निमान् धूमादित्यत्र पुनरप्यव्याप्तिः । कुतः वृत्तितायां हेतुतावच्छेदकसंबन्धाऽनिवेशे साध्यवत्त्वावच्छिन्नप्रतियोगिताकभेदाधिकरणं धूमरूपहेतोरवयवोऽपि वक्तुं शक्यते, तत्र धूमरूपहेतोः समवायसंबन्धेन वृत्तित्वमस्ति वृत्तित्वाभावो नास्तीत्यव्याप्तिः । यदि साध्यवद्भेदाधिकरणनिरूपितवृत्तितायां हेतुतावच्छेदकसंबन्धो निवेश्येत तदा हेतुतावच्छेदकसम्बन्धः संयोगः, परंतु संयोगसंबन्धेन धूमरूपो हेतुर्न स्वावयवेषु तिष्ठति नच जलह्रदादिषु तिष्ठति, किं तु स्वसाध्यवह्निना सह पर्वतादावेव तिष्ठतीति नाव्याप्ति शङ्कापि । साध्यतावच्छेदकसंबन्धावच्छिन्नसाध्यवत्त्वावच्छिन्नप्रतियोगिताकभेदाधिकरणनिरूपिता या हेतुतावच्छेदकसंबन्धावच्छिन्ना वृत्तिता, तादृशवृत्तित्वाभावो व्याप्तिः ।

२—साध्यवदन्यावृत्तित्वं चेति—अत्र हेतोः साध्यवद्भेदाधिकरणेऽवृत्तितापि साध्यवद्भेदाधिकरणत्वावच्छिन्नेऽपेक्षितास्ति । अन्यथा 'धूमवान् वह्नेः' अत्रातिव्याप्तिः स्यात्, साध्यवद्भिन्नो जलह्रदादिस्तत्र वह्निरूपहेतोरवृत्तित्वात् । यदि साध्यवद्भेदाधिकरणत्वावच्छिन्ननिरूपितवृत्तित्वाभावो विवक्षितस्तदा साध्यवद्भेदाधिकरणं यथा जलह्रदस्तथा तप्तायपिण्डोऽपि, तत्र वह्निरूपहेतोर्वृत्तित्वमस्ति वृत्तित्वाभावो नास्तीति नातिव्याप्तिः । साध्यतावच्छेदकसंबन्धावच्छिन्नसाध्यवत्त्वावच्छिन्नप्रतियोगिताकभेदाधिकरणत्वावच्छिन्ननिरूपितहेतुतावच्छेदकसंबन्धावच्छिन्नवृत्तित्वाभावो व्याप्तिरिति फलितम् ।

३—अत्रेति—अत्र = साध्यवद्भेदाधिकरणे हेतोर्हेतुतावच्छेदकरूपेणाऽवृत्तित्वं विवक्षितम् । अर्थात् हेतुतावच्छेदको यो धर्मः स तादृशसाध्यवद्भेदाधिकरणनिरूपितवृत्तितानवच्छेदको बोध्यः । यद्येवं नोच्येत तर्हि "इदं द्रव्यत्ववत् गुणकर्मान्यत्वविशिष्टसत्त्वात्, अत्राव्याप्तिः । तथाहि—गुणकर्मभेदविशिष्टसत्ता केवलं द्रव्ये तिष्ठति, शुद्धसत्ता च द्रव्यगुणकर्मसु, तयोः "विशिष्टं शुद्धान्नातिरिच्यते" इति न्यायेन परस्परं भेदो वक्तुं न शक्यते । तथाच—साध्यवत्—द्रव्यं तत्प्रतियोगिकभेदाधिकरणं गुणकर्मादि, तत्र विशिष्टसत्तायाः वृत्तितास्ति वृत्तिताभावो नास्तीति । यदि हेतुतावच्छेदकधर्मस्य साध्यवद्भेदाधिकरणनिरूपितवृत्तितानवच्छेदकत्वं विवक्ष्येत तदा न व्याप्तिः । तथाहि—हेतुतावच्छेदकधर्मः—गुणकर्मान्यत्वविशिष्टसत्तात्वरूपः, स च साध्यवद्भेदाधिकरणनिरूपितवृत्तितानवच्छेदकः एवंरीत्या भवितुमर्हति, यद्यपि गुणकर्मभेदविशिष्टसत्तायाः शुद्धसत्तायाश्चैक्यात्—हेत्वधिकरणं गुणकर्म भवति तथापि गुणकर्मान्यत्वविशिष्टसत्तात्वेन रूपेण विशिष्टसत्ता गुणकर्मसु न तिष्ठति अपितु द्रव्य एव । एवं साध्यवद्भेदाधिकरणगुणकर्मादिकेषु

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कर्मान्यत्वविशिष्टसत्त्वादित्यादौ विशिष्टसत्तायाः शुद्धसत्तायाश्चैक्यात्, साध्यवदन्यस्मिन्गुणादाववृत्तित्वं नास्ति। तथापि हेतुतावच्छेदकरूपेणाऽवृत्तित्वं वाच्यम्। हेतुतावच्छेदकं तादृशवृत्तितानवच्छेदकमिति फलितोऽर्थः ॥ ६८ ॥

ननु—केवलान्वयिनि ज्ञेयत्वादौ साध्ये साध्यवदन्यस्याऽप्रसिद्धत्वादव्याप्तिः। किंच सत्तावान् जातेरित्यादौ साध्यवदन्यस्मिन्सामान्यादौ हेतुतावच्छेदकसम्बन्धेन समवायेन वृत्तेरप्रसिद्धत्वादव्याप्तिश्चात आह—

अथवा हेतुमन्निष्ठविरहाऽप्रतियोगिना।
साध्येन हेतोरैकाधिकरण्यं व्याप्तिरुच्यते ॥६९॥

हेतुमति निष्ठा वृत्तिर्यस्य स तथा विरहोऽभावः, तथा च हेत्वधिकरणवृत्तिर्योऽभावः तदप्रतियोगिना साध्येन सह हेतोः सामानाधिकरण्यं व्याप्तिरुच्यते। अत्र यद्यपि वह्निमान् धूमादित्यादौ हेत्वधिकरणपर्वतादिवृत्त्यभावप्रतियोगित्वं तत्तद्वह्न्यादेरस्ती-

---

वृत्तिता गुणत्वकर्मत्वादिधर्माणामस्ति, वृत्तितावच्छेदकं गुणत्वत्वादिरूपो धर्मः—अनवच्छेदकं गुणकर्मान्यत्वविशिष्टसत्तात्वरूपो धर्मः—अतो नाव्याप्तिः।

१—ऐक्यादिति। "विशिष्टं शुद्धान्नातिरिच्यते" इत्युक्तयुक्तेः गुणकर्मभेदाविशिष्टद्रव्यवृत्तिसत्तायाः द्रव्यगुणकर्मवृत्तिशुद्धसत्तायाश्च परस्परमभेदप्रतीतेः सर्वसिद्धत्वादित्याशयः।

२—"तादृशवृत्तितानवच्छेदकम्" इति। वृत्तिता=गुणकर्मादिवृत्तिता, तदवच्छेदकत्वं गुणत्वत्वस्य कर्मत्वत्वस्य, अनवच्छेदकत्वन्तु विशिष्टसत्तायाः।

३—साध्यतावच्छेदक—सम्बन्धावच्छिन्नसाध्यवत्त्वावच्छिन्नप्रतियोगिताकभेदाधिकरणनिरूपितहेतुतावच्छेदकसम्बन्धावच्छिन्नवृत्तित्वाभावो व्याप्तिरित्यस्य—इदं वाच्यत्ववत् ज्ञेयत्वात्, इत्यत्राव्याप्तिः। सत्तावान् जातेः इत्यत्राप्यव्याप्तिः। साध्यवद्-द्रव्यगुणकर्म, साध्यवद्भेदाधिकरणं सामान्यविशेषादि, तत्र हेतुतावच्छेदकसमवायसम्बन्धेन यदि वृत्तित्वं कस्यचित् स्यात्तदा तत्सम्बन्धावच्छिन्नवृत्तित्वाभावो जातिरूपहेतोः स्यात्, परन्तु तत्र समवायसम्बन्धावच्छिन्नावृत्तिताऽप्रसिद्धा।

४—उक्तलक्षणमपि "पर्वतो वह्निमान् धूमात्" इत्यत्राव्याप्तम्—हेत्वधिकरणपर्वतादौ महानसीयवह्नेरभावः—तथा महानसे चत्वरीयवह्नेरभावः—तत्र गोष्ठीयवह्नेरभावः—तदभावाप्रतियोगि वह्निरूपं साध्यं नास्ति किन्तु प्रतियोग्येव, अतस्तत्राव्याप्तिर्बोध्या।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

त्यव्याप्तिः । न च[1] समानाधिकरणवह्निधूमयोरेव व्याप्तिरिति वाच्यम्, तत्तद्वह्न्यादेरप्युभयाभावसत्त्वादेकसत्त्वेऽपि द्वयं नास्तीति-प्रतीतेः[2] । गुणवान्[3] द्रव्यत्वादित्यादावव्याप्तिश्च, तथापि प्रतियोगि-तानवच्छेदकं यत्साध्यतावच्छेदकं तदवच्छिन्नसामानाधिकरण्यं व्याप्तिरिति वाच्यम् । ननु[4] रूपत्वव्याप्यजातिमत्वान् पृथिवीत्यादि-

---

१—न चेति—तद्धेत्वधिकरणवृत्तिर्योऽत्यन्ताभावः—तदप्रति योगि यत्साध्यं, तेन सह हेतोः सामानाधिकरण्यं व्याप्तिरिति ममाशयः । अर्थात् पर्वतीयधूमन सह पर्वतीयवह्नेर्व्याप्तिः । महानसीयधूमेन सह महानसीयवह्नेर्व्याप्तिः । एवंच हेत्वधिकरणपर्वतादौ महानसीयादिवह्नेरभावे गृहीतेऽपि तत्प्रतियोगी महानसीयवह्निः—अप्रतियोगी पर्वतीयवह्निस्तेन सह पर्वतीयधूमस्य सामानाधिकरण्यान्नाव्याप्तिः ।

२ तत्तद्वह्न्यादेरिति—तथापि वह्निमान् धूमात् इत्यत्राव्याप्तेर्वारणं नास्ति । तथाहि—"एकसत्त्वे द्वयं नास्ति" इति प्रतीत्या पर्वते पर्वतीयवह्निसत्त्वेऽपि वह्निघटद्वयं नास्तीति वक्तुं शक्यते तादृशाभावस्य पर्वतीयवह्निरपि प्रतियोगी, अप्रतियोगिनः साध्यस्याभावादव्याप्तिरूपो दोषो भवति । तद्वारणाय हेत्वधिकरणवृत्त्यभावीयप्रतियोगिता व्यासज्यवृत्तिधर्मानवच्छिन्ना विवक्षिता । उभयव्यक्तिवृत्तिधर्मो यः स व्यासज्यवृत्तिधर्मः इत्युच्यते । प्रकृते—हेत्वधिकरणे "वह्निघटद्वयं नास्ति" इत्याकारकाभावीयप्रतियोगिता व्यासज्यवृत्तिधर्मानवच्छिन्ना नास्ति, किन्तु वह्निघटोभयस्मिन् वर्त्तमानो यो वह्निघटोभयत्वरूपो व्यासज्यवृत्तिधर्मस्तदवच्छिन्नास्ति । तस्माद्वह्निघटोभयस्याभावं गृहीत्वा लक्षणे दूषणदानं नोचितं भाति । किंतु शुद्धघटाभावं गृहीत्वा लक्षणसमन्वयः कर्त्तव्यः । लक्षणञ्चेत्थं सम्पद्यते—हेत्वधिकरणवृत्तिव्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताकात्यन्ताभावाप्रतियोगिसाध्येन सह हेतोः सामानाधिकरण्यं व्याप्तिः" इति ।

३ गुणवानिति—गुणवान्—द्रव्यत्वादत्राव्याप्तिः । हेत्वधिकरणे रक्तघटे पीतगुणस्याभावः । पीतघटे श्वेतगुणस्याभावः । तदभावस्य प्रतियोगि गुणरूपं साध्यमप्रतियोगि नास्तीति लक्षणस्याव्याप्तिः । तद्वारणाय साध्यं हेत्वधिकरणवृत्त्यभावाप्रतियोगिरूपमपेक्ष्यते इति नोच्यते किंतु साध्यतावच्छेदकधर्मो हेत्वधिकरणवृत्त्यभावीप्रतियोगितानवच्छेदको गृह्यते । तथाच गुणवान् द्रव्यत्वादत्राव्याप्तिर्न भविष्यति, साध्यतावच्छेदकधर्मो गुणत्वरूपः स तु हेत्वधिकरणवृत्त्यभावीयप्रतियोगिताया अनवच्छेदकः अनया रीत्या ज्ञेयः—हेत्वधिकरणघटे गुणत्वेन गुणो नास्तीत्येवंरीत्याऽभावो ग्रहीतुं न शक्यते घटस्य द्रव्यत्वात् तत्र कोऽपि गुणः अवश्यमेव तिष्ठति । एवं यदि हेत्वधिकरणवृत्त्यभावो नीलगुणाभावः पीतगुणाभावो वा गृह्यते, तदभावीयप्रतियोगिता नीलपीतगुणनिष्ठास्ति, तत्प्रतियोगिताया अवच्छेदकधर्मो नीलगुणत्वपीतगुणत्वादिः, अनवच्छेदकं साध्यतावच्छेदकं शुद्धगुणत्वमिति न दोषः ।

४—नन्विति—ननु रूपत्वव्याप्यजातिमत्वान् पृथिवीत्वादित्यत्राव्याप्तिः । रूपत्वव्याप्यजातिमन्तो नीलपीतादिगुणा अत्र साध्याः सन्ति—नीलपीतादिगुणेषु स्थिता नीलत्वपीतत्वादिजातयस्तत्र साध्यतावच्छेदिकाः । एवं हेत्वधिकरणरक्तश्वेतादिगुणयुक्तघटपटादिषु सप्तविधरूपेषु मध्ये कस्यचिदभावोऽपि सम्भवति, तादृशाभावीयप्रतियोगितावच्छेदिका एव नीलत्वपीत वा दिजातयः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

त्यादौ साध्यतावच्छेदिका रूपत्वव्याप्यजातयस्तासां च शुक्लत्वादि-जातीनां नीलघटादिवृत्त्यभावप्रतियोगितावच्छेदकत्वमस्तीत्यव्याप्ति-रिति चेन्न, तत्र परम्परया रूपत्वव्याप्यजातित्वस्यैव साध्यता-वच्छेदकत्वात् । नहि तादृशधर्मावच्छिन्नाभावः क्वापि पृथिव्या-मस्ति । रूपत्वव्याप्यजातिमान्नास्तीति बुद्ध्यापत्तेः । एवं दण्ड्या-दिसाध्ये परम्परासम्बद्धं दण्डत्वादिकमेव साध्यतावच्छेदकं तच्च प्रतियोगितानवच्छेदकमिति । [3]साध्यादिभेदेन व्याप्तेर्भेदात्तादृश-

---

अनवच्छेदिका न भवन्तीत्यव्याप्तिः । **समाधानन्तु**—अत्र रूपत्वव्याप्यजातिषु स्थितस्य तादृश-स्वाश्रयसमवायरूपपरम्परासम्बन्धेन साध्यतावच्छेदकत्वं मन्यते । स्वशब्देनात्र रूपत्वव्याप्यजातित्वं गृह्यते । तदाश्रया रूपत्वव्याप्यनीलत्वपीतत्वादिजातयः सन्ति, तासां नीलपीतादिगुणेषु समवायः । अग्रे नीलपीतादिगुणा द्रव्येषु समवायसम्बन्धेन साध्याः सन्ति । एवं रूपत्वव्याप्य-जातित्वरूपो धर्मः स्वाश्रयसमवायसम्बन्धेन नीलपीतादिगुणेषु स्थितः सन् साध्यतावच्छेदको भवति । एवं हेत्वधिकरणरक्तघटादिवृत्त्यभावो नीलत्वजातिमदभावः पीतत्वजातिमदभावः—तादृशाभावीयप्रतियोगिता नीलपीतादिगुणेषु—प्रतियोगिताया अवच्छेदको नीलत्वपीतत्वादिधर्मः स एव रूपत्वस्य व्याप्यजातिरूपः—तासु सर्वासु स्थितो यो रूपत्वव्याप्यजातित्वरूपो धर्मः, स एव साध्यतावच्छेदकः सन् धर्मस्तादृशाभावीयप्रतियोगिताया अनवच्छेदकोऽप्यस्ति । रूपत्व-व्याप्यजातित्वावच्छिन्नवदभावस्य कस्यामपि (घटपटादिरूपायां पृथिव्यां) दर्शयितुमशक्यत्वात् ।

१—एवमिति—मठो दण्डिमान् दण्डिसंयोगात्—इत्यादिषु परम्परासम्बन्धाश्रयणेन नास्त्येव दोषः, यद्यसौ सम्बन्धो न स्वीक्रियेत तदा दण्डिसंयोगरूपहेतोरधिकरणमनुयोगितासम्बन्धेन मठोऽस्ति तत्र वृद्धदण्डी नास्ति, युवदण्डी नास्ति, इत्याकारकस्तत्तदभावो भविष्यति । तत्तदभावीयप्रति-योगिता तत्तद्दण्डिनिष्ठा, प्रतियोगितावच्छेदको धर्मो दण्डः, स एव साध्यतावच्छेदकः—अनवच्छेदको नास्तीत्यव्याप्तिः । परन्तु स्वसमवायिसंयोगरूपपरम्परासम्बन्धेन दण्डत्वरूपो धर्मो यदि साध्यतावच्छेदको मन्येत तदा दोषो नास्ति । अत्र स्वशब्देन दण्डत्वरूपो धर्मो गृह्यते तस्य समवायी दण्डः—तस्य पुरुषे संयोगः—एतादृशसम्बन्धेन दण्डत्वधर्मः साध्यतावच्छेदकः । अभावीयप्रतियोगिताया अनवच्छेदकोऽप्यस्तीति नाऽव्याप्तिः ।

२—**साध्यादिभेदेनेति**। एतादृशस्थले लक्षणान्तरमेव कर्त्तव्यमित्यर्थः । तथाहि—हेत्वधिकरणवृत्त्यभावीयप्रतियोगितावच्छेदकतानवच्छेदकं यत् साध्यतावच्छेदकतावच्छेदकं तदव-च्छिन्नावच्छिन्नसाध्यसामानाधिकरण्यं व्याप्तिः । घटो रूपत्वव्याप्यजातिमत्वान् पृथिवीत्वात् । मठो दण्डिमान् दण्डिसंयोगात् इत्युभयत्रापि लक्षणस्य समन्वयः । पूर्वोक्तरीत्या हेत्व-धिकरणवृत्त्यभावीयप्रतियोगिता रूपत्वव्याप्यजातिमत्तत्तन्नीलपीतादिरूपेषु तत्तद्दण्डिषु च तिष्ठति तादृशप्रतियोगिताया अवच्छेदिका रूपत्वव्याप्यनीलत्वपीतत्वादिजातयः—दण्डश्च अभावीयप्रति-योगिताया अवच्छेदकताया अनवच्छेदकस्तथा साध्यतावच्छेदकताया अवच्छेदकः—रूपत्वव्याप्य-जातित्वं तथा दण्डत्वमस्ति, तदवच्छिन्ना रूपत्वव्याप्यजातयः—तथा दण्डः—तदवच्छिन्नाल-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

स्थले साध्यतावच्छेदकतावच्छेदकं प्रतियोगितावच्छेदकतानवच्छेदकमित्येव लक्षणघटकमित्यपि वदन्ति। [1]हेत्वधिकरणं च हेतुतावच्छेदकविशिष्टाधिकरणं वाच्यं, तेन द्रव्यं गुणकर्मान्यत्वविशिष्टसत्त्वादित्यादौ शुद्धसत्ताधिकरणगुणादिनिष्ठाभावप्रतियोगित्वेऽपि द्रव्यत्वस्य नाव्याप्तिः। एवं [2]हेतुतावच्छेदकसम्बन्धेन हेत्वधिकरणं बोध्यम्। तेन समवायेन धूमाधिकरणतदवयवनिष्ठाभावप्रतियोगित्वेऽपि वह्नेर्नाव्याप्तिः। [3]अभावश्च प्रतियोगिव्यधिकरणो बोध्यः। तेन कपिसंयोगी एतद्वृक्षत्वादित्यत्र मूलावच्छेदेनैव एतद्वृक्षवृत्ति-

---

पीतादिगुणाः—तथा दण्डो—एतद्द्वयं यथाक्रमं समवायेन संयोगेन च साध्यमस्ति। तादृशसाध्येन सह पृथिवीत्वरूपहेतोः—तथा दण्डिसंयोगरूपहेतोश्च सामानाधिकरण्यमस्ति। एवं व्याप्तिलक्षणसङ्गतौ परम्परासम्बन्धेनावच्छेदकस्य न किञ्चित्प्रयोजनमाभाति।

१—**हेत्वधिकरणं चेति**—हेत्वधिकरणवृत्त्यभावीयप्रतियोगितानवच्छेदकं यत् साध्यतावच्छेदकं तदवच्छिन्नसाध्यसामानाधिकरण्यं व्याप्तिरिति लक्षणे हेत्वधिकरणमपि हेतुतावच्छेदको यो धर्मस्तद्विशिष्टाधिकरणं ग्राह्यम्। अन्यथा—"द्रव्यं गुणकर्मान्यत्वविशिष्टसत्त्वात्" इत्यत्राव्याप्तिः। विशिष्टं शुद्धान्नातिरिच्यत इति न्यायेन विशिष्टसत्तायाः शुद्धसत्तायाश्चैकरूपत्वेन तदधिकरणं गुणकर्माण्यपि, तद्वृत्तिर्योऽभावः—द्रव्यत्वं नास्तीत्याकारकः—तादृशाभावीयप्रतियोगिताया अवच्छेदक एव द्रव्यत्वत्वरूपः साध्यतावच्छेदकः अनवच्छेदको न भवतीत्यव्याप्तिः। परन्तु—हेत्वधिकरणता यदि हेतुतावच्छेदकविशिष्टाधिकरणता गृह्यत तदा नास्त्यव्याप्तिः। यद्यपि गुणकर्मान्यत्वविशिष्टसत्ता शुद्धसत्ताया भिन्ना नास्ति, तथापि गुणकर्मान्यत्वविशिष्टसत्तात्वेन विशिष्टसत्ता भिन्नैवास्ति तस्या अधिकरणं केवलं द्रव्यं वर्त्तते, तत्र द्रव्यत्वरूपसाध्यस्याभावो नास्ति किंतु घटाद्यभाव इति कृत्वा लक्षणसमन्वयः। लक्षणन्तु—**हेत्वधिकरण**—वृत्त्यभावीयप्रतियोगितानवच्छेदकं यत्साध्यतावच्छेदकं तदवच्छिन्नसाध्येन सह सामानाधिकरण्यं व्याप्तिरिति जातम्।

२—हेतुतावच्छेदकसम्बन्धेनेति—प्रकृतलक्षणस्य वह्निमान् धूमादित्यत्राव्याप्तिः। समवायसम्बन्धेन धूमरूपहेतोः—अधिकरणं धूमावयवाः सन्ति, तत्र वर्त्तमानस्याभावस्य प्रतियोगी वह्निरूपः साध्योऽस्ति, प्रतियोगितावच्छेदको वह्नित्वरूपो धर्मः—अनवच्छेदको नेत्यव्याप्तिः। यदि हेतोर्हेतुतावच्छेदकसम्बन्धेन विवक्षा क्रियते तदा न दोषः। हेतुतावच्छेदकसम्बन्धः संयोगस्तेन सम्बन्धेन धूमाधिकरणं न धूमावयवाः किंतु पर्वतादि, तत्र वह्नेः सत्त्वात्तद्वृत्तिर्योऽभावो घटाद्यभावस्तादृशाभावीयप्रतियोगितावच्छेदको धर्मो घटत्वादिः, अनवच्छेदकः साध्यतावच्छेदको धर्मो वह्नित्वरूपः।

३—**अभावश्चेति**—प्रकृतलक्षणे यो वै हेत्वधिकरणवृत्त्यभावो विवक्षितः स प्रतियोगिव्यधिकरणो ग्राह्यः—अर्थात्—अभावः—तत्प्रतियोगी चैतद्द्वयमेकत्राऽधिकरणे विवक्षितम्। अन्यथा—वृक्षः कपिसंयोगवान् एतद्वृक्षत्वात्—अत्रैवाऽव्याप्तिः स्यात्। हेतुतावच्छेदकीभूतस्वरूपसंबन्धा-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कपिसंयोगाभावप्रतियोगित्वेऽपि कपिसंयोगस्य नाव्याप्तिः। न च प्रतियोगिव्यधिकरणत्वं यदि प्रतियोग्यनधिकरणवृत्तित्वं तदा तथैवाव्याप्तिः। प्रतियोगिनः कपिसंयोगस्यानधिकरणे गुणादौ वर्तमानो योऽभावस्तस्यैव वृक्षेऽपि मूलावच्छेदेन सत्त्वात्। यदि तु प्रतियोग्यधिकरणावृत्तित्वं तदा संयोगी सत्त्वादित्यादावतिव्याप्तिः। सत्ताधिकरणे गुणादौ यः संयोगाभावस्तस्य प्रतियोग्यधिकरणद्रव्यवृत्तित्वादिति

वच्छिन्न-एतद्वृक्षत्वत्वावच्छिन्न—आधेयतानिरूपिताधिकरणतावानेतद्वृक्ष एव, तत्र वर्त्तमानो योऽभावः 'मूलावच्छेदेन कपिसंयोगो नास्ति' इत्याकारकोऽभावः, तादृशाभावीयप्रतियोगिताया अवच्छेदक एव कपिसंयोगत्वं नाम साध्यतावच्छेदकधर्मोऽस्ति—अनवच्छेदको नास्ति तस्मादव्याप्तिरायाता, यदि हेत्वधिकरणवृत्त्यभावे प्रतियोगिव्यधिकरणत्वस्य विवक्षा क्रियते तदा नास्ति दोषः, कुतः कपिसंयोगाभावरूपस्य साध्याभावस्य प्रतियोगिसमानाधिकरणत्वेन लक्षणाघटकत्वात्, किंतु घटाद्यभाव एव तादृशो भवति, तत्प्रतियोगितावच्छेदकं घटत्वादि—अनवच्छेदकः साध्यतावच्छेदकः कपिसंयोगत्वरूपो धर्मः, अतो नास्त्यव्याप्तिः।

१—न चेति—लक्षणघटको योऽभावः स प्रतियोगिव्यधिकरणः अपेक्षित इत्यस्य यद्ययमर्थः स्वप्रतियोगिनोऽधिकरणाद्भिन्नाधिकरणे—वर्त्तमानो योऽभावः, तदा "वृक्षः कपिसंयोगवान् एतद्वृक्षत्वात्" इत्यत्र पुनरपि तदवस्थोऽव्याप्तिरूपो दोषः। प्रतियोगिशब्देन कपिसंयोगरूपं साध्यं गृह्यते, तदधिकरणं वृक्षादिरस्ति—अनधिकरणं गुणकर्मादिरस्ति, तत्र वर्त्तमानो यः कपिसंयोगाभावः स एव मूलावच्छेदेन वृक्षेऽपि तिष्ठतीति तस्य प्रतियोगिताया अवच्छेदकमेव कपिसंयोगत्वमनवच्छेदकं न भवतीत्यव्याप्तिः। तद्वारणाय प्रतियोगिव्याधिकरणमित्यंशस्य **-प्रतियोग्यधिकरणावृत्तित्वमित्यपरोऽर्थः परिकल्प्येत चेत्?** अर्थात् हेत्वधिकरणवृत्त्यभावः स्वप्रतियोग्यधिकरणे स्थितो नापेक्षितः एवमुच्यमाने यद्यपि "वृक्षः कपिसंयोगवान् एतद्वृक्षत्वात्" इत्यत्र दूषणं नास्ति, कुतः संयोगस्याव्याप्यवृत्तित्वेन कपिसंयोगाभावस्य निरुक्तप्रतियोगिवैयधिकरण्याभावेन लक्षणाघटकत्वात्। किंतु घटाद्यभाव एव लक्षणघटकः स्यात्, तथाच तादृशाभावीयप्रतियोगिताया अवच्छेदको घटत्वादिधर्मः—अनवच्छेदकः साध्यतावच्छेदकः कपिसंयोगत्वरूपो धर्म इति समन्वयान्न दोषः। परंतु प्रतियोगिव्याधिकरणत्वमित्यंशस्य प्रतियोग्यनधिकरणावृत्तित्वमित्यर्थकरणेऽपि "घटः संयोगवान् सत्त्वात्" इत्यत्रातिव्याप्तिरेव। अत्र व्यभिचारस्थले हेत्वधिकरणं गुणकर्मास्ति, तत्र यद्यपि संयोगरूपसाध्यस्याभावो मिलिष्यति तथापि पूर्वोक्तरीत्या संयोगरूपसाध्यस्याभावो नैव भविष्यति लक्षणघटकः, कुतः संयोगरूपसाध्यस्य अभावः पूर्वोक्तरीत्या स्वप्रतियोग्यधिकरणवृत्तिर्नास्ति किंतु—अव्याप्यवृत्तित्वेन स्वप्रतियोग्यधिकरणवृत्तिरेव, तस्मादयमभावो लक्षणघटको भवितुं नार्हतीति, तथा चात्रापि हेत्वधिकरणवृत्तिघटाद्यभावो गृह्यते, तादृशाभावीयप्रतियोगितावच्छेदको घटत्वादिधर्मोऽस्ति, अनवच्छेदकः साध्यतावच्छेदकः संयोगत्वरूपो धर्मः, एवं चालक्ष्ये लक्षणस्य गमनादतिव्याप्तिः। अथाऽस्य समाधिः—

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वाच्यम्, हेत्वधिकरणे प्रतियोग्यनधिकरणवृत्तित्वविशिष्टस्य विवक्षितत्वात्, स्वप्रतियोग्यनधिकरणीभूतहेत्वधिकरणवृत्त्यभाव इति निष्कर्षः। [2]प्रतियोग्यनधिकरणत्वं प्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं वाच्यम्। तेन विशिष्टसत्तावान् जातेरित्यादौ जात्याधिकरणगुणादौ विशिष्टसत्ताभावप्रतियोगिसत्ताधिकरणत्वेऽपि न क्षतिः। [3]एवं साध्यतावच्छेदकसम्बन्धेन प्रतियोग्यनधिकरणत्वं बोध्यम्। तेन

१—हेत्वधिकरणेति। हेत्वधिकरणवृत्त्यभावविशेषणीभूतस्य प्रतियोगिव्यधिकरणांशस्य पूर्वोक्तरीत्या ऽर्थो न विवक्षितः किंतु प्रतियोगिव्यधिकरणमितिकथनेन प्रतियोग्यनधिकरणवृत्तित्वविशिष्टाभावस्य हेत्वधिकरणे विवक्षास्ति। अयंभावः—हेत्वधिकरणवृत्त्यभावः स्वप्रतियोगिनोऽनधिकरणीभूतहेत्वधिकरणे वर्त्तमानः अपेक्षितव्यः इत्यर्थकरणेन पूर्वोक्तोभयस्थले दोषो नास्ति, वृक्षः कपिसंयोगवान् एतद्वृक्षत्वात्, अत्र यद्यपि कपिसंयोगाभावोऽपि मूलावच्छेदेन वृक्षे तिष्ठति, तथाप्यसौ स्वप्रतियोगिनोऽनधिकरणीभूतहेत्वधिकरणे नास्ति, किंतु स्वप्रतियोगिनोऽधिकरणीभूतहेत्वधिकरणे एव तिष्ठति, तस्मात् कपिसंयोगाभावस्य लक्षणघटकत्वाभावाद् घटाद्यभावो गृह्यते तेन च लक्षणसमन्वयः। "घटः संयोगवान् सत्त्वात्" इत्यत्र सत्तारूपहेत्वधिकरणे गुणादौ संयोगरूपसाध्यस्याभावः स्वप्रतियोगिनोऽनधिकरणीभूतहेत्वधिकरणे तिष्ठति तस्माल्लक्षणघटकोऽस्ति तादृशाभावीयप्रतियोगितावच्छेदक एव साध्यतावच्छेदकसंयोगत्वरूपो धर्मः अनवच्छेदको नास्तीति नातिव्याप्तिः।

२—प्रतियोग्यनधिकरणत्वमिति। अस्यायमर्थः—उक्तलक्षणे प्रतियोग्यनधिकरणीभूतं हेत्वधिकरणं प्रतियोगितावच्छेदकावच्छिन्नस्यानाधिकरणं ज्ञातव्यम्। अन्यथा "घटो विशिष्टसत्तावान् जातेः" इत्यत्रातिव्याप्तिः स्यात्, अत्र जातिरूपहेतोर्व्यभिचारस्थलं गुणकर्मास्ति, तत्र हेत्वधिकरणे गुणकर्मणि विशिष्टसत्ताभावो न मिलिष्यति। विशिष्टं शुद्धान्नातिरिच्यत इति न्यायात्। विशिष्टसत्ताभावस्य प्रतियोगिनी शुद्धसत्ताप्यस्ति, तादृशशुद्धसत्ताया अनधिकरणं हेत्वधिकरणं गुणकर्मणी नैव स्तः। एवं साध्याभावस्य लक्षणघटकत्वाभावेन घटाभावं गृहीत्वा समन्वयादतिव्याप्तिः। यदि प्रतियोगिनोऽनधिकरणं हेत्वधिकरणं प्रतियोगितावच्छेदकधर्मावच्छिन्नस्यानधिकरणमुच्यते तदा हेत्वधिकरणगुणादौ विशिष्टसत्तात्वेन विशिष्टसत्ताया अभावो भविष्यति तादृशाभावस्य प्रतियोगिनी विशिष्टसत्ता, प्रतियोगितावच्छेदको धर्मो विशिष्टसत्तात्वरूपः, अनवच्छेदकसाध्यतावच्छेदकधर्मस्याभावेनातिव्याप्तिरूपो दोषो नैव। प्रतियोगितावच्छेदकावच्छिन्नानाधिकरणं यद्धेतुतावच्छेदकसम्बन्धेन हेतुतावच्छेदकावच्छिन्नाधिकरणं तद्वृत्तिर्योऽभावः—तादृशाभावीयप्रतियोगितानवच्छेदकं यत्साध्यतावच्छेदकं तदवच्छिन्नसाध्यसामानाधिकरण्यं व्याप्तिरिति फलितम्।

३—एवमिति—एवं हेत्वधिकरणे प्रतियोग्यनधिकरणतापि साध्यतावच्छेदकसम्बन्धेन विवक्षिता। अन्यथा "आत्मा ज्ञानवान् द्रव्यत्वात्" इत्यत्र समवायेन साध्यहेतुस्थलेऽतिव्याप्तिः। अत्र द्रव्यत्वरूपहेतोर्व्यभिचारस्थलं घटादिकमस्ति। तत्र

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ज्ञानवान् द्रव्यत्वादित्यादौ द्रव्यत्वाधिकरणघटादेर्विषयतासम्बन्धेन ज्ञानाधिकरणत्वेऽपि न क्षतिः। इत्थं च वह्निमान् धूमादित्यादौ धूमाधिकरणे समवायेन वह्निविरहसत्त्वेऽपि न क्षतिः। ननु प्रतियोगितावच्छेदकावच्छिन्नस्य यस्य कस्यचित्प्रतियोगिनोऽनधिकरणत्वं तत्सामान्यस्य वा यत्किंचित्प्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं वा विवक्षितम्। आद्ये कपिसंयोगी एतद्वृक्षत्वादित्यादौ तथैवाव्याप्तिः। कपिसंयोगाभावस्य प्रतियोगितावच्छेदकावच्छिन्नो

ज्ञानरूपहेतोरभावस्तु नैव सम्भवति, विषयतासम्बन्धेन तत्र विद्यमानत्वात्। तर्हि—उदासीनघटादीनामभावो लक्षणघटकः स्यात्, एवमभावीप्रतियोगिताया अवच्छेदको घटत्वादिधर्मः—अनवच्छेदकः साध्यतावच्छेदको ज्ञानत्वरूपो धर्मः तदवच्छिन्नसाध्येन सह द्रव्यत्वरूपहेतोः सामानाधिकरण्यात् व्याप्तेर्लक्षणं संगतमित्यतिव्याप्तिः। यदि साध्यतावच्छेदकसम्बन्धेन प्रतियोग्यनधिकरणीभूतं हेत्वधिकरणं मन्येत तदा साध्यतावच्छेदकः सम्बन्धः समवायः, तेन सम्बन्धेन ज्ञानाधिकरणमात्मैवास्ति, अनधिकरणं घटादिकं, तत्र वर्तमानो यः समवायसम्बन्धावच्छिन्नप्रतियोगिताकज्ञानाभावस्तत्प्रतियोगितावच्छेदक एव ज्ञानत्वरूपः साध्यतावच्छेदको धर्मोऽस्ति—अनवच्छेदको नास्ति—इति नातिव्याप्तिः।

१–इत्थं च वह्निमानिति। प्रतियोग्यनधिकरणे साध्यतावच्छेदकसम्बन्धनिवेशेन पर्वतो वह्निमान् धूमादित्यत्राव्याप्तिर्नास्ति, अन्यथा हेत्वधिकरणपर्वते समवायसम्बन्धावच्छिन्नप्रतियोगिताकवन्ह्यभावस्य सत्त्वात् तादृशाभावीयप्रतियोगितावच्छेदको वह्नित्वधर्मोऽस्ति अनवच्छेदकसाध्यतावच्छेदकस्याभावेनाऽव्याप्तिः। यदि प्रतियोग्यनधिकरणे साध्यतावच्छेदकसंबन्धस्य विवक्षा क्रियेत, तदा साध्यतावच्छेदकसम्बन्धेन हेत्वधिकरणपर्वतादौ वह्निरूपसाध्यस्याभावो नैव मिलिष्यति संयोगसम्बन्धेन तत्र वह्नेर्विद्यमानत्वात्, तदा तु घटाद्यभावो लक्षणघटकः स्यात्। अभावीयप्रतियोगितावच्छेदको घटत्वादिधर्मः, अनवच्छेदकः साध्यतावच्छेदको वह्नित्वधर्मः, एवं लक्षणसमन्वयान्नाव्याप्तिः। साध्यतावच्छेदकसम्बन्धेन प्रतियोगितावच्छेदकावच्छिन्नाधिकरणं यद्धेतुतावच्छेदकसम्बन्धेन हेतुतावच्छेदकाऽवच्छिन्नाधिकरणम्—तद्वृत्त्यभावीयप्रतियोगितानवच्छेदकं यत्साध्यतावच्छेदकं तदवच्छिन्नसाध्यसामानाधिकरण्यं व्याप्तिः।

२—ननु प्रतियोगितावच्छेदकावच्छिन्नस्येति—प्रतियोगिताधर्मविशिष्टस्य यस्य कस्यापि प्रतियोगिन इत्यर्थः। अयमाशयः—विशिष्टसत्तावान् जातेः, इत्यादिस्थले—अतिव्याप्तिवारणार्थं त्वया प्रतियोग्यनधिकरणत्वं प्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वमित्युक्तम्। तत्र पृच्छ्यते किं प्रतियोगितावच्छेदकावच्छिन्नयत्किञ्चित्प्रतियोगिनोऽनधिकरणं कथ्यते भवता ? किंवा—प्रतियोगितावच्छेदकावच्छिन्नसामान्यस्यानधिकरणम् ? अथवा यत्किञ्चित्—यः प्रतियोगितावच्छेदको धर्मस्तदवच्छिन्नानधिकरणमिति विकल्पत्रयम्।

३–प्रथमपक्षे–"वृक्षः कपिसंयोगवान् एतद्वृक्षत्वात्" अत्राऽव्याप्तिः। अत्र साध्यतावच्छेदकसमवायसम्बन्धावच्छिन्नप्रतियोगितावच्छेदको धर्मः कपिसंयोगत्वरूपोऽपि गृह्यते तद्धर्मावच्छि-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वृक्षावृत्तिकपिसंयोगोऽपि भवति तदनधिकरणं वृक्ष इति । द्वितीये तु प्रतियोगिव्यधिकरणाभावाप्रसिद्धिः सर्वस्यैवाऽभावस्य पूर्वक्षणवृत्तित्वविशिष्टस्वाभावात्मकप्रतियोगिसमानाधिकरणत्वात् । न च

यत्किंचित्प्रतियोगिशब्देन भूतलवृत्तिकपिसंयोगोऽपि गृह्यत, तादृशभूतलवृत्तिकपिसंयोगस्याऽनधिकरणं यद्धेत्वधिकरणमेतद्वृक्षस्तद्वृत्त्यभावः " कपिसंयोगो नास्ति " इत्याकारकोऽभावः—तादृशाभावीयप्रतियोगितावच्छेदक एव कपिसंयोगत्वरूपः साध्यतावच्छेदकधर्मोऽस्ति—अनवच्छेदकं साध्यतावच्छेदकं नास्तीत्यव्याप्तिरेव । तद्वारणार्थं यदि प्रतियोगितावच्छेदकावच्छिन्नसामान्यस्यानाधिकरणं विवक्ष्यते चेत्तदा " वृक्षः कपिसंयोगवान् एतद्वृक्षत्वात्—इत्यादिस्थले दोषवारणं भवति—प्रतियोगितावच्छेदककपिसंयोगत्वावच्छिन्नसामान्यस्यानधिकरणीभूतं हेत्वधिकरणमेतद्वृक्षो नास्ति, किंतु प्रतियोगितावच्छेदकघटत्वाद्यवच्छिन्नस्यानधिकरणं हेत्वधिकरणमेतद्वृक्षोऽस्ति । एवमभावीयप्रतियोगितावच्छेदकं घटत्वादिधर्मः—अनवच्छेदकः साध्यतावच्छेदकः कपिसंयोगत्वधर्मो विद्यते नास्त्यतोऽव्याप्तिः ।

१—**द्वितीये तु प्रतियोगिव्यधिकरणाभावाप्रसिद्धिः** = द्वितीयपक्षे प्रतियोगितावच्छेदकावच्छिन्नसामान्यस्यानधिकरणमिति विवक्षाकरणे वह्निमान् धूमात्—इत्यादिसद्धेतुमात्रलक्षणस्यासंभवो दोषः । अत्र यद्यपि पूर्वोक्तरीत्या लक्षणघटको घटाद्यभावो भविष्यति परंतु सोऽपि प्रतियोगितावच्छेदकावच्छिन्नयावत्प्रतियोगिनोऽनधिकरणे नास्ति **किंतु** स्वाभावात्मकप्रतियोगिनः समानाधिकरण एव वर्त्तते । तात्पर्यमिदमस्ति—हेत्वधिकरणपर्वते घटाभावस्तथाच पूर्वक्षणवृत्तित्वविशिष्टघटाभावाभाव एतद्द्वयं चैकरूपमेवास्ति । एतदेकरूपापन्नाभावस्य प्रतियोगि—एतद्द्वयम् । एको घटः, द्वितीयो घटाभावाभावः । स च **यद्यपि** घटात्मकप्रतियोगिना सह समानाधिकरणो नास्ति **तथापि** स्वाभावात्मकप्रतियोगिना सहैकाधिकरणवृत्तिरस्त्येव । **अत्रायमभिप्रायः**—यस्मिन्नधिकरणे घटाभावस्तिष्ठति तस्मिन्नेवाधिकरणे घटाभावाभावो नहि तिष्ठति, "अभावविरहात्मत्वं वस्तुनः प्रतियोगिता " एतदाचार्यवचनानुरोधाद् घटाभावाभावस्य घटस्वरूपत्वात् । एवं प्रतियोगी तथा तस्याभाव एतद्द्वयमेकाधिकरणे न तिष्ठति तस्मात्—घटाभावे पूर्वक्षणवृत्तित्वविशिष्टमित्येतद्विशेषणं दत्तम् । **एवं** घटाभावाधिकरणे **यद्यपि** घटो न वर्त्तते **तथापि** पूर्वक्षणवृत्तित्वविशिष्टघटाभावाभाव उत्तरक्षणावच्छेदेन वर्त्तते एव—एवं पूर्वक्षणवृत्तित्वविशिष्टघटाभावस्याभावः पूर्वक्षणवृत्तित्वविशिष्टघटाभावस्वरूप एवास्ति " विशिष्टं शुद्धान्नातिरिच्यत इति न्यायात्"। विशिष्टघटाभावः शुद्धघटाभावस्वरूपोऽस्ति तादृशाभावस्य प्रतियोगी घटस्तथा स्वाभाव एतद्द्वमस्ति । एवं **यद्यपि** तस्य घटात्मकप्रतियोगिना सह सामानाधिकरण्यं नास्ति **तथापि** प्रतियोगितावच्छेदकावच्छिन्नयावत्प्रतियोग्यन्तर्गतस्वाभावात्मकप्रतियोगिना सह घटाभावादेः सामानाधिकरण्यं भविष्यतीत्येवंरीत्या प्रतियोगिव्यधिकरणाभावस्याऽप्रसिद्धिनिबन्धनो दोषः ।

२—**नच वह्निमान् धूमादित्यादौ** वह्निमान् धूमादित्यादिस्थले घटाभावादेः पूर्वोक्तरीत्या यद्यपि पूर्वक्षणवृत्तित्वविशिष्टस्वाभावात्मकप्रतियोगिना सह पर्वते सामानाधिकरण्यं-**तथापि** " ज्ञानवान् द्रव्यत्वात् " इत्यादिस्थलेऽतिव्याप्तिवारणार्थं साध्यतावच्छेदकसंबन्धेन प्रतियोग्यनधिकरणत्वं विवक्षितमस्ति, प्रकृते साध्यतावच्छेदकसंबन्धः संयोगोऽस्ति—**एवं** च संयोग-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वन्हिमान् धूमादित्यादौ घटाभावादेः पूर्वक्षणवृत्तित्वविशिष्टस्वाभावात्मकप्रतियोग्यधिकरणत्वं यद्यपि पर्वतादेस्तथापि साध्यतावच्छेदकसम्बन्धेन तत्प्रतियोग्यनाधिकरणत्वमस्त्येवेति कथं प्रतियोगिव्यधिकरणाभावाप्रसिद्धिरिति वाच्यम्, घटाभावे यो वन्ह्यभावस्तस्य घटाभावात्मकतया घटाभावस्य वह्निरपि प्रतियोगी तदधिकरणं च पर्वतादिरित्येवं क्रमेण प्रतियोगिव्यधिकरणस्याप्रसिद्धत्वात्। यदि च घटाभावादौ वह्न्यभावादिर्भिन्न इत्युच्यते तथापि धूमाभाववान् वह्न्यभावादित्यादावव्याप्तिः। तत्र साध्यतावच्छेदकसम्बन्धः स्वरूपसम्बन्धः, तेन सम्बन्धेन सर्वस्यैवाभावस्य पूर्वक्षणवृत्तित्वविशिष्टस्वाभावात्मकप्रतियोग्यधिकरणत्वं हेत्वधिकरणस्येति।

सम्बन्धेन घटस्य तथा स्वाभावात्मकप्रतियोगिनोऽनधिकरणं हेत्वधिकरणमस्ति, तस्मात्प्रतियोगिव्यधिकरणाभावाप्रसिद्धिनिबन्धनो दोषो नास्ति, 'परमयमेव दोषः प्रकारान्तरेणापि संभवति—**यथा** हेत्वधिकरणपर्वते यो घटाभावस्तद्घटाभावात्मकाधिकरणे ग्राह्यो यो वह्न्यभावः वह्नेरभावो घटाभावस्वरूपोऽस्ति कस्माद्—अभावे विद्यमानो योऽभावस्तस्याधिकरणस्वरूपत्वमेव मन्यन्ते न्यायविदः। एवं घटाभावस्य प्रतियोगी वह्निस्तथा घट इत्यतद्द्वयमस्ति। अत्र वह्निरूपप्रतियोगितोऽधिकरणे पर्वते तस्य प्रतियोगिव्यधिकरणत्वं नास्ति। अनया रीत्या प्रतियोगिव्यधिकरणाभावाप्रसिद्धिः पुनरपि तदवस्थैव।

१—यदि च घटाभावादौ वह्न्यभावादिर्भिन्न इत्युच्यते इति। सिद्धान्ती इत्थमाह—यत् अभावधिकरणकाभावस्याधिकरणस्वरूपत्वं न मन्ये, तस्माद् घटाभावे विद्यमानो वह्न्यभावो घटाभावात्मको न भवति किं तु पृथग्भावेन स्वप्रतियोग्यधिकरणाद् भिन्नाधिकरणे एव नियमेन तिष्ठति—एवं प्रतियोगिव्यधिकरणाभावस्यासिद्धिर्नास्ति। पूर्वपक्षी—एवंकथनेन यद्यपि वह्निमान् धूमादित्यादौ प्रतियोगिव्यधिकरणाभावाप्रसिद्धिनिबन्धनासंभवरूपदोषो नास्ति तथापि "ह्रदो धूमाभाववान् वह्न्यभावात्" इत्यादिस्थले अव्याप्तिदोषोऽस्त्येव। अत्र साध्यतावच्छेदकसंबन्धः स्वरूपसंबन्धः—तेन संबन्धेन वस्तुमात्रस्याभावः पूर्वक्षणवृत्तित्वविशिष्टस्वाभावात्मकप्रतियोगिना सह हेत्वधिकरणे ह्रदादावस्ति एवमभावसाध्यकस्थले प्रतियोगिव्यधिकरणाभावाप्रसिद्ध्या अव्याप्तिरूपो दोषो नियतोऽस्ति। एतद्दोषपरिहारार्थं यदि यत्किंचित्—यः प्रतियोगितावच्छेदको धर्मस्तदवच्छिन्नसामान्यानधिकरणम्—इति तृतीयपक्षाश्रयणं क्रियेत तदा—"ह्रदो धूमाभाववान् वह्न्यभावात्" इत्यादिस्थले दोषो नास्ति, कस्मात्? अत्र यत्किंचित्प्रतियोगितावच्छेदकपदेन घटत्वादेरपि ग्रहणं सम्भवति तदवच्छिन्नसामान्यानधिकरणं हेत्वधिकरणं जलह्रदः—तद्वृत्यभावीयप्रतियोगितावच्छेदको घटत्वादिधर्मः, 'अनवच्छेदकः साध्यतावच्छेदको धूमाभावत्वरूपस्तदवच्छिन्नो धूमाभावस्तेन सह ह्रदात्मकाधिकरणे वह्न्यभावरूपहेतोः सामानाधिकरण्यमस्ति—इत्थमव्याप्तिरूपो दोषो नैव वर्त्तते।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तृतीये तु कपिसंयोगाभाववान् आत्मत्वादित्यादावव्याप्तिः तत्रात्मवृत्तिकपिसंयोगाभावाभावः कपिसंयोगस्तस्य च गुणत्वात्प्रतियोगितावच्छेदकं गुणसामान्याभावत्वमपि तदवच्छिन्नाऽनधिकरणत्वं हेत्वधिकरणस्यात्मन इति । मैवम् । यादृशप्रतियोगितावच्छेद-

१-तृतीये तु कपिसंयोगाभाववानिति । तथापि यत्किंचित्प्रतियोगितावच्छेदकधर्मस्य ग्रहणेन "आत्मा कपिसंयोगाभाववान् आत्मत्वात्" इत्यत्राव्याप्तिः स्यात् । यद्यपि घटाभावीययत्किंचित्प्रतियोगितावच्छेदकघटत्वधर्मावच्छिन्नस्यानधिकरणं हेत्वधिकरणमात्मास्ति तस्मात्प्रतियोगिव्यधिकरणाभावस्याप्रसिद्धिनिबन्धनः अव्याप्तिरूपो दोषो नार्हति भवितुम् तथापि यत्किञ्चित्प्रतियोगितावच्छेदकधर्मेण साध्यतावच्छेदकधर्मस्य व्यापकीभूतो यो धर्मः, तस्याऽपि ग्रहणं शक्यते कर्त्तुम्, एवञ्च—हेत्वधिकरणं आत्मा तद्वृत्तिर्यः कपिसंयोगाभावाभावः, स कपिसंयोगस्वरूपोऽस्ति, संयोगश्च दशसु सामान्यगुणेषु एको गुणः, सच गुणसामान्याभावाभावरूपः अतस्तत्प्रतियोगिता गुणसामान्याभावेऽपि तिष्ठति । एवं चाऽभावीयप्रतियोगितावच्छेदकधर्मः कपिसंयोगाऽभावत्वस्य व्यापकीभूतो धर्मः गुणसामान्याभावत्वमपि, यतो हेत्वाधिकरणे आत्मनि "सामान्यगुणो नास्ति" इत्याकारकमभावं प्रत्येतुं न शक्नुमः, किन्तु गुणसामान्याभावाभावं ग्रहीतुं शक्नुमः, तस्य प्रतियोगिता गुणसामान्याभावे, प्रतियोगितावच्छेदकधर्मो गुणसामान्याभावत्वम्, तस्य यत्किंचित्प्रतियोगितावच्छेदकधर्मेण ग्रहणं क्रियते तदा तदवच्छिन्नो गुणसामान्याभावोऽपि गृहीतुं शक्यते, तादृशगुणसामान्याभावस्यानधिकरणं हेत्वधिकरणमात्मास्ति, एवमव्याप्तिदोषः ।

२—अस्य समाधानन्तु—यादृशप्रतियोगिताया अवच्छेदकावच्छिन्नस्यानधिकरणं हेत्वधिकरणमस्ति तादृशप्रतियोगितायाः अनवच्छेदकः साध्यतावच्छेदको धर्मो विवक्षणीय इति । प्रकृते—"आत्मा कपिसंयोगाभाववान् आत्मत्वात्"—अत्र यादृशप्रतियोगिताशब्देन गुणसामान्याभावत्वावच्छिन्नगुणसामान्याभावनिष्ठप्रतियोगिताया एव ग्रहणं युक्तम् । एवं गुणसामान्याभावनिष्ठप्रतियोगिताया अनवच्छेदकः साध्यतावच्छेदकधर्मः कपिसंयोगाभावत्वमस्ति, तस्मान्नास्त्यव्याप्तिः । लक्षणस्वरूपन्त्वेवं जातम्—साध्यतावच्छेदकसम्बन्धावच्छिन्नयादृशप्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यनधिकरणं यत् हेतुतावच्छेदकसम्बन्धावच्छिन्नहेतुतावच्छेदकावच्छिन्नहेत्वधिकरणं, तद्वृत्त्यभावीयतादृशप्रतियोगितानवच्छेदकं यत्साध्यतावच्छेदकं तदवच्छिन्नसाध्यसामानाधिकरण्यं व्याप्तिः । समन्वयस्तु—साध्यतावच्छेदकीभूतस्वरूपसम्बन्धावच्छिन्ना गुणसामान्याभावाभावीया या गुणसामान्याभावत्वावच्छिन्ना गुणसामान्याभावनिष्ठा प्रतियोगिता, तादृशप्रतियोगिताया अवच्छेदकीभूतो यो गुणसामान्याभावत्वरूपो धर्मः,तदवच्छिन्नो यो गुणसामान्याभावः,तादृशगुणसामान्याभावस्यानधिकरणं यत् हेतुतावच्छेदकीभूतसमवायसम्बन्धेन आत्मत्वत्वावच्छिन्नाधिकरणमात्मा, तत्र वर्तमानाभावनिरूपिता या गुणसामान्याभावत्वावच्छिन्नगुणसामान्याभावनिष्ठा प्रतियोगिता, तादृशप्रतियोगिताया अनवच्छेदकः साध्यतावच्छेदको धर्मः कपिसंयोगाभावत्वरूपः, तदवच्छिन्नकपिसंयोगाभावेन सह आत्मत्वरूपहेतोरात्मरूपैकाधिकरणे सामानाधिकरण्यमस्ति इति ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कावच्छिन्नानधिकरणत्वं हेतुमतस्तादृशप्रतियोगितानवच्छेदकत्वस्य विवक्षितत्वात् । न[1]नु कालो घटवान् कालपरिमाणादित्यत्र प्रतियोगिव्यधिकरणाभावाप्रसिद्धिः; हेत्वधिकरणस्य महाकालस्य जगदाधारतया सर्वेषामभावानां साध्यतावच्छेदकसम्बन्धेन कालिकविशेषणतया प्रतियोग्यधिकरणत्वात् । अत्र केचित् । महाकालभेदविशिष्टघटाभावस्तत्र प्रतियोगिव्यधिकरणः, महाकालस्य घटाधारत्वेऽपि महाकालभेदविशिष्टघटानाधारत्वात् । महाकाले महाकालभेदाभावात् । वस्तुतस्तु प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोग्यनधिकरणीभूतहेत्वधिकरणवृत्त्यभावप्रतियोगितासामान्ये य[2]त्सम्बन्धावच्छिन्नत्वयद्धर्मावच्छिन्नत्वोभयाभावस्तेन सम्बन्धेन तद्धर्मावच्छिन्नस्य तद्धेतुव्यापकत्वं बोध्यम् । व्यापकसामानाधिकरण्यं च व्याप्तिः । इत्थं च का[3]लो घटवान् कालपरिमाणादित्यादौ संयोगसम्बन्धेन यो

१—ननु कालो घटवान् इति—अत्र सर्वेषां पूर्वोक्तानां लक्षणानामव्याप्तिः । अत्र कालिकसम्बन्धेन घटः साध्यः, समवायसम्बन्धेन कालपरिमाणादिति हेतुः, हेत्वधिकरणीभूतः महाकालः कालिकविशेषणतासम्बन्धेन जगन्मात्रस्याश्रयः, अतः साध्यतावच्छेदककालिकसम्बन्धेन स्वप्रतियोग्यधिकरणवृत्तित्वमेव सर्वेषामभावानामिति प्रतियोगिव्यधिकरणाभाव एवाऽप्रसिद्धः । अत्र केचिदित्थं समादधते—यत् हेत्वधिकरणमहाकालेऽभावीयविशेषणताघटितसामानाधिकरण्यसम्बन्धेन महाकालभेदविशिष्टघटाभावो गृह्यते । स एवाभावः प्रतियोगिव्यधिकरणोऽपि भविष्यति । यद्यपि महाकालो घटस्याधारोऽस्ति तथापि महाकालभेदविशिष्टघटस्याधारस्तु नास्त्येव । अभावीयविशेषणतासम्बन्धेन महाकालभेदस्य तत्राऽसत्त्वात् = विशेषणाभावप्रयुक्तविशिष्टाभावस्य सत्वादित्यर्थः ।

२—यत्सम्बन्धः साध्यतावच्छेदकः सम्बन्धः, यद्धर्मः साध्यतावच्छेदको धर्मः, तत्र यदि यद्धर्मावच्छिन्नत्वाभावमात्रमुच्यते तदा समवायेन यो वह्न्यभावस्तस्य प्रतियोगितावच्छेदकसम्बन्धः समवायस्तेन प्रतियोग्यनधिकरणपर्वतादिवृत्तिः स एव, तत्प्रतियोगितावच्छेदकं च वह्नित्वमित्यव्याप्तिः स्यात् । यदि च यत्सम्बन्धावच्छिन्नत्वाभावमात्रमुच्यते तदा तादृशस्य संयोगेन घटाभावस्य प्रतियोगितायां संयोगसम्बन्धावच्छिन्नत्वसत्वादव्याप्तिः स्यादत उभयाभावोपादानम् ।

३—"कालो घटवान् कालपरिमाणात्" इत्यत्र संयोगेन घटाभावीयघटनिष्ठप्रतियोगितायां यद्यपि साध्यतावच्छेदकघटत्वधर्मावच्छिन्नत्वमस्ति तथापि साध्यतावच्छेदककालिकविशेषणतासंबन्धावच्छिन्नत्वं नास्ति । एवं चैकसत्त्वेऽपि द्वयं नास्तीति प्रतीत्या उभयाभावः संयोगेन घटाभावीयघटनिष्ठप्रतियोगितायां तिष्ठति । कालिकविशेषणतासंबन्धेन घटत्वधर्मावच्छिन्नस्य कालपरिमाणरूपहेतुव्यापकत्वं सिद्धम्, व्यापकसामानाधिकरण्यं च व्याप्तिरिति सिद्धान्तः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

घटाभावस्तत्प्रतियोगिनो घटस्यानधिकरणे हेत्वधिकरणे महाकाले वर्तमानः स एव संयोगेन घटाभावस्तस्य प्रतियोगितायां कालिकसम्बन्धावच्छिन्नत्वघटत्वावच्छिन्नत्वोभयाभावसत्त्वान्नाव्याप्तिः। धूमवान् वह्नेः, इत्यादावतिव्याप्तिवारणाय सामान्यपदमुपात्तम्। ननु प्रमेयवह्नित्वावच्छिन्नत्वमप्रसिद्धं गुरुधर्मस्यानवच्छेदकत्वादिति चेन्न, कम्बुग्रीवादिमान्नास्तीति प्रतीत्या कम्बुग्रीवादिमत्त्वावच्छिन्नप्रतियोगितावियीकरणेन गुरुधर्मस्याप्यवच्छेदकत्वस्वीकारादिति संक्षेपः॥६९॥

पक्षवृत्तित्वमित्यत्र पक्षत्वं किं तदाह।

सिषाधयिषया शून्या सिद्धिर्यत्र न विद्यते।
स पक्षस्तत्र वृत्तित्वज्ञानादनुमितिर्भवेत्॥ ७०॥

१—ननु–लक्षणे प्रतियोगितासामान्ये–इत्यस्य किं प्रयोजनम्? प्रत्युत यत्किंचित्प्रतियोगितायाम्, इत्येवोच्यमाने–उपस्थितिकृतं लाघवं स्यादिति। अस्योत्तरम्—सामान्यपदं यावदर्थकम्। तत्स्थाने यदि यत्किंचिन्निवेश्येत तदा पर्वतो धूमवान् वह्नेरित्यत्रातिव्याप्तिः स्यात् अत्र एवम्—यत्किंचिच्छब्दग्राह्यघटनिष्ठप्रतियोगितायां पूर्वोक्तरीत्या–उभयाभावस्य प्राप्तत्वेन लक्षणं, संगच्छेत। अलक्ष्ये लक्षणसंगमनादतिव्याप्तिः। यावदर्थसामान्यपदस्य निवेशः क्रियते चेत्तदा यावदन्तर्गतायाः संयोगेन धूमाभावीयप्रतियोगिताया अपि ग्रहणं भविष्यति। तात्पर्यमिदमस्ति–यत् संयोगेन धूमाभावो हेत्वधिकरणे लोहपिण्डेऽपि मिलिष्यति, परंतु संयोगेन धूमाभावीयप्रतियोगितायामुभयाभावत्वं नास्ति किंतूभयमेवास्त्यतः अतिव्याप्तिर्नास्ति।

२—शङ्का–पूर्वोक्तसमस्तलक्षणानां "पर्वतः प्रमेयवह्निमान् धूमात्" इत्यत्राव्याप्तिः। अत्र साध्यतावच्छेदको धर्मः प्रमेयवह्नित्वमेव स्वीकर्त्तव्यः, परं तस्यावच्छेदकत्वं न स्वीक्रियते 'संभवति लघुधर्मे गुरौ तदभावात्' इति नियमात्। प्रकृते प्रमेयवह्नित्वस्य समनियतस्तथा लघुर्वह्नित्वरूपो धर्मोऽस्ति स एवावच्छेदको भवितुमर्हति। परंतु स साध्यतावच्छेदको नास्ति। साध्यतावच्छेदको धर्मः प्रमेयवह्नित्वरूपः परंतु स गुरुत्वादेवावच्छेदको भवितुं नार्हति। साध्यतावच्छेदकधर्मस्य निवेशः पूर्वोक्तेषु यावल्लक्षणेष्वस्ति, एवमच्छेदकाप्रसिद्धिनिबन्धनोऽव्याप्तिरूपो दोषः। **अस्योत्तरम्**—पदार्थानां सिद्धिः प्रतीत्यनुरोधेन भवति न तु स्वमन्तव्यानुरोधेन "अत्र कम्बुग्रीमादिमान्नास्ति" इति प्रतीतौ कम्बुग्रीवादिमत्त्वावच्छिन्नप्रतियोगिताकोऽभावो भासते, तादृशाभावीयप्रतियोगिताऽपि कम्बुग्रीवादिमत्त्वावच्छिन्नैव भवितुमर्हति, नानवच्छिन्ना, अत उक्ताकारप्रतीतिबलेन गुरुधर्मस्याप्यवच्छेदकत्वं स्वीकार्यम्, तेन नाव्याप्तिः।

१—यदि तु "कम्बुग्रीवादिमान्नास्ति" इत्यादौ कम्बुग्रीवादिमत्प्रतियोगिताकाभाव एव विषयो न तु कम्बुग्रीवादिमत्त्वे तत्प्रतियोगितावच्छेदकत्वमपीत्युच्यते तदा यत्किञ्चिद्घटवत्यपि "कम्बुग्रीवादिमान्नास्ति" इति वाक्यस्य प्रामाण्यापत्तिरिति हृदि निधाय आह "संक्षेप" इति दिनकरी।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

*सिषाधयिषाविरहविशिष्टसिद्ध्यभावः पक्षता, तद्वान्पक्ष इत्यर्थः। सिषाधयिषामात्रं न पक्षता विनापि सिषाधयिषां घनगर्जितेन मेघानुमानात्[1]। अत एव साध्यसंदेहोऽपि न पक्षता विनापि संदेहं तदनुमानात्। सिद्धौ[2] सत्यामपि सिषाधयिषासत्त्वेऽनुमितिर्भवेत्येव। अतः सिषाधयिषाविरहविशिष्टत्वं सिद्धौ विशेषणम्। तथा च यत्र सिद्धिर्नास्ति तत्र सिषाधयिषायां सत्यामसत्यामपि पक्षता। यत्र च सिषाधयिषाऽस्ति तत्र सिद्धौ सत्यामसत्यामपि पक्षता। यत्र सिद्धिरस्ति सिषाधयिषा च नास्ति तत्र न पक्षता, सिषाधयिषाविरहविशिष्टसिद्धेः सत्त्वात्। ननु यत्र परामर्शानन्तरं सिद्धिस्ततःसिषाधयिषा, तत्र सिषाधयिषाकाले परामर्शनाशान्नानुमितिः। यत्र सिद्धिपरामर्शसिषाधयिषाः क्रमेण भवन्ति तत्र सिषाधयिषाकाले सिद्धेर्नाशात्प्रतिबन्धकाभावादेवानुमितिः। यत्र सिषाधयिषासिद्धिपरामर्शाः सन्ति तत्र परामर्शकाले सिषाधयिषैव नास्ति। एवमन्य-

---

* व्याप्तिलक्षणमुक्त्वा तद्वैशिष्ट्येन व्याप्यस्य स्वरूपमभिधाय, पक्षवृत्तित्वमित्यत्र का पक्षतेति शिष्यजिज्ञासायां पक्षतालक्षणमाह—**सिषाधयिषेति**—सिषाधयिषा=साधयितुमिच्छा तस्याः सिषाधयिषायाः विरहोऽभावः तद्विशिष्टा या सिद्धिः=साध्यनिश्चयः तस्या अभावः पक्षता नाम पक्षवृत्तिधर्मः, स्वप्रतियोगिविशेष्यतासम्बन्धेन तद्वान् पक्षः इत्यर्थः।

१—मेघानुमानादिति—उपरिदेशे मेघानुमितेरित्यर्थः। तथाच—"उपरिदेशो मेघवान् अवच्छेदकतासम्बन्धेन विजातीयशब्दवत्त्वात्" इत्येवं सिषाधयिषां विनापि मेघानुमितेरित्यर्थः।

२—सिद्धौ सत्यामपीति। सिद्धिर्नाम पक्षे साध्यवत्ताज्ञानम्। 'पर्वतो वह्निमान्' इत्याकारकज्ञानसत्त्वेपि "पर्वते वह्निविषयकानुमितिर्मे स्यात्" इत्याकारिका या—इच्छा तयाप्यनुमितिर्भवत्येव। यद्यपि पक्षे साध्यवत्ताज्ञानमनुमितिज्ञानस्य प्रतिबन्धकं, तथापि सिषाधयिषा उत्तेजिका, सिषाधयिषाविरहविशिष्टा या केवलसिद्धिः सानुमितेः प्रतिबन्धिकास्ति, तस्या अभावो यत्र, तत्र पक्षता। प्रकृते सिद्धिस्तथा सिषाधयिषा एतद्द्वयमस्ति, तथापि सिषाधयिषाविरहविशिष्टा या देशान्तरीया कालान्तरीया सिद्धिः तस्या अभावोऽत्र वर्त्तते, तस्मात् सिद्धिसत्त्वेऽपि क्षतिर्नास्ति, अत्र हि विशेषणाभावप्रयुक्तो विशिष्टाभावः, सिषाधयिषाविरहो विशेषणम्, सिद्धिर्विशेष्या।

प्रश्नाः—सिषाधयिषायाः किं सिद्धान्तलक्षणम्? किञ्च—पूर्वपक्षीयलक्षणम्?। सिद्धौ सिषाधयिषाविरहविशिष्टविशेषणदानस्य किं फलम्? "साध्यसन्देहः पक्षता" इति लक्षणं युक्तमयुक्तं वेति सयुक्ति लिख्यताम्?

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अपि सिद्धिकाले परामर्शकाले च न सिषाधयिषा, योग्यविभुविशेषगुणानां यौगपद्यनिषेधात्, तत्कथं सिषाधयिषाविरहविशिष्टत्वं सिद्धेर्विशेषणमिति चेन्न, यत्र वह्निव्याप्यधूमवान् पर्वतो वह्निमानिति प्रत्यक्षं स्मरणं वा, ततः सिषाधयिषा तत्र पक्षतासंपत्तये तद्विशेषणस्यावश्यकत्वात्। [1]अत्रेदं बोध्यम्। यादृशयादृशसिषाधयिषासत्त्वे सिद्धिसत्त्वे यल्लिङ्गकानुमितिस्तादृशतादृशसिषाधयिषाविरहविशिष्टसिद्ध्यभावस्तल्लिङ्गकानुमितौ पक्षता। [2]तेन सिद्धिपरामर्शसत्त्वेऽपि यत्किंचिज्ज्ञानं मे जायतामितीच्छायामपि नानुमितिः। वह्निव्याप्यधूमवान् पर्वतो वह्निमानिति प्रत्यक्षसत्त्वे प्रत्यक्षातिरिक्तं वह्निज्ञानं जायतामितीच्छायां तु भवत्येव। [3]एवं धूमपरामर्शसत्त्वे आलोकेन वह्निमनुमिनुयामितीच्छायामपि नानुमितिः। [4]सिषाधयिषाविरहकाले

१—सिषाधयिषेत्यादि विशेषणस्वरूपं कीदृगिति निर्धारयति—'अत्रेदम्' इति।

२—तादृशेच्छाया यत्किंचिज्ज्ञानविषयकत्वेन प्रकृतानुमितिं प्रत्युत्तेजकता नास्ति। अतो नानुमितिः।

३—एवं–प्रकृतानुगमे यल्लिङ्गकस्य=यद्धेतुकस्य निवेशकरणेन 'वह्निव्याप्यधूमवान् पर्वतो वह्निमान्' इत्याकारकधूमपरामर्शकाले 'आलोकेन हेतुनाऽनुमितिर्मे जायताम्' इत्याकारिकेच्छयापि नानुमितिः, सिषाधयिषापरामर्शयोर्भिन्नहेतुविषयत्वात्।

४—'पर्वतो वह्निमान्" इत्याकारकानुमितौ पर्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्नित्वावच्छिन्नप्रकारताशालिनिश्चयत्वेन सिद्ध्यात्मकज्ञानस्य प्रतिबन्धकत्वमस्ति। तेन 'पर्वतः तेजस्वी, अथवा पाषाणमयो वह्निमान्' इत्याकारकसिद्ध्यात्मकज्ञानसत्त्वेऽपि 'पर्वतो वह्निमान्' इत्याकारकमनुमितिज्ञानं नैव प्रतिबध्यते। **अत्रायं** नियमः—"तद्विशेष्यकतत्प्रकारकानुमितिं प्रति तद्विशेष्यकं तत्प्रकारकं सिद्ध्यात्मकं ज्ञानं प्रतिबन्धकम्" इति। प्रकृतेऽनुमितिज्ञानं पर्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्नित्वावच्छिन्नप्रकारताशालि वर्तते, परन्तु सिद्धिज्ञानं प्रथमोदाहरणे तेजस्त्वावच्छिन्नप्रकारकं, द्वितीयोदाहरणे पाषाणमयत्वावच्छिन्नविशेष्यकमस्ति, तस्मान्न प्रतिबन्धकं भवितुमर्हति।

प्रश्नः—'यादृशयादृशसिषाधयिषासत्त्वे सिद्धिसत्त्वे—इत्यादि ग्रन्थस्य व्याख्या निजसंस्कृतेन विधीयताम्?

अत्रोक्तप्रश्नस्य उत्तरप्रकारं प्रदर्शयामः—सिषाधयिषाया अनुमितिसामान्यं प्रति सामान्यरूपेणोत्तेजकत्वे दोषं वक्तुं स्वसिद्धान्तमाह—**यादृशेति**। यादृशी यादृशी यद्यद्विशेषरूपावच्छिन्ना सिषाधयिषा=अनुमित्सा जायते, तस्याः सत्त्वे सद्भावे, सिद्धिसत्त्वे=सिद्धिकाले इत्यर्थः यल्लिङ्गकानुमितिः=यद्धेतुकाऽनुमितिः जायते इति शेषः, **तादृशेति**—तादृशी २ तत्त-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

यादृशसिद्धिसत्त्वे नानुमितिस्तादृशी सिद्धि[†]र्विशिष्यैव तत्तदनुमितौ प्रतिबन्धका वक्तव्या। तेन पर्वतस्तेजस्वी पाषाणमयो वह्निमानिति ज्ञानसत्त्वेऽप्यनुमितेर्न विरोधः। परंतु पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धावपि तदवच्छेदेनानुमितिदर्शनात्पक्षतावच्छेदकावच्छेदेनानुमितिं प्रति पक्षतावच्छेदकावच्छेदेन साध्यसिद्धिरेव प्रतिबन्धिका, पक्षतावच्छेदकसामानाधिकरण्येनानुमितिं प्रति तु सिद्धिमात्रं विरोधि। इदं तु बोध्यम्। यत्रायं पुरुषो न वेति संशयानन्तरं

द्रूपविशेषावच्छिन्ना या सिषाधयिषा=अनुमित्सा तस्याः विरहोऽभावः, तद्विशेषणविशिष्टा या सिद्धिः=इन्द्रियसन्निकर्षजं निश्चयात्मकं ज्ञानं, तल्लिङ्गकानुमितौ=तद्धेतुकाऽनुमितौ पक्षता, तद्वान् पक्ष इति खण्डलकार्थः। एतादृशविवक्षायाः फलमाह—**तेनेति**। तत्तद्व्यक्तित्वेनेच्छाया उत्तेजकत्वेनेत्यर्थः। अस्यायमाशयः—'वह्निव्याप्यधूमवान् पर्वतो वह्निमान्' इत्याकारकसिद्ध्यात्मकपरामर्शसत्त्वेऽपि 'यत्किञ्चिद् ज्ञानं मे जायताम्' इतीच्छा चेत् प्रवर्तेत तदा नाऽनुमितिः=न बन्ध्यनुमितिरित्यर्थः।

प्रश्नाः—सिद्धौ सिषाधयिषाविरहविशेषणं मूलग्रन्थाशयानुरोधेन स्वसंस्कृते उपपादय? सिद्ध्यनुमित्योः प्रतिबध्यप्रतिबन्धकभावश्च कीदृशः? इति सुस्पष्टीकुरु?

† विशिष्येति—'पर्वतो वह्निमान्' इत्यनुमितौ पर्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्नित्वाऽवच्छिन्नप्रकारताशालिनिश्चयत्वेन सिद्ध्यात्मकज्ञानस्य प्रतिबन्धकत्वमित्यर्थः।

अत्रायमाशयः—तद्विशेष्यकतत्प्रकारकाऽनुमितौ तद्विशेष्यकतत्प्रकारकज्ञानस्यैव विरोधित्वं=प्रतिबन्धकत्वं भवति नतु विभिन्नप्रकारकस्येत्यस्ति नियमः। प्रकृतेऽनुमितिज्ञानन्तु—पर्वतत्वाऽवच्छिन्नविशेष्यतानिरूपितवह्नित्वावच्छिन्नप्रकारताशालि, परं सिद्धिज्ञानन्तु ततो विरुद्धम् अर्थात् तेजस्वित्वावच्छिन्नप्रकारकं पाषाणमयत्वावच्छिन्नविशेष्यकमिति न प्रतिबन्धकत्वं तस्येत्यर्थः।

१—**परन्तु** इति। प्रतिबध्यप्रतिबन्धकभावस्थले—इदमन्यदपि ज्ञातव्यम्—पक्षतावच्छेदकसामानाधिकरण्येन=अर्थात् एकस्मिन्पर्वते वह्निरूपसाध्यस्य सिद्धावपि तदवच्छेदेन=पक्षतावच्छेदकावच्छेदेन—अर्थात् पर्वतत्वावच्छिन्नेषु यावत्सु पर्वतेषु भवत्येवानुमितिः। तस्मात् पक्षतावच्छेदकावच्छेदनानुमितिं प्रति पक्षतावच्छेदकावच्छेदेन साध्यसिद्धिः प्रतिबन्धिका, पक्षतावच्छेदकसामानाधिकरण्येनानुमितिं प्रति तु सिद्धिमात्रम्प्रतिबन्धकम्। **सारस्तु**—पर्वतैकशिखरवृत्त्यनुमितौ एकशिखरवृत्ति, यावच्छिखरवृत्ति वा सिद्धिज्ञानं विरोधि, ज्ञानानां प्रतिबध्यप्रतिबन्धकभावः समानविषयकत्वेन अथवा अधिकविषयकत्वेन भवति, नतु प्रतिबध्यज्ञानान्न्यूनविषयाऽवगाहिज्ञानं कदापि विरोधि स्यात्। तेन यावच्छिखरवृत्त्यनुमितौ एकशिखरवृत्तिवह्निज्ञानं न प्रतिबन्धकम्' इति।

२—**इदन्तु बोध्यम्** इति। यत्र स्थले दोषवशात् पुरुषे 'अयं पुरुषो न वा' इत्याकारकः संशयो जातः, पश्चात्सम्यक् चक्षुःसंयोगेन 'पुरुषत्वव्याप्यकरचरणादिमानयम्' इत्याकारकः परामर्शो जातः, तत्र संशयपक्षताविशिष्टपरामर्शरूपानुमितिसामग्र्यपि विद्यते, तथा चक्षुःसंप्रयोगरूपप्रत्यक्षसामग्र्यपि विद्यते, परन्तु यदि अनुमितिसामग्र्या अनुमित्सा सहकारिणी न स्यात्तदा पुरुष-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पुरुषत्वव्याप्यकरादिमान् अयमिति ज्ञानं तत्राऽसत्यामनुमित्सायां पुरुषस्य प्रत्यक्षं भवति न त्वनुमितिरतोऽनुमित्साविरहविशिष्टसमानविषयकप्रत्यक्षसामग्री कामिनीजिज्ञासादिवत्स्वातन्त्र्येण प्रतिबन्धिका। एवं परामर्शानन्तरं विनापि प्रत्यक्षेच्छां पक्षादेः प्रत्यक्षानुत्पत्तेः प्रत्यक्षेच्छाविरहविशिष्टानुमितिसामग्री भिन्नविषयकप्रत्यक्षे प्रतिबन्धिका॥७०

[1]हेतुप्रसङ्गाद्धेत्वाभासान्विभजते—

अनैकान्तो विरुद्धश्चाप्यसिद्धः प्रतिपक्षितः ।
कालात्ययापदिष्टश्च हेत्वाभासास्तु पञ्चधा ॥ ७१ ॥
आद्यः साधारणस्तु स्यादसाधारणकोऽपरः ।
तथैवानुपसंहारी त्रिधाऽनैकान्तिको भवेत् ॥ ७२ ॥

तल्लक्षणं तु यद्विषयकत्वेन[2] ज्ञानस्यानुमितिविरोधित्वं तत्त्वम् ।

विषयकं प्रत्यक्षज्ञानमेव भवति नानुमित्यात्मकम् । अतोऽनुमित्साविरहविशिष्टानुमितिसामग्रीं प्रति समानविषयिका=तुल्यविषयिणी अर्थाद्यद्विषयकानुमितिसामग्री तद्विषयकप्रत्यक्षसामग्री सुन्दरस्त्रीजिज्ञासावत् अर्थात् विरहिण आसक्तस्य पुरुषस्य कामिनीसंभोगेच्छा यथा अन्यकार्यप्रतिबन्धिका स्वभावत एव भवति तद्वत् इयं सामग्र्यपि पक्षताकुक्षौ प्रवेशं विनैव प्रतिबन्धिका, एवं "वह्निव्याप्यधूमवान् पर्वतः" इत्यादिपरामर्शानन्तरं यदि 'पक्षादिविषयकं प्रत्यक्षं मे जायतामित्याकारकप्रत्यक्षेच्छा–उत्तेजिका न भवेत्तदा पक्षादिविषयकं प्रत्यक्षमपि न भवति, किन्तु पर्वतो वह्निमान् इत्याकारकासमुदितविषयानुमितिरेव जायत इत्याशयः ।

१–स्मृतस्य=अभिहितवस्तुसम्बन्धित्वेन स्मृतिविषयस्य उपेक्षानर्हत्वं=निरूपणयोग्यत्वं प्रसङ्गलक्षणम् ।

२ —**यद्विषयकत्वेनेति**—यद्विषयकत्वेन=व्यभिचारादिविषयकत्वेन ज्ञानस्य—"पर्वतो वह्निमान् प्रमेयत्वात्" इत्यादौ "अयं प्रमेयत्वहेतुर्व्यभिचारी" इत्याद्याकारकज्ञानस्य "पर्वतो वह्निमान्" इत्यनुमितिं प्रति यत् प्रतिबन्धकत्वं तत्त्वं हेत्वाभासत्वम् ।

अनुमितितत्करणान्यतरप्रतिबन्धकयथार्थज्ञानविषयत्वं **हेत्वाभासत्व**मिति हेत्वाभाससामान्यलक्षणम् । हेतोराभासाः हेत्वाभासाः । हेतुनिष्ठा दोषाः, तेषां भावस्तत्त्वमित्यर्थः ।

अत्र—"ह्रदो वह्निमान्" इत्याद्यनुमितिं प्रति "वह्न्यभाववान् ह्रदः" इत्यादि बाधनिश्चयः प्रतिबन्धकः । एवञ्च प्रमात्मकतादृशनिश्चयविषयत्वं वह्न्यभाववद्ध्रदादावक्षतमिति लक्षणसमन्वयः । अथवा—"पर्वतो वह्निमान् प्रमेयत्वात्" इत्यत्र (व्यभिचारस्थले) "अयं प्रमेयत्वहेतुर्व्यभिचारदोषवान्" इत्याद्याकारकप्रमाज्ञानस्य "पर्वतो वह्निमान्" इत्यनुमितिं प्रति यत्प्रतिबन्धकत्वं तदेव प्रमेयत्वहेतौ व्यभिचारित्वमिति लक्षणं घटितम्, एवं सर्वत्रैव सामान्यलक्षणसङ्क्रमनप्रकार ऊहनीयः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तथाहि व्यभिचारादिविषयकत्वेन ज्ञानस्यानुमितिविरोधित्वात्ते दोषाः। यद्विषयकत्वं च यादृशविशिष्टविषयकत्वं बोध्यम्। तेन बाधभ्रमस्यानुमितिविरोधित्वेऽपि न क्षतिः। तत्र पर्वतो वह्न्यभाववानिति विशिष्टस्याप्रसिद्धत्वान्न हेतुदोषः। न च वह्न्यभावव्याप्यपाषाणमयत्ववान् पर्वत इति परामर्शकाले वह्निव्याप्यधूमस्याभासत्वं न स्यात्, तत्र वह्न्यभावव्याप्यवान्पक्ष इति विशिष्टस्याप्रसिद्धत्वादिति वाच्यम्, इष्टापत्तेः। अन्यथा बाधस्यानित्यदोषत्वापत्तेः

१—लक्षणघटकस्य यद्विषयकपदस्य यादृशविशिष्टविषयकत्वमित्यर्थः। एवं च पर्वतो वह्निमान्, इति सद्धेतुस्थले नास्त्यतिव्याप्तिः। यद्यपि वह्न्यभावप्रकारकपर्वतविशेष्यकत्वेन 'पर्वतो वह्न्यभाववान्, इत्याकारकज्ञानस्य 'पर्वतो वह्निमान्' इत्याकारकानुमितिं प्रति विरोधितास्ति तस्मात्तद्विषये वह्न्यभावादावतिव्याप्तिः समागता भवेत्। तथापि यादृशविशिष्टशब्देन प्रकृते वह्न्यभावविशिष्टपर्वतस्य ग्रहणमस्ति, तत्तु संसारमात्रे नैव प्रसिद्धमिति नातिव्याप्तिगन्धोऽपि, अर्थात् पक्षे वास्तवरूपेण साध्याभावसत्त्वे बाधो भवति नान्यथा, अत्र तु (प्रकृते पक्षे) साध्याभावस्य भ्रमोऽस्ति, तस्मात्प्रकृतो हेतुर्नैव दुष्टो भवति।

प्रश्नाः—हेत्वाभासस्य किं सामान्यलक्षणम्? कति च ते? सामान्यलक्षणस्य समन्वयप्रकारः कीदृशः? मुक्तावल्यां दर्शिते यद्विषयकत्वेत्यादिसामान्यलक्षणे 'यद्विषयकत्व' पदस्य कीदृशो विवक्षितोऽर्थः? किञ्च तस्य फलमिति सर्वं विशदीकृत्योत्तरणीयम्?

२—यस्मिन्काले यत्र सिद्धान्तिनः "पर्वतो वह्निमान् धूमात्" इत्याकारकहेतुना "वह्निव्याप्यधूमवान् पर्वतः" इत्याकारकं परामर्शज्ञानं जातं तस्मिन्काले तस्मिन्स्थले वादिनः "पर्वतो वह्न्यभाववान् पाषाणमयत्वात्" इत्याकारकहेतुना "वह्न्यभावव्याप्यपाषाणमयत्ववान् पर्वतः" इत्याकारकं परामर्शज्ञानं जातम् तत्र द्वितीयपरामर्शेन प्रथमपरामर्शकुक्षौ प्रविष्टो धूमहेतुः सत्प्रतिपक्षत्वेन हेत्वाभासो जायेत। यादृशविशिष्टविषयकत्वकथनेन तु तत्र हेत्वाभासत्वव्यवहारस्यावश्यकता नास्ति। तत्राभासत्वसम्पादकं 'वह्न्यभावव्याप्यपाषाणमयत्ववान् पर्वतः' इत्याकारकं यत् विरोधि परामर्शज्ञानं भवति तत्र वह्न्यभावविशिष्टपर्वतांशः अप्रसिद्धः, अर्थात् पाषाणमयत्वरूपहेतौ वह्न्यभावनिरूपिता व्याप्यता नास्त्येव। तस्मात्पाषाणमयत्वरूपहेतुना धूमरूपहेतोराभासत्वं न युक्तम् इति शङ्काग्रन्थार्थः, अस्योत्तरमाह—इष्टापत्तेः।

३—अन्यथा—प्रतिबन्धकीभूतभ्रमविषयस्यापि दोषत्वेन ग्रहणं क्रियते चेत्तदा बाधोऽप्यनित्यदोषः स्यात्। अयं भावः—पक्षे साध्याभावस्य भ्रमेण सद्धेतुर्वास्तवरीत्या नैव दुष्टः। परन्तु यदि पूर्वोक्तरीत्या हेतोः सत्प्रतिपक्षता स्वीक्रियते तदा पक्षे साध्याभावस्य भ्रमेण सद्धेतुविषयेऽपि बाधदोषेण दुष्टव्यवहारः कर्तव्यः स्यात्। परमसौ कस्यापि नेष्टः। तस्मात्तत्राप्येवं मन्तव्यं यत् "वह्न्यभावव्याप्यपाषाणमयत्ववान् पर्वतः" इत्याकारकपरामर्शस्थले वह्निव्याप्यधूमरूपहेतोराभासत्वं नास्ति किन्तु भ्रमादनुमितिप्रतिरोधमात्रम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तस्मात्तत्र वह्न्यभावव्याप्यपाषाणमयत्ववानिति परामर्शकाले वह्नि-व्याप्यधूमस्य नाभासत्वम्, भ्रमादनुमितिप्रतिबन्धमात्रं, हेतुस्तु न दुष्टः । इत्थं च साध्याभाववद्वृत्तिहेत्वादिकं* दोषः । †तद्वत्त्वं च हेतौ येन केनापि सम्बन्धेनेति नव्याः । परे तु यद्विषयकत्वेन ज्ञानस्यानुमितिविरोधित्वं तद्वत्त्वं हेत्वाभासत्वम् । सत्प्रतिपक्षे विरोधिव्याप्त्यादिकमेव तथा । तद्वत्त्वं च हेतोर्ज्ञानरूपसम्बन्धेन । न चैवं वह्निमान् धूमादित्यादौ पक्षे बाधभ्रमस्य साध्याभावविषयकत्वेनानुमिति-विरोधित्वाज्ज्ञानरूपसम्बन्धेन तद्वत्त्वस्यापि सत्त्वात्सद्धेतोरपि बाधि-तत्वापत्तिरिति वाच्यम्, तत्र ज्ञानस्य सम्बन्धत्वाकल्पनात् । अत्र सत्प्रतिपक्षित इति व्यवहारेण तत्कल्पनात् । तत्र बाधित इति

---

* आदिना साध्याभावविशिष्टः पक्षोऽपि दोषत्वेन ग्राह्यः ।

† एतादृशदोषवत्ता व्यभिचारादिस्थले तादात्म्येन, बाधादिस्थले "साध्याभाववान् पक्षो हेतुश्च" इत्याकारकज्ञानविषयत्वेन ग्राह्येति सारार्थः ।

१—**परे तु यद्विषयकत्वेन** इति—येषां मते सत्प्रतिपक्षादिदोषाणामनित्यत्वमस्ति तेषां मते "हेतोराभासा हेत्वाभासाः" इति व्युत्पत्त्या हेत्वाभासशब्दो दोषपरः । एवं च दोषवत्ता हेतौ—एकज्ञानविषयत्वसम्बन्धेन सर्वत्र तिष्ठति । "यद्विषयकत्वेन ज्ञानस्यानुमितिविरोधित्वमिति लक्षणं तेषां मते दोषाणामस्ति । तादृशदोषवत्तु एकज्ञानविषयत्वसम्बन्धेन हेत्वाभासव्यवहारः । सत्प्रतिपक्षादिस्थले विरोधिव्याप्त्यादिकमेव दोषः, तादृशदोषवत्ता च—"अयं हेतुर्विरुद्धव्याप्तिविशिष्ट" इत्याकारकैकज्ञानविषयत्वसम्बन्धेन ज्ञेया ।

—शङ्कते—**न चैव**मिति । एवंरीत्या सत्प्रतिपक्षस्याऽनित्यदोषत्वं मन्यमानस्य मते बाधोऽप्यनित्यदोषो भविष्यति । यद्यपि 'वह्निमान् धूमात्' इत्यादिसद्धेतौ पक्षे साध्याभावस्याभावेन बाधो नास्ति तथापि 'पर्वतो वह्न्यभाववान्' इत्याकारकबाधभ्रमः संभवति । स एव साध्याभावविषयकत्वेन 'पर्वतो वह्निमान्' इत्याकारकानुमितेर्विरोधी, अस्मिन्मते यद्विषयकत्वेनेत्यस्य यत्प्रकारकत्वेनेत्यर्थकतया यत्पदेन वह्न्यभावस्य ग्रहणात्तद्वत्त्वं "वह्न्यभाववान् पर्वतो धूमश्च" इत्याकारकैकज्ञानविषयत्वेन धूमरूपहेताविति सद्धेतोरपि बाधितत्वापत्तिः ।

३—**समाधत्ते**—तत्रेति—तत्र=बाधकालीनधूमादिसद्धेतौ । एकज्ञानविषयत्वरूपसंबन्धकल्पनैव प्रमाणशून्या, यतस्तत्र "अयं धूमादिहेतुर्बाधित" इति व्यवहारो न जायते ।

४—**अत्र सत्प्रतिपक्षित इति**—प्रतिपरामर्शकालीनधूमादिसद्धेतौ तु "अयं हेतुः सत्प्रतिपक्षितः" इत्याकारकव्यवहारेण दर्शितरीत्या ज्ञाने संबन्धत्वकल्पना युज्यते । तस्मात्सत्प्रतिपक्षस्याऽनित्यदोषत्वस्वीकारे नास्ति दोषः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

व्यवहाराभावादित्याहुः । अनुमितिविरोधित्वं[५] च अनुमितितत्करणान्यतरविरोधित्वम् । तेनैकहेतौ[१] व्यभिचारग्रहे हेत्वन्तरेणानुमित्युत्पत्तेस्तदभावाद्यनवगाहित्वाच्च[२] व्यभिचारज्ञानस्यानुमितिविरोधित्वाभावेऽपि न क्षतिरिति संक्षेपः । यादृशपक्षसाध्यहेतौ[३] यावन्तो दोषास्तावदन्यान्यत्वं तत्र हेत्वाभासत्वम् । पञ्चत्वकथनं[४] तु तत्सम्भवस्थलाभिप्रायेण । एवं च साधारणाद्यन्यतमत्वमनैकान्तिकत्वम् । साधारणः साध्यवदन्यवृत्तिर्हेतुः । तेन च व्याप्तिग्रहप्रतिबन्धः क्रियते । असाधारणः साध्याऽसमानाधिकरणो हेतुः । तेन साध्यसामानाधिकरण्यग्रहः प्रतिबध्यते । तथा शब्दो नित्यः शब्दत्वादि-

---

५—**अनुमितिविरोधित्वमिति** ॥ लक्षणघटकानुमितिविरोधित्वमित्यस्यानुमितितत्करणान्यतरविरोधित्वमित्यर्थो बोध्यः । यादृशविशिष्टविषयकत्वेन ज्ञानस्यानुमितितत्करणान्यतरविरोधित्वं तत्त्वं हेत्वाभासत्वमित्यर्थः । अन्यथा–'वह्निर्धूमव्यभिचारी' इत्याकारकज्ञानस्य साक्षादनुमितिविरोधिता नास्तीति व्यभिचारादिहेतुष्वव्याप्तिः स्यात् । अनुमितिपदेनानुमितितत्करणान्यतरग्रहणे तु न दोष इति भावः ।

१—एकहेतौ=प्रमेयत्वादिहेतौ । हेत्वन्तरेण=धूमादिना ।

२—आद्याभावाद्यनवगाहित्वादित्यर्थः । **अयं भावः**—साध्याऽभावावगाहित्वाद् बाधादिदोषाणां साक्षादनुमितिप्रतिबन्धकत्वं युक्तं, नतु तथा व्यभिचारादिदोषाः साध्याभावावगाहिनः सपक्षस्थले साध्याभावानवगाहित्वात्तेषाम्, तथापि दर्शितरीत्या अनुमितिकरणव्याप्तिज्ञानादिप्रतिबन्धकतया तेषां परम्परया साध्याभावानवगाहितया प्रतिबन्धकत्वमस्ति । एवञ्च—हेत्वाभाससामान्यलक्षणस्य " धूमवान्वन्हे " रित्यादौ न क्षतिः=नाव्याप्तिरित्यर्थः ।

३—**यादृशेति**—अस्यायमर्थः—यत्पक्षके यत्साध्यके हेतौ यावन्तो दोषाः प्रतीयेरन् तावन्त एव तत्र भिन्ना २ हेत्वाभासा मन्तव्याः ।

४—**पञ्चत्वकथन**न्त्विति—(न्या० २।२।४५) सूत्रे आचार्यस्य पञ्चोक्तिः तत्सम्भवस्थलाभिप्रायेण । तथाहि—" वायुर्गन्धवान् स्नेहात् " इत्यत्र गन्धाभाववति जले वृत्तित्वात् स्नेहहेतुर्व्यभिचारी, गन्धवत्यां पृथिव्यामविद्यमानत्वात् विरुद्धोऽपि, वायुर्गन्धाभाववान् अपृथिवीत्वात् इति सत्प्रतिपक्षितोऽपि, स्नेहहेतुर्वाय्वात्मके पक्षे न वर्त्तते तथा " पाकजगुणवत्त्व " रूपोपाधिना सोपाधिक इत्यसिद्धः, स्नेहहेतोर्गन्धात्मकसाध्यस्य पक्षेऽभाव इति बाधितोपि इत्यभिप्रायानुसारं पञ्चधोक्तिः ।

प्रश्नाः—किं पञ्चैव हेत्वाभासाः ततोऽधिकाः ? अधिका अपीति चेत् ? केनाभिप्रायेणाचार्याणां पञ्चोक्तिः ? अनैकान्तिकस्य किं लक्षणम् ? कति च भेदाः ? कानि चोदाहरणानि ? तेषु लक्षणसङ्गमनप्रकारश्च कीदृशः ? केन च किं २ प्रतिबध्यते ?

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

त्यादावसाधारण्यम्, शब्दोऽनित्यः शब्दत्वादित्यादौ त्वसाधारण्य-भ्रमः। अन्ये तु सपक्षावृत्तिरसाधारणः। सपक्षश्च निश्चितसाध्य-वान्। इत्थं च शब्दोऽनित्यः शब्दत्वादित्यादौ यदा पक्षे साध्य-निश्चयस्तदा नासाधारण्यं तत्र हेतुनिश्चयादिति वदन्ति। अनुपसं-हारी चात्यन्ताभावाप्रतियोगिसाध्यकादिः। अनेन च व्यतिरेक व्याप्तिज्ञानप्रतिबन्धः क्रियते। विरुद्धस्तु[1] साध्यव्यापकीभूताभावप्र-तियोगी। अयं साध्याभावग्रहसामग्रीत्वेन प्रतिबन्धकः। सत्प्रतिपक्षे तु प्रतिहेतुः (द्वितीयहेतुः) साध्याभावसाधकः, अत्र तु हेतुरेवेति विशेषः। साध्याभावसाधक एव हेतुः साध्यसाधकत्वेनोपन्यस्त इति अशक्तिविशेषोपस्थापकत्वाच्च विशेषः।[2] सत्प्रतिपक्षः साध्याभावव्या-प्यवान्पक्षः। अगृहीताऽप्रामाण्यकसाध्यव्याप्यवत्त्वोपस्थितिकालीना-गृहीताप्रामाण्यकसाध्याभावव्याप्यवत्त्वोपस्थितिविषयस्तथेत्यन्ये। अत्र च परस्पराभावव्याप्यवत्ताज्ञानात्परस्परानुमितिप्रतिबन्धः फलम्।[3] अत्र केचित्—यथा घटाभावव्याप्यवत्ताज्ञाने विद्यमानेऽपि घटचक्षुःसंयोगे सति घटवत्ताज्ञानं जायते। यथा च शङ्खे सत्यपि पीतत्वाभावव्या-प्यशङ्खत्ववत्ताज्ञाने सति पित्तादिदोषे पीतः शङ्ख इति धीर्जायते। एवं कोटिद्वयव्याप्यदर्शनेऽपि कोटिद्वयस्य प्रत्यक्षरूपः संशयो भवति। तथा सत्प्रतिपक्षस्थले संशयरूपानुमितिर्भवत्येव। यत्र चैककोटिव्या-प्यदर्शनं तत्राऽधिकबलतया द्वितीयकोटिभानप्रतिबन्धान्न संशयः। फलबलेन चाधिकसमबलभावः कल्प्यत इति वदन्ति। तन्न। तद-

---

१—विरुद्धस्त्विति—साध्यव्यापकीभूतो योऽभावः तस्य प्रतियोगी हेतुर्विरुद्धः। यथा "शब्दो नित्यः कृतकत्वात्" इति। अत्र शब्दात्मके पक्षे नित्यत्वसाधनाय प्रयुक्तः कृतकत्वादिति हेतुः साध्याभावेन अनित्यत्वेन व्याप्तः। साध्यसाधनाय प्रयुक्तो हेतुश्चेत्साध्याभावमेव साधयेत् तदासौ विरुद्ध इति सारः।

२—अस्योदाहरणं यथा—'ह्रदो वह्निमान् धूमात्' ह्रदो वन्ह्यभाववान् जलात् इत्यादि। इदञ्च लक्षणं दीधित्यनुसारि।

३—सत्प्रतिपक्षः साध्यतदभावयोः संशयं जनयति नत्वनुमितिमपि रुणद्धीति रत्नकोश-कारमतमुपन्यस्यति—अत्र केचिदिति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भावव्याप्यवत्ताज्ञाने सति तदुपनीतभानविशेषशाब्दबोधादेरनुदया-ल्लौकिकसंनिकर्षाजन्यदोषविशेषाजन्यज्ञानमात्रे तस्य प्रतिबन्धकता लाघवात्। नतूपनीतभानविशेषे शाब्दबोधे च पृथक्प्रतिबन्धकता गौरवात्। तथा च प्रतिबन्धकसत्त्वात्कथमनुमितिः। नहि लौकिकसंनिकर्ष-स्थले प्रत्यक्षमिव सत्प्रतिपक्षस्थले संशयाकारानुमितिः प्रामाणिकी, येनानुमितिभिन्नत्वेनापि विशेषणीयम्। यत्र च कोटिद्वयव्याप्यवत्ताज्ञानं तत्रोभयत्राऽप्रामाण्यज्ञानात्संशयो नान्यथाऽगृहीताप्रामाण्यकस्यैव विरोधिज्ञानस्य प्रतिबन्धकत्वादिति। असिद्धिस्त्वाश्रयासिद्ध्याद्यन्यत-मत्वम्। आश्रयासिद्धिः पक्षे पक्षतावच्छेदकस्याभावः। यत्र च काञ्चन-मयः पर्वतो वह्निमानिति साध्यते तत्र, पर्वतो न काञ्चनमय इति ज्ञाने विद्यमाने काञ्चनमये पर्वते परामर्शप्रतिबन्धः फलम्। स्वरूपा-सिद्धिस्तु पक्षे व्याप्यत्वाभिमतस्य हेतोरभावः। अत्र ह्रदो द्रव्यं धूमादित्यादौ पक्षे व्याप्यत्वाभिमतस्य हेतोरभावे ज्ञाते पक्षे साध्य-व्याप्यहेतुमत्ताज्ञानरूपस्य परामर्शस्य प्रतिबन्धः फलम्। साध्या-प्रसिद्धिरपि व्याप्यत्वासिद्धिः। सा च साध्ये साध्यतावच्छेद-कस्याभावः, तथाच काञ्चनमयवह्निमानित्यादौ साध्ये साध्यताव-च्छेदकाभाव ज्ञाते साध्यतावच्छेदकविशिष्टसाध्यव्याप्यवत्ताज्ञान-रूपपरामर्शप्रतिबन्धः फलम्। एवं हेतौ हेतुतावच्छेदकाभावः साधनाप्रसिद्धिः। यथाच काञ्चनमयधूमादित्यादौ। अत्र हेतुता-वच्छेदकविशिष्टहेतोर्ज्ञानाभावात्तद्धेतुकव्याप्तिज्ञानादरभावः फलम्। एवं वह्निमान् नीलधूमादित्यादौ गुरुतया नीलधूमत्वं हेतुतानव-च्छेदकमपि व्याप्यत्वासिद्धिरित्यपि वदन्ति। बाधस्तु पक्षे साध्या-

१—ज्ञानलक्षणाजन्यसाक्षात्कारः उपनीतभानम्।

२—रत्नकोशकारेण 'स्थाणुर्वा पुरुषो वा' इति प्रत्यक्षसंशयमुदाहृत्य सत्प्रतिपक्षस्थले संशयानुमितेः स्थापनं कृतम् तस्य खण्डनमिदं यत्र चेति।

३—अत्र द्रव्यत्वव्याप्यधूमवानयं ह्रदः इति परामर्शानुदयः फलम्?

प्रश्नाः—अत्र पृष्टे यथा प्रश्ना भवितुमर्हन्ति तथा स्वयं कल्पनीयाः।

४—बाधं निरूपयति बाधस्त्विति। अस्योदाहरणं "वह्निरनुष्णो द्रव्यत्वात्" इति—

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भावादिः । एतस्यानुमितिप्रतिबन्धः फलम् । तद्धर्मिकतदभावनिश्चयो लौकिकसंनिकर्षाजन्यदोषविशेषाजन्यतद्धर्मिकतज्ज्ञानमात्रे विरोधीति । न तु संशयसाधारणं पक्षे साध्यसंसृष्टत्वज्ञानमनुमितिकारणं तद्विरोधितया च बाधसत्प्रतिपक्षयोर्हेत्वाभासत्वमिति युक्तम्[1] । अप्रसिद्धसाध्यकानुमित्यनापत्तेः[2], साध्यसंशयादिकं विनाऽप्यनुमित्युत्पत्तेश्च । एवं साध्याभावज्ञाने[3] प्रमात्वज्ञानमपि न प्रतिबन्धकं प्रमाणाभावाद्गौरवाच्च । अन्यथा सत्प्रतिपक्षादावपि तदभावव्याप्यवत्ताज्ञाने प्रमात्वविषयकत्वेन प्रतिबन्धकतापत्तेः । किंतु[4] भ्रमत्वज्ञानाऽनास्कन्दितबाधादिबुद्धेः प्रतिबन्धकता । तत्र भ्रमत्वशङ्काविघटनेन प्रामाण्यज्ञानं क्वचिदुपयुज्यते । नच बाधस्थले पक्षे हेतुसत्त्वे व्यभिचारः, पक्षे

यत्र पक्षे साध्यं न तिष्ठति तत्र बाधाख्यो दोषः । तस्य च एकज्ञानविषयत्वम् । अत्र वह्निरूपे पक्षे साध्यस्यानुष्णत्वस्य अभावः उष्णत्वरूपः स्पार्शनप्रत्यक्षेण निश्चितः इति द्रव्यत्वं हेतुर्बाधितः ।

अस्य साक्षादनुमितिप्रतिबन्धकत्वे नियामकमाह—**तद्धर्मिकेति** । अनाहार्याप्रमाण्यज्ञानाऽनास्कन्दिततद्धर्मिकतदभावनिश्चयः । अत्रायमर्थः—

प्रत्यक्षातिरिक्तं ज्ञानमात्रं लौकिकसन्निकर्षाजन्यम् । "पीतः शङ्खः" इति ज्ञानं दोषविशेषजन्यम्, तद्भिन्नञ्च ज्ञानमात्रं प्रति तद्धर्मिकतदभावनिश्चयो विरोधी ।

१—न तु युक्तमित्यग्रेणान्वयः ।

२—"पृथिवी इतरभेदवती गन्धवत्त्वात्" इत्यनुमितेरनापत्तेरित्यर्थः । एतादृशाया अनुमितेः पूर्वं पृथिव्यात्मके पक्षे जलादिभेदरूपसाध्यसम्बन्धस्य ज्ञानं न केनापि प्रकारेण जातं, तस्मात्—साध्यसंसृष्टत्वज्ञानं नानुमितिहेतुरिति भावः ।

साध्यसंशयादिकं विनेति—"गगनं मेघवत् घनगर्जनात्" इत्यत्र संशयाभावे अनुमित्युत्पत्तेः संशयसाधारणमित्युक्तमपि दुरुक्तमित्यर्थः ।

३—"ह्रदो वह्निमान्" इत्यनुमितिं प्रति "ह्रदो वह्न्यभाववान्" इत्याकारकज्ञाने यत् "इदं ज्ञानं प्रमा" इति यथार्थनिश्चयः स एव प्रतिबन्धक इति प्राचीनैकदेशिमतं खण्डयति—"**साध्याभावज्ञाने**" इति । तादृशप्रमात्वनिश्चयस्य ग्राह्याभावानवगाहित्वेन प्रतिबन्धकत्वं न सम्भवतीति समाधानमाह—**प्रमाणाभावा**दिति । पक्षविशेष्यकसाध्याभावावगाहिज्ञाने प्रमात्वनिश्चयत्वेन प्रतिबन्धकतायां गौरवं तदपेक्षया संशयनिश्चयसाधारणाऽप्रामाण्यज्ञानाभावत्वेन प्रतिबन्धकताकल्पने लाघवमिति तु परमार्थः ।

प्रश्नः—बाधस्य लक्षणमुदाहरणे योजयित्वा बाधादिस्थले प्रतिबध्यप्रतिबन्धकभावे प्राचां मतमुपदर्श्य सिद्धान्तिमतेन तत्राऽर्थं स्फुटीकुरु ?

४—कस्य तर्हि प्रतिबन्धकतेति शिष्यजिज्ञासायामाह—"किन्तु" इत्यादि ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

हेत्वभावे तु स्वरूपासिद्धिरेव दोष इति वाच्यम्, बाधज्ञानस्य[1] व्यभिचारज्ञानादेर्भेदात् । किंच—यत्र परामर्शानन्तरं बाधबुद्धिस्तत्र व्यभिचारज्ञानस्याकिंचित्करत्वाद्बाधस्यानुमितिप्रतिबन्धकत्वं वाच्यम् । एवं[2] यत्रोत्पत्तिक्षणावच्छिन्ने घटादौ गन्धव्याप्यपृथिवीत्ववत्ताज्ञानं तत्र बाधस्यैव प्रतिबन्धकत्वं वाच्यम् । नच पक्षे घटे गन्धसत्त्वात्कथं बाध इति वाच्यम्, पक्षतावच्छेदकदेशकालावच्छेदेनानुमितेरनुभवसिद्धत्वादिति । बाधसत्प्रतिपक्षभिन्ना[3] ये हेत्वाभासास्तद्व्याप्या अपि तन्मध्य एवान्तर्भवन्ति । अन्यथा हेत्वाभासाधिक्यप्रसङ्गात् । बाधव्याप्यसत्प्रतिपक्षस्तु भिन्न एव, स्वतन्त्रेच्छेन मुनिना पृथगुपदेशात् । सत्प्रतिपक्षव्याप्यस्तु न प्रतिबन्धक इतिग्रघट्टकार्थः ॥७१-७२॥

यः सपक्षे विपक्षे च भवेत्साधारणस्तु सः ।

यः सपक्ष इति । सपक्षविपक्षवृत्तिः साधारण इत्यर्थः । सपक्षो निश्चितसाध्यवान् । विपक्षः साध्याभाववान् । विरुद्धवारणाय सपक्षवृत्तित्वमुक्तम् । वस्तुतो विपक्षवृत्तित्वमेव वाच्यम्, विरुद्धस्य साधारणत्वेऽपि दूषकताबीजस्य भिन्नतया तस्य पार्थक्यात्[4] ।

१—तथा च—बाधस्थले असिद्धिव्यभिचारान्यतरनियमेऽपि बाधज्ञानस्य व्यभिचारादिविषयकत्वाभावेन तस्य हेत्वाभासान्तरत्वमिति भावः ।

२—व्यभिचाराद्यसङ्कीर्णं बाधस्थलं दर्शयति—**एवमिति** ।

३—बाधसत्प्रतिपक्षभिन्ना ये हेत्वाभासाः व्यभिचारादयस्तद्व्याप्या अपि तन्मध्येऽन्तर्भवन्ति । व्यभिचारादेरिव व्यभिचारादिव्याप्यस्यापि व्याप्तिग्रहप्रतिबन्धकज्ञानविषयत्वेन पञ्चहेत्वाभासानन्तर्गतत्वे तस्याऽतिरिक्तहेत्वाभासत्वं स्यादित्यर्थः ।

४—पार्थक्यादिति—साधारणः—अव्यभिचारज्ञानप्रतिप्रतिबन्धकः । विरुद्धस्तु सामानाधिकरण्यग्रहस्य प्रतिबन्धकः एवं दूषकताबीजस्य भिन्नत्वात् । **अत्रेदमपि** बोध्यम्—साध्यतावच्छेदकसम्बन्धेन साध्यवत्ताग्रहं प्रति येन सम्बन्धेन साध्याभाववत्तानिश्चयः प्रतिबन्धकः तेन सम्बन्धेन साध्याभाववत्त्वं विवक्षणीयमिति । तथाच—साध्यतावच्छेदकसम्बन्धावच्छिन्न—साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभाववन्निरूपितहेतुतावच्छेदकसम्बन्धावच्छिन्नाधेयतावान् **साधारण** इत्यर्थः। तेन "वह्निमान् धूमात्" इत्यादौ हेतुमिति पर्वतादौ तत्तत्साध्याभावस्य सम्बन्धान्तरावच्छिन्नसाध्यसामान्याभावस्य च सत्त्वेऽपि, साध्याभाववति धूमावयवादौ समवायादिना धूमादेर्वृत्तित्वेऽपि नातिव्याप्तिः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

यस्तूभयस्माद्व्यावृत्तः स चाऽसाधारणो मतः ॥७३॥

यस्तूभयस्मादिति । सपक्षविपक्षव्यावृत्त इत्यर्थः । सपक्षः साध्यवत्तया निश्चितः । विपक्षः साध्यशून्यतया निश्चितः । शब्दोऽनित्यः शब्दत्वादित्यादौ यदा शब्देऽनित्यत्वसन्देहस्तदा सपक्षत्वं घटादीनामेव, तद्व्यावृत्तं च शब्दत्वमिति तदा तदसाधारणम्[2] । यदा तु शब्देऽनित्यत्वनिश्चयस्तदा नासाधारणः । इदं च प्राचां मतम् । नवीनमतं तु पूर्वमुक्तम् ॥ ७३ ॥

तथैवानुपसंहारी केवलान्वयिपक्षकः ।

तथैवेति । केवलान्वयिपक्षक इति । केवलान्वयिधर्मावच्छिन्नपक्षक इत्यर्थः । सर्वमभिधेयं प्रमेयत्वादित्यादौ सर्वस्यैव[3] पक्षत्वात्सामानाधिकरण्यग्रहस्थलान्तराभावान्नानुमितिः । इदं तु न सम्यक्, पक्षैकदेशे सहचारग्रहेऽपि* क्षतेरभावात् । अस्तु वा सहचाराग्रहस्तावताऽप्यज्ञानरूपासिद्धिरेव न तु हेत्वाभासत्वं तस्य, तथापि केवलान्वयिसाध्यकत्वं तत्त्वमित्युक्तम् ।

यः साध्यवति नैवास्ति स विरुद्ध उदाहृतः ॥७४ ॥

१—यदा शब्दोऽनित्यः शब्दत्वात्—इत्यादौ शब्दात्मकपक्षे अनित्यत्वसंदेहस्तदा सपक्षः घटपटादिकं भवति, तत्तु—अनित्यत्वरूपसाध्यवत्त्वेन निश्चितमस्ति, विपक्षः गगनादिकमस्ति ताभ्यां व्यावृत्तः शब्दरूपपक्षमात्रे स्थितो हेतुरसाधारणो जातः । परन्तु यदि शब्दे कृतकत्वेन हेतुना अनित्यत्वनिश्चयस्तदा शब्दत्वरूपो हेतुरसाधारणो न भवति । नवीनमते तु—साध्यासमानाधिकरणो हेतुरसाधारणः इत्युक्तम् ।

२—अत्र शब्दत्वं हि सर्वेभ्यो नित्येभ्यो ऽनित्येभ्यश्च व्यावृत्तं शब्दमात्रवृत्ति, अतः शब्दत्वं हेतुरसाधारणः । एतस्य हेतोः साध्याऽसाहचर्ये निश्चिते साध्यसामानाधिकरण्यरूपव्याप्तिज्ञानप्रतिबन्धः फलम् ।

३—अस्य "यत्र २ प्रमेयत्वं तत्र २ अभिधेयत्वम्" इति व्याप्तिज्ञानस्थलान्तराभावेन साक्षादनुमितिप्रतिबन्धकत्वम् ।

* **नच संशयसामग्र्या सत्त्वात्** कथं पक्षैकदेशे साध्यनिश्चय इति वाच्यम्, सर्वत्वधर्मितावच्छेदकसंशयसामग्रीसत्त्वेऽपि घटत्वादिधर्मितावच्छेदकसाध्यनिश्चयोत्पादे बाधकाऽभावात् समानप्रकारकत्वेनैव विरोधात् इति **दिनकरी** ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

यः साध्यवतीति । एवकारेण साध्यवत्त्वावच्छेदेन हेत्वभावो बोधितः । तथा च साध्यव्यापकीभूताभावप्रतियोगित्वं तदर्थः ॥७४॥

आश्रयासिद्धिराद्या स्यात्स्वरूपासिद्धिरप्यथ ।
व्याप्यत्वासिद्धिपरा स्यादसिद्धिरतस्त्रिधा ॥ ७५ ॥
पक्षासिद्धिर्यत्र पक्षो भवेन्मणिमयो गिरिः ।
ह्रदो द्रव्यं धूमवत्त्वादत्रासिद्धिरथापरा ॥ ७६ ॥
व्याप्यत्वासिद्धिरपरा नीलधूमादिके भवेत् ।

असिद्धिं विभजते । आश्रयासिद्धिरित्यादि । पक्षासिद्धिरिति । आश्रयासिद्धिरित्यर्थः । अपरेति । स्वरूपासिद्धिरित्यर्थः । नीलधूमादिक इति । नीलधूमत्वं गुरुतया न हेतुतावच्छेदकं स्वसमानाधिकरणव्याप्यतावच्छेदकधर्मान्तराघटितस्यैव व्याप्यतावच्छेदकत्वात् । धूमप्रागभावत्वसंग्रहाय स्वसमानाधिकरणेति ।

१—साध्याभावनिरूपितव्याप्त्याश्रयो हेतुर्विरुद्धो हेत्वाभास इत्यर्थः । अस्य पक्षविशेष्यकसाध्यप्रकारकानुमितिप्रतिबन्धः फलम् । अर्थात् "अनित्यत्वव्याप्यकृतकत्ववानयं शब्दः" इत्याकारकविरोधिपरामर्शज्ञानात् "नित्यः शब्दः" इत्यकारानुमितेः साक्षात्प्रतिबन्धः ।

२—अत्र 'आश्रयासिद्ध्याद्यन्यतमत्वमसिद्धत्वम्' इत्यसिद्धसामान्यलक्षणमिति ज्ञेयम् ।

३—पक्षाऽसिद्धिः, आश्रयासिद्धिरित्यनर्थान्तरम् । मणिमयः पर्वतो वह्निमान् धूमात्—इत्यादिस्थले आश्रयासिद्धिः ।

४—**स्वसमानाधिकरणेति**—अस्यायमाशयः—"लघुधर्मसमनियतगुरुधर्मस्याऽनवच्छेदकत्वम्" इत्यस्ति नियमः । अर्थात् यो धर्मो गुरुभूतोऽस्ति लघुधर्मसमनियतश्च नाऽसौ हेतुतावच्छेदकतया स्वीक्रियते । प्रकृते च 'स्व' पदेन नीलधूमत्वरूपो धर्मो गृह्यते, सच हेतुतावच्छेदको नास्ति; यतो नीलधूमत्वसमानाधिकरणकं व्याप्यतावच्छेदकं धर्मान्तरं यच्छुद्धधूमत्वम्, तेन नीलधूमत्वरूपो धर्मो घटित एवास्ति, अतो नीलधूमत्वस्य हेतुतानवच्छेदकत्वात् "यत्र २ नीलधूमः तत्र २ वह्नि" रिति व्याप्तेरभाव एव व्याप्यत्वाऽसिद्धिः । तादृशदोषवान् हेतु **र्व्याप्यत्वासिद्धः** इत्याशयः ।

स्वसमानाधिकरणपदनिवेशफलं दर्शयति—**धूमप्रागभावत्वेति** । विस्तृतश्चैतन्मदीयमुक्तावलीप्रभायाम् ।

प्रश्नाः—नीलधूमत्वस्यावच्छेदकत्वाभावे का युक्तिः ? सत्प्रतिपक्षस्य किं लक्षणम् ? उदाहरणे तत्सङ्गतिश्च कथम् ? ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विरुद्धयोः परामर्शे हेत्वोः सत्प्रतिपक्षता ॥ ७७ ॥

विरुद्धयोरिति । कपिसंयोगतदभावव्याप्यवत्तापरामर्शेऽपि न सत्प्रतिपक्षत्वमत उक्तं–विरुद्धयोरिति । तथा च स्वसाध्यविरुद्धसाध्याभावव्याप्यवत्तापरामर्शकालीनसाध्यव्याप्यवत्तापरामर्शविषय इत्यर्थः ॥ ७५ ॥ ७६ ॥ ७७ ॥

साध्यशून्यो यत्र पक्षस्त्वसौ बाध उदाहृतः ।
उत्पत्तिकालीनघटे गन्धादिर्यत्र साध्यते ॥ ७८ ॥

साध्यशून्य इति । पक्षः पक्षतावच्छेदकविशिष्ट[2] इत्यर्थः । तेन घटे गन्धसत्त्वेऽपि न क्षतिः । एवं मूलावच्छिन्नो वृक्षः कपिसंयोगीत्यत्रापि बोध्यम् ॥ ७८ ॥

इति श्रीविश्वनाथन्यायपञ्चाननभट्टाचार्यविरचितायां सिद्धान्तमुक्तावल्यामनुमानखण्डम् ।

उपमितिं[3] व्युत्पादयति—

ग्रामीणस्य प्रथमतः पश्यतो गवयादिकम् ।
सादृश्यधीर्गवादीनां या स्यात्सा करणं मतम् ॥७९॥

१—अस्यायमाशयः—वादिना "ह्रदो वह्निमान् धूमात्" इति स्थापना कृता । एवं धूम हेतुं सत्प्रतिपक्षयता सिद्धान्तिना—"ह्रदो वह्न्यभाववान् जलात्" इति प्रतिस्थापना कृता । तत्र 'स्व' पदेन जलहेतोर्ग्रहणं, तस्य साध्यो वन्ह्यभावः, तद्विरुद्धं वह्निरूपं साध्यम्, तस्याभावविषयको यः परामर्शः—'वन्ह्यभावव्याप्यजलवानयं ह्रदः' इत्याकारकः, एतादृशपरामर्शकाल एव जायमानो यो 'वह्निव्याप्यधूमवानयं ह्रदः' इत्याकारः परामर्शः, तादृशपरामर्शविषयता धूमहेतौ विद्यत इति ह्रदात्मकपक्षे वह्निसाधनाय दीपमानो धूमहेतुः सत्प्रतिपक्षितः ।

२–**पक्षतावच्छेदकविशिष्ट** इति । अर्थात् पक्षतावच्छेदकदेशकालादिविशिष्टस्यैव ग्रहणम्, तेन घटोत्पत्तिकालोत्तरकाले घटे गन्धसत्त्वेऽपि न बाधलक्षणस्याऽव्याप्तिरिति भावः ।

प्रश्नाः—उपमानस्य लक्षणं दर्शयित्वा तत्र व्यापारं ब्रूहि ? उपमितिं लक्षयित्वा तस्याः सर्वप्रकारं दर्शय ?

३—अवसरसङ्गत्या उपमितिं निरूपयति **उपमितिमिति** । अवश्यवक्तव्यमवसरः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वाक्यार्थस्यातिदेशस्य स्मृतिर्व्यापार उच्यते ।
गवयादिपदानां तु शक्तिधीरुपमा फलम् ॥८०॥

यत्रारण्यकेन केनचिद् ग्रामीणं प्रत्युक्तं गोसदृशो गवयपदवाच्य इति । पश्चाद् ग्रामीणेन क्वचिदरण्यादौ गवयो दृष्टस्तत्र गोसादृश्यज्ञानं यज्जातं तदुपमितिकरणम् । तदनन्तरं गोसदृशो गवयपदवाच्य इत्यतिदेशवाक्यार्थस्मरणं यज्जायते तदेव व्यापारः । तदनन्तरं तत्र गवयो गवयपदवाच्य इति ज्ञानं यज्जायते तदुपमितिः न त्वयं गवयपदवाच्य इत्युपमितिः, गवयान्तरे शक्तिग्रहाभाव-प्रसङ्गात् ॥ ७९ ॥ ८० ॥

इति श्रीविश्वनाथन्यायपञ्चाननभट्टाचार्यविरचितायां सिद्धान्त-मुक्तावल्यामुपमानखण्डम् ।

शाब्दबोधप्रकारं दर्शयति—

पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः ।
शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी ॥ ८१ ॥

पदज्ञानन्त्विति । ननु ज्ञायमानं पदं करणं पदाभावेऽपि

१—उपमितिसामग्रीमुपमितिस्वरूपञ्च दर्शयति—**यत्रेति** । यत्र=यस्मै ग्रामीणायेत्यर्थः । "गोसदृशो गवयपदवाच्यः" इत्युपमानाकारो दर्शितः । "उपमितिकरणमुपमानम्" इत्युपमानलक्षणम् । **उपमितिकरणत्वञ्च**—उपमितित्वावच्छिन्नकार्यतानिरूपितकारणताश्रयत्वे सति उपमितिव्यापारजनकत्वम् ।

केचितु—सादृश्यप्रत्यक्षं न करणम् । अपितु अतिदेशवाक्यार्थः इति शिष्टं पूर्ववदित्याहुः । **वेदान्तिनस्तु** गवयनिष्ठगोसादृश्यप्रत्यक्षं करणम् । "अनेन सदृशी मदीया गौः" इत्युपमितिः फलमित्याहुः ।

२—उपजीव्योपजीवकभावसङ्गतिमभिप्रेत्योपमानानन्तरं शाब्दबोधप्रकारं दर्शयितुमाह—**शाब्दबोधेति**—शाब्दबोधलक्षणन्तु—एकपदार्थेऽपरपदार्थसंसर्गविषयकं ज्ञानं **शाब्दबोध** इति ज्ञेयम् । यथा—"नीलो घटः" इति वाक्याज्जायमानं घटपदार्थे नीलाभेदसंसर्गं विषयीकुर्वत् "नीलाभिन्नो घटः" इत्याकारकं ज्ञानमिति दिक् ।

३—शाब्दबोधे पदज्ञानं करणं नतु ज्ञायमानं पदम् । अत्रायमाशयः—शब्दत्वावच्छेदेन शब्दमात्रस्य ज्ञानं श्रोत्रादेवेति वस्तुस्थितिः । पदमपि शब्दविशेषः, तस्यापि ज्ञानं श्रोत्रेन्द्रिया-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मौनिश्लोकादौ शाब्दबोधात् । पदार्थधीरिति । पदजन्यपदार्थस्मरणं व्यापारः । अन्यथा पदज्ञानवतः प्रत्यक्षादिना पदार्थोपस्थितावपि शाब्दबोधापत्तेः । तत्रापि वृत्त्या पदजन्यत्वं बोध्यम् । अन्यथा घटादिपदात्समवायसम्बन्धेनाकाशस्मरणे जाते आकाशस्यापि शाब्दबोधापत्तेः। वृत्तिश्च[1] शक्तिलक्षणान्यतरः सम्बन्धः। अत्रैव[2] शक्तिज्ञानस्योपयोगः । पूर्वं शक्तिग्रहाभावे पदज्ञानेऽपि तत्सम्बन्धेन स्मरणानुपपत्तेः । पदज्ञानस्य च एकसम्बन्धिज्ञानविधयाऽर्थस्मारकत्वम् । शक्तिश्च[3] पदेन सह पदार्थस्य सम्बन्धः । स चास्माच्छब्दादयमर्थो बोद्धव्य इतीश्वरेच्छारूपः । आधुनिके नाम्नि शक्तिरस्त्येव । एकादशेऽहनि पिता नाम कुर्यादितीश्वरेच्छायाः सत्त्वात् । आधुनिके तु सङ्केते न * शक्तिरिति संप्रदायः। नव्यास्तु ईश्वरेच्छा न शक्तिः, किंत्विच्छैव तेनाऽधुनिकसंकेतेऽपि शक्तिरस्त्येवेत्याहुः । शक्तिग्रहस्तु[4]

देव। परन्तु यदा मौनिपुरुषेण=अक्षरलेखद्वारा हस्तादिचेष्टाद्वारा वा परः प्रत्याययितव्यस्तत्र पदोच्चारणाभावेऽपि केवलपदज्ञानमात्रेण शाब्दबोधो भवति तस्माज्ज्ञायमानं पदं न करणं किन्तु पदज्ञानम्, अतः प्राचां मतमयुक्तमिति ध्येयम् ।

१—वृत्तिर्नाम अर्थस्मृत्यनुकूलः पदपदार्थयोः परस्परसम्बन्धः । स च द्विविधः शक्तिरूपो लक्षणारूपश्च ।

२—अत्रैव=पदजन्यपदार्थोपस्थितावेव शक्तिज्ञानस्योपयोगः । एकसम्बन्धिज्ञानविधया अर्थात् "एकसम्बन्धिज्ञानमपरसम्बन्धिस्मारकम्" इति नियमेन हस्तिनं दृष्ट्वा हस्तिपकस्य, तं च दृष्ट्वा हस्तिनः स्मरणं भवति—एवमेव पदज्ञानस्यापि सम्बन्धिज्ञानविधयार्थस्मारकत्वमास्ति ।

३—**वैयाकरणाः, पातञ्जलाश्च**—वाच्यवाचकभावमूलभूतपदतदर्थयोरध्यासरूपं तादात्म्यमेव "**शक्ति**" रित्याहुः । **वेदान्तिन**श्च—स्वस्वकार्यकरणसामर्थ्यमेव पदार्थमात्रे शक्तिः। पदे तु सा अर्थबोधकत्वमेव शक्तिरित्याहुः। इयांस्तु विशेषः—यत् अन्यशक्तिः स्वरूपसती कार्यकरी, पदे तु ज्ञातैव सेति ।

प्रश्नाः—शाब्दबोधस्य किं लक्षणम् ? ज्ञायमानं पदं करणम् ? पदज्ञानं वा ? अनयोर्यतरः पक्षो निर्दुष्टस्ते भाति ततर उपपाद्यः ? शब्दप्रमाणस्य किं लक्षणम् ? तत्र को व्यापारः ? फलञ्च किम् ? कुत्र शक्तिज्ञानस्योपयोगः ? केन सम्बन्धेन पदजन्यत्वं बोध्यम् ? पदज्ञानेन पदार्थस्मृतौ कों हेतुः ? शक्तेः किं लक्षणम् ? तत्र नवीनप्राचीनमते दर्शय ? आधुनिके नाम्नि शक्तिरस्ति नवा ?

*—किन्तु ते आधुनिकाः सङ्केताः पारिभाषिका इत्यर्थः ।

४—ननु कानि शक्तिज्ञानस्य प्रयोजकानि इत्याकाङ्क्षायामाह—"शक्तिग्रहस्तु" इति । अभियुक्तोक्तिं प्रमाणयति—'तथाहि' इति ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

व्याकरणादितः। तथा हि-

शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद्व्यवहारतश्च।
वाक्यस्य शेषाद्विवृतेर्वदन्ति सांनिध्यतः सिद्धपदस्य वृद्धाः॥

धातुप्रकृतिप्रत्ययादीनां शक्तिग्रहो व्याकरणाद्भवति[1]। क्वचित्सति बाधके त्यज्यतेऽपि। यथा वैयाकरणैराख्यातस्य[2] कर्तरि शक्तिरुच्यते चैत्रः पचतीत्यादौ कर्त्रा सह चैत्रस्याभेदान्वयः। तच्च गौरवात्त्यज्यते, किंतु कृतौ शक्तिर्लाघवात्[3]। कृतिश्चैत्रादौ[4] प्रकारीभूय भासते। नैव[5]

१—यथा 'भू' धातोः सत्तायाम्। 'वर्त्तमाने लट्' (३।२।१२३) इति सूत्रेण लटो वर्त्तमानकाले। ण्वुलादिप्रत्ययानां कर्त्तरि। तथाच—पाचक इति पाककर्त्तेत्यर्थः, इत्यादि व्याकरणमतेन शक्तिग्रहः।

२—वैयाकरणैरिति—"लःकर्मणि—(३।४।६९) इति सूत्रप्रमाणेनेत्यर्थः। तथाच-'चैत्रः पचति" इत्यत्र तिप्प्रत्ययस्य कर्त्ता कालः संख्या चेत्यर्थः। तत्र—"सामान्यविशेषयोरभेदान्वय' इति नियमेन तिप्प्रत्ययवाच्यभूतेन कर्त्तृरूपेणार्थेन चैत्रस्याऽभेदान्वयः। एवञ्च—एकत्वसङ्ख्याश्रयचैत्राभिन्नकर्त्तृवृत्तिवर्त्तमानकालिकपाकाऽनुकूलो व्यापार इति बोध इति व्याकरणमतम्।

३—लः कर्मणीति व्याकरणसूत्रादाख्यातस्य कर्तरि यदि शक्तिः स्वीक्रियते तदा शक्यतावच्छेदकः कर्तृनिष्ठधर्मविशेषः कृतिरेव, साच प्रतिकर्तृ भिन्ना तथासति शक्यतावच्छेदकनानात्वं प्रसज्येत, नानाधर्माणामवच्छेदकधर्मविषयोपस्थितेः गौरवं स्यादतो लाघवादाख्यातस्य कर्तृनिष्ठधर्मविशेषे कृतौ शक्तिर्मन्तव्या। एवं च शक्यतावच्छेदको धर्मः—यावत्कृतिषु विद्यमाना कृतित्वजातिरेकैवेति परमलाघवम्।

४—कृतिश्चैत्रादाविति—तथाच 'चैत्रः पचति' इत्यादौ "एकत्वाश्रयवर्त्तमानकालिकपाकानुकूलकृतिमांश्चैत्र" इति न्यायनयाऽनुसारी शाब्दबोधः।

५—आख्यातप्रत्ययस्य कृत्यर्थकत्वं लाघवात् यदि स्वीक्रियते तदा कर्तुरनुक्तत्वाच्चैत्रेण पचतीति प्रयोगापत्तिः इति शङ्कायामुत्तरमिदम्। आख्यातप्रत्ययस्य कृतिः संख्याकालादयोऽनेकेऽर्थाः सन्ति। यत्र स्थले कर्तृगतसंख्या आख्यातप्रत्ययेनानुक्ता तत्रैव तृतीया विभक्ति भवति। प्रकृतोदाहरणे कर्तृगतैकत्वसंख्याया उक्तत्वात्—चैत्रः पचति—इत्यस्यैव साधुत्वं नतु चैत्रेण पचतीत्यस्यापि। संख्याया उक्तानुक्तत्वे गमकमाह—"कर्मत्वाद्यनवरुद्धः प्रथमान्तपदबोध्यः कर्ता संख्याभिधानयोग्यो भवति" इति। कर्मत्वाद्यनवरुद्ध इत्यस्—इतरविशेषणत्वेन तात्पर्याविषयत्वरूपः संकेतितोऽर्थः। तथाच—इतरविशेषणत्वेन तात्पर्याविशिष्टप्रथमान्तपदोपस्थाप्यः कर्ता संख्याभिधानयोग्य इति। चैत्र इव मैत्रो गच्छतीत्यादिस्थले गच्छत्युत्तरवर्त्याख्यातवाच्यसंख्यायाश्चैत्रेऽन्वयो भवितुं नार्हति किंतु मैत्रेऽन्वयः। चैत्रपदार्थः इवपदार्थसादृश्ये विशेषणत्वेन तात्पर्यविषयः। तथा च चैत्रनिरूपितं यत् सादृश्यं, तादृशसादृश्येन यत् गमनं, तादृशगमनानुकूला या कृतिस्तादृशकृत्याश्रय एकत्वसंख्याविशिष्टो मैत्र इति शाब्दबोधः। तण्डुलं पचतीत्यादौ—आख्यातार्थसंख्यायाः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कर्तुरनभिधानाच्चैत्रादिपदानन्तरं तृतीया स्यादिति वाच्यम्, कर्तृसंख्यानभिधानस्य तत्र तन्त्रत्वात् । संख्याभिधानयोग्यश्च कर्मत्वाद्यनवरुद्धः प्रथमान्तपदोपस्थाप्यः । कर्मत्वादीत्यस्येतरविशेषणत्वतात्पर्याविषयत्वमर्थः । तेन चैत्र इव मैत्रो गच्छतीत्यादौ न चैत्रे संख्यान्वयः । यत्र कर्मादौ न विशेषणत्वे तात्पर्यं तद्वारणाय प्रथमान्तेति । यद्वा[1] धात्वर्थातिरिक्ताविशेषणत्वं प्रथमदलार्थः । तेन चैत्र इव मैत्रो गच्छतीत्यत्र चैत्रादेर्वारणम् । स्तोकं पचतीत्यादौ स्तोकादेर्वारणाय च द्वितीयदलम् । तस्य द्वितीयान्तोपस्थाप्यत्वाद्वारणमिति । एवं[2] व्यापारेऽपि न शक्तिर्गौरवात् । रथो गच्छतीत्यादौ तु स्वव्यापारे आश्रयत्वे वा लक्षणा । जानातीत्यादौ तु आश्रयत्वे, नश्यतीत्यादौ प्रतियोगित्वे निरूढलक्षणा । उपमानाद्यथा[3] शक्ति-

---

तण्डुलेऽन्वयवारणाय तथा चैत्रेण सुप्यते इत्यादौ धात्वर्थस्वापादौ संख्यान्वयवारणाय "प्रथमान्तपदोपस्थाप्य" इत्यस्य निवेशः ।

प्रश्नाः—कानि शक्तिग्राहकाणि ? कथञ्च तेषां शक्तिग्राहकत्वम् ? वैयाकरणैराख्यातस्य कुत्र शक्तिर्गृह्यते, नैयायिकैश्च कथं सा त्यज्यते ? कर्तुरनभिधाने 'चैत्रः पचति' इत्यत्र कथं तृतीयवारणं नैयायकैः क्रियते ? किञ्चोक्तकर्तुर्लक्षणम् ।

१—द्वितीयदलस्य प्रकारान्तरेण प्रयोजनं वक्तुमन्यथा प्रथमदलार्थमाह—**यद्वेति**—चैत्र इव मैत्रो गच्छतीत्यादौ चैत्रपदार्थो धात्वर्थात्—अतिरिक्त इवार्थसादृश्ये विशेषणमस्ति—अविशेषणं नास्तीति तद्वारणं जातम् । स्तोकं पचति, मृदु पचति—इत्यादौ 'क्रियाविशेषणानां कर्मत्वम्' इत्यनुशासनाद् द्वितीयान्तपदोपस्थाप्यत्वेन प्रथमान्तपदोपस्थाप्य इति द्वितीयदलस्याभावान्न दोषः ।

२—मीमांसकमतं निरस्यति **एवमिति**। जन्यत्वादिघटितव्यापारोऽपि यत्नत्व=कृतित्वजात्यपेक्षया गुरुभूतोऽस्त्यतो लाघवात्कृतावेव शक्तिः । रथो गच्छतीत्यादौ गमनानुकूलव्यापारेऽथवा गमनानुकूलव्यापारस्याश्रयत्वेऽनादितात्पर्यवती लक्षणा । अर्थात् फूत्कार—चुल्ल्युपरिधारण—दर्वीचालनैधोपसारणप्रभृतयो नाना व्यापाराः सन्ति तेषु शक्तिकल्पने महद् गौरवं परित्यज्य कृतित्वजातावेव लाघवाच्छक्तिरादरणीया । 'रथो गच्छति' इत्यादिस्थले तु कृतिरूपस्य मुख्यार्थस्य अचेतने रथादौ बाधात् व्यापारे लक्षणास्वीकारात्—'गमनानुकूलव्यापारवान् रथः' इति बोधः । नव्यमते तु—उत्तरदेशसंयोगानुकूला क्रिया गम्धातोरर्थः तस्याः आश्रयत्वे लक्षणा । तथाच—उत्तरदेशसंयोगानुकूलाक्रियाश्रयो रथ इति बोधः । एवमेवान्यत्रापि यथायोगं ज्ञेयम् ।

३—गोनिरूपितगवयनिष्ठसादृश्यसाक्षात्काररूपोपमानेन यथा 'गवयो गवयपदवाच्यः' इत्याकारकशक्तिग्रहो भवति तथोपमाननिरूपणे उक्तम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ग्रहस्तथोक्तम् । एवं कोशा[1]दपि शक्तिग्रहः सति बाधके क्वचित्त्यज्यते । यथा नीलादिपदानां नीलरूपादौ नीलादिविशिष्टे च शक्तिः, कोशेन व्युत्पादिता तथापि लाघवान्नीलादावेव शक्तिः नीलादिरूपविशिष्टे तु लक्षणेति । एवमाप्तवाक्यादपि यथा कोकिलः पिकपदवाच्य इत्यादिशब्दात्पिकादि[2]पदशक्तिग्रहः । एवं व्यवहारादपि । यथा प्र[4]योजकवृद्धेन घटमानयेत्युक्तम् । तच्छ्रुत्वा प्रयोज्यवृद्धेन घट आनीतः । [5]तदवधार्य पार्श्वस्थो [3]बालो घटानयनरूपं कार्यं घटमानयेतिशब्दप्रयोज्यमित्यवधारयति । ततश्च घटं नय गामानयेत्यादावावापोद्वापाभ्यां घटादिपदानां कार्यान्वितघटादौ शक्तिं गृह्णाति । इत्थं च भूतले

१—कोशादिति । 'गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वति' इत्यमरकोशेऽपि शुक्लनीलादिपदानां गुणनीलादिरूपेष्वेव शक्तिरुक्ता । नीलादिमत्त्वापेक्षया च नीलत्वादिजातेः शक्यतावच्छेदकत्वकल्पनायां लाघवात् । नीलादिरूपविशिष्टे च नीलादिपदस्य लक्षणेति सिद्धान्त एव युक्तः परे तु—एवंविधस्थले लक्षणायाः प्रयोजनं नास्ति "गुणवचनेभ्यो मतुपो लुगिष्टः" इति वार्त्तिकादेव लुप्तमतुप्प्रत्ययसरणेन बोधसंभवादित्याचक्षते ।

प्रश्नाः—मीमांसकमते कुत्र शक्तिः ? नैयायिकैः सा कया युक्त्या दूषितेति स्पष्टं स्वसंस्कृतेनोत्तरणीयम् ? नीलादिपदेषु शक्तिलक्षणापक्षमपि मतभेदेन दर्शय ?

२—पिकादिपदस्य कोकिले शक्तिग्रह इत्यर्थः । व्यवहारतः शक्तिग्रहमुपपादयति—"एवम्" इति ।

३—बालः=अज्ञातशक्तिः पुरुष इत्यर्थः ।

४—प्रयोजकवृद्धः = गुर्वादिः । प्रयोज्यवृद्धः=शिष्यादिः ।

५—अवधार्य = अनुमायेत्यर्थः । अनुमानप्रकारश्चायम्—"इयमस्य प्रवृत्तिः प्रयोजकवृद्धवाक्यश्रवणोत्तरपदपदार्थसम्बन्धज्ञानजन्या प्रवृत्तित्वात् मत्प्रवृत्तिवत्" इति । अत्र प्राभाकराणामयमाशयः—घटादिपदानां कार्यान्वितघटादावेवशक्तिरन्वयव्यतिरेकात् । ततश्च "भूतले नीलो घट" इत्यादि वाक्येभ्यो न शाब्दबोधः, यतः कार्यताबोधम्प्रति लिङादीनां सामर्थ्यावधारणात् सिद्धार्थ वाक्येषु च तदभावात् व्यवहारे च सर्वत्र क्रियान्वयदर्शनात् ।

अत्र नैयायिकानामिदं समाधानम्—यद्यपि प्रथमतः कार्यान्वित एवार्थे तत्तच्छब्दैर्बाला व्युत्पद्यन्ते अर्थात् ज्ञातशक्तिका भवन्ति, तथापि भिन्नेषु २ वाक्येषु तेषां तेषां शब्दानां भिन्नभिन्नायाः शक्तेः कल्पने महद्गौरवं प्राभाकरमीमांसकस्य । अर्थात् "गामानय" इत्यत्र गोपदस्यानयनक्रियान्विते, "गां धुक्ष्व" इत्यत्र दोहनक्रियान्विते । "गां पश्य" इत्यत्र दर्शनक्रियान्विते, "गां पालय" इत्यत्र पालनक्रियान्विते च गोपदस्य शक्तिः स्वीकर्त्तव्या भविष्यति इत्थमेकस्यापि गवादिपदस्य भिन्नभिन्नक्रियान्वितगवादौ शक्तिकल्पने कियद्गौरवं मीमांसकस्य ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

नीलो घट इत्यादिशब्दान्न शाब्दबोधः। घटादिपदानां कार्यान्विते-घटादिबोधे सामर्थ्यावधारणात्, कार्यताबोधं प्रति च लिङादीनां सामर्थ्यात्तदभावान्न शाब्दबोध इत्यपि केचित्। तन्न। प्रथमतः कार्यान्वितघटादौ शक्त्यवधारणेऽपि लाघवेन पश्चात्तस्य परित्यागौचित्यात्। अत एव "चैत्र पुत्रस्ते जातः कन्या ते गर्भिणी जाता" इत्यादौ मुखप्रसादमुखमालिन्याभ्यां सुखदुःखे अनुमाय तत्कारणत्वेन परिशेषाच्छाब्दबोधं निर्णीय तद्धेतुतया तं शब्दमवधारयति। तथा च व्यभिचारात्कार्यान्विते न शक्तिः। न च तत्र तं पश्येत्यादि शब्दान्तरमध्याहार्यं, मानाभावात्। चैत्र ! पुत्रस्ते जातो मृतश्चेत्यादौ तदभावाच्च। इत्थं च लाघवादन्वितघटेऽपि शक्तिं त्यक्त्वा घटपदस्य घटमात्रे शक्तिमवधारयति। एवं वाक्यशेषादपि शक्तिग्रहः। यथा यवमयश्चरुर्भवतीत्यत्र यवपदस्य दीर्घशूकविशेषे आर्याणां प्रयोगः, कङ्गौ च म्लेच्छानाम्, तत्र हि अथान्या ओषधयो म्लायन्तेऽथैते मोदमानास्तिष्ठन्ति, इति वाक्यशेषाद्दीर्घशूके शक्तिर्निर्णीयते, कङ्गौ तु

अपि च—गवादिपदानां भिन्नाभिन्नानयनादि क्रियान्विते शक्तिर्यथा, तथा आनयनादिक्रियापदानां गवादिकर्मकादिकारकान्वितेऽपि शक्तेरङ्गीकारे अवच्छेद्याऽवच्छेदेन पदमात्रस्य (क्रियाकारकवाचकपदानामित्यर्थः) परस्परम्पर्यायतापत्तौ कस्यापि द्रव्यवाचकता न स्यात् तथा सति भूतस्य भव्यानुपङ्क्तिताऽपि दत्तजलाञ्जलितामापद्येत, तस्मादादौ व्यवहारे क्रियान्विते स्वीकृताऽपि शक्तिः अन्ततस्त्याज्यैव। किन्तु—लाघवाद्, गवादिपदानां गोत्वादिरूपेऽर्थे—(सास्नालाङ्गूलादिमदर्थे) शक्तिरकामेनापि स्वीकार्या। किञ्च—"पुत्रस्ते जातः, कन्या ते गर्भिणी" इत्यादौ लिङाद्यभावेऽपि शाब्दबोधदर्शनात् कार्यान्वितशक्तिवादस्य व्यभिचारोऽपि बोध्यः। अधिकं मदीयमुक्तावलीप्रभायां द्रष्टव्यम्।

१—प्राभाकरमतं व्युदस्य भट्टमतमपि निरस्यति—**इत्थञ्चेति**। यद्यपि भट्टमते कार्यान्विते न शक्तिः तथापि इतरान्विते शक्तिरस्त्येव, अर्थात् इतरन्वित घट एव घटपदवाच्यः। तत्रापि पूर्ववत् कार्यतावच्छेदकांशे गौरवं मत्वा आह—**लाघवादिति**। अर्थात् अन्वितघटशाब्दत्वापेक्षया केवलघटशाब्दत्वस्य कार्यतावच्छेदकांशे लाघवरूपस्तर्को बलीयान्।

प्रश्नाः—प्राभाकरमते घटादिपदानां कुत्र शक्तिः ?, तज्ज्ञापनप्रकारश्च कीदृशः ? नैयायिकेन च तत्र कथमस्वरस उद्भावित इति मूलग्रन्थानुरोधेन विशदीकुरु ?। वाक्यशेषात् यथा शक्तिग्रहो भवति तथा उदाहरणेन स्पष्टीकर्त्तव्यम् ? यदि एकस्यैव 'यव' पदस्य नानाशक्तिः कल्प्येत तदा को दोषः ?

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शक्तिभ्रमात्प्रयोगः, नानाशक्तिकल्पने गौरवात्। हर्यादिपदे तु विनिगमकाभावान्नानाशक्तिकल्पनम्। एवं विवरणादपि शक्तिग्रहः। विवरणं तु तत्समानार्थकपदान्तरेण तदर्थकथनम्। यथा घटोऽस्तीत्यस्य कलशोऽस्तीत्यनेन विवरणाद्घटपदस्य कलशे शक्तिग्रहः। एवं पचतीत्यस्य पाकं करोतीत्यनेन विवरणादाख्यातस्य यत्नार्थकत्वं कल्प्यते। एवं [1]प्रसिद्धपदसांनिध्यादपि शक्तिग्रहः। यथा इह सहकारतरौ मधुरं पिको रौतीत्यादौ पिकपदस्य कोकिले शक्तिग्रह इति। [2]तत्र जातावेव शक्तिर्न तु व्यक्तौ, व्यभिचारादानन्त्याच्च। व्यक्तिं विना च जातिभानस्यासंभवाद्व्यक्तेरपि भानमिति केचित्, [3]तन्न। शक्तिं विना व्यक्तिभानानुपपत्तेः। न च व्यक्तौ लक्षणा, अनुपपत्तिप्रतिसन्धानं विनापि व्यक्तिबोधात्। नच व्यक्तिशक्तावानन्त्यं, सकलव्यक्तावेकस्या एव शक्तेः स्वीकारात्। [4]नचाऽननुगमः, गोत्वादेरेवानुगमकत्वात्। किंच गौः शक्येति शक्तिग्रहो यदि तदा व्यक्तौ शक्तिः, यदि तु गोत्वं शक्यमिति शक्तिग्रहस्तदा गोत्वप्रकारकपदार्थस्मरणं शाब्दबोधश्च [5]न स्यात्।

१—प्रसिद्धार्थकपदस्य सन्निधेरित्यर्थः। तथा च—"इहाम्रवृक्षे मधुर रावकर्ता पिकपदवाच्य' इत्याकारको बोधः।

अत्रेदमपि बोध्यम्—'सहकारतरौ' इत्यादौ वृद्धव्यवहाराभावेऽपि प्रसिद्धपदसान्निध्यात् पिकादिपदनां शक्तिग्रहस्य सम्भवेन आकाङ्क्षादिज्ञानसहकृततत्तदर्थोपस्थित्या तत्तत्तदर्थविषयकशाब्दबोधोत्पत्तौ बाधकाभावात् पदानां कार्यान्वित एव शक्तिकल्पनं प्राभाकराणां निर्युक्तिकमेवाभातीति दिक्।

२—जातिशक्तिवादि**मीमांसकमत**माह—**तत्रेति**। अत्रायमाशयः—विशिष्ट बुद्धौ विशेषणज्ञानस्य कारणतया जातिरूपविशेषणज्ञानं विना तत्प्रकारेण व्यक्तिज्ञानाऽसम्भवात् जातावेव शक्तिः। नच व्यक्तेः भानं कथमिति वाच्यम् आक्षेपात्—अर्थात्. व्यक्तिभानं विना जातिमानमनुपपन्नं सत् व्यक्तिभानमपि कल्पयतीत्यर्थापत्तिप्रमाणबलेन तस्या अपि भानात्। अधिकं **रामरुद्रीये** तर्कसंग्रहदीपिकाव्याख्याने द्रष्टव्यम्।

३—**तन्नेति** जातिशक्तिवादिमतं खण्डयति।

४—**नचेति**—अननुगता हि घटपटाद्या व्यक्तयः। **अननुगमः**=विषयतासम्बन्धेन शक्तिज्ञानकारणतायामवच्छेदकधर्मस्याभाव इत्यर्थः।

५—यत्प्रकारको यद्विशेष्यकः शक्तिग्रहो भवति स तादृश एव तत्प्रकारकपदार्थस्मरणं प्रति तत्प्रकारकतद्विशेष्यकशाब्दबोधञ्च प्रति हेतुरित्यस्ति नियमः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

समानप्रकारकत्वेन शक्तिज्ञानस्य पदार्थस्मरणं शाब्दबोधं प्रति च हेतुत्वात् । किंच-गोत्वे यदि शक्तिस्तदा गोत्वत्वं शक्यतावच्छेदकं वाच्यम् । गोत्वत्वं तु गवितरासमवेतत्वे सति सकलगोसमवेतत्वम् । तथा च गोव्यक्तीनां शक्यतावच्छेदकेऽनुप्रवेशात्तवैव गौरवम् । तस्मात्तत्तज्जात्याकृतिविशिष्टतत्तद्व्यक्तिबोधानुपपत्त्या कल्प्यमाना शक्तिर्जात्याकृतिविशिष्टव्यक्तौ विश्राम्यतीति । शक्तं पदं, तच्चतुर्विधम्, क्वचिद्यौगिकं क्वचिद्रूढं क्वचिद्योगरूढं क्वचिद्यौगिकरूढम् । तथाहि—यत्रावयवार्थ एव बुध्यते तद्यौगिकम् । यथा पाचकादिपदम् । यत्रावयवशक्तिनैरपेक्ष्येण समुदायशक्तिमात्रेण बुध्यते तद्रूढम्, यथा गोमण्डलादिपदम् । यत्र तु अवयवशक्तिविषये समुदायशक्तिरप्यस्ति तद्योगरूढम् । यथा पङ्कजादिपदम् । तथाहि—पङ्कजपदमवयवशक्त्या पङ्कजनिकर्तृत्वरूपमर्थं बोधयति । समुदायशक्त्या च पद्मत्वेन रूपेण पद्मं बोधयति । नच केवलयाऽवयवशक्त्या कुमुदे प्रयोगः स्यादिति वाच्यम्, रूढिज्ञानस्य केवलयौगिकार्थज्ञाने

प्रश्नाः—मीमांसकमते जातौ शक्तिः व्यक्तौ वा ? कथं तस्य २ मतस्य उपपत्तिः कथञ्च तत्र दूषणम् ? नैयायिकस्य शब्दशक्तिविषये स्वसिद्धान्तः कीदृशः ?

१—**तथाचेति**–अत्रायमभिसन्धिः–मम नैयायिकस्य मते गोशब्दबोधे गोत्वविशिष्टगोविषयकशक्तिज्ञानमेव हेतुरिति विषयतासम्बन्धेन शक्तिज्ञानकारणतायां नावच्छेदकत्वाऽसम्भवः, नापि च तद्गौरवम् अर्थात् तव मीमांसकस्य मते सकला गोव्यक्तयो गोत्वत्वरूपे शक्यतावच्छेदके अनुप्रविष्टा अतो महद्गौरवम्, मम तु सकलासु तासु गोत्वमेव शक्यताऽवच्छेदकं, यस्य गोव्यक्तिमात्रमाश्रय इत्युपसंहरति—**तस्मादिति** ।

जात्याकृतिरिति—"जात्याकृतिव्यक्तयस्तु पदार्थः" (न्या॰ २।२।६५) इति । एवञ्च त्रिष्वेकैवं शक्तिरित्येतद्बोधनायैव सूत्रे "पदार्थ" इत्येकवचनमिति साम्प्रदायिकः सिद्धान्त इति दिक् ।

२–रूढमेव सञ्ज्ञा, सा च त्रिधा। जात्या सङ्केतवती गवादि **नैमित्तिकी** । वार्त्ताहरत्वाद्युपाधिना प्रवृत्ता दूतादिः **औपाधिकी** । आधुनिकी सञ्ज्ञा चैत्रादिष्टिघुमादिश्च **पारिभाषिकी** इत्याद्यधिकं न्यायप्रदीपादिषु द्रष्टव्यम् ।

३—**गोमण्डलादीति**—गोपदस्य प्रकृतिप्रत्ययसमुदायरूपस्य गोत्वजातौ त्रित्वे वा शक्तिरस्ति । नात्र गच्छतीति गौरिति व्युत्पत्तिलभ्योऽवयवार्थबोधः । एवमेव मण्डलपदमपि "मण्डं लाति"ति अवयवार्थे न शक्तं, किन्तु—सूर्यादिरोधके कुण्डलाकारे परिधौ शक्तमित्यर्थः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रतिबन्धकत्वादिति प्राञ्चः । वस्तुतस्तु समुदायशक्त्युपस्थितपङ्केऽवयवार्थपङ्कजनिकर्तुरन्वयो भवति सांनिध्यात् । यत्र तु रूढ्यर्थस्य बाधः प्रतिसंधीयते तत्र लक्षणया कुमुदादेर्बोधः । यत्र तु कुमुदत्वेन रूपेण बोधे न तात्पर्यज्ञानं पद्मत्वस्य च बाधस्तत्रावयवशक्तिमात्रेण निर्वाह इत्याहुः । यत्र तु स्थलपद्मादाववयवार्थबाधस्तत्र समुदायशक्त्या पद्मत्वेन रूपेण बोधः । यदि तु स्थलपङ्कजं विजातीयमेव तदा लक्षणयैवेति । यत्रावयवार्थरूढ्यर्थयोः स्वातन्त्र्येण बोधस्तद्यौगिकरूढम् । यथोद्भिदादिपदम् । तत्र हि उद्भेदनकर्ता तरुगुल्मादिरपि बुध्यते यागविशेषोऽपीति ॥ ८१ ॥

लक्षणा शक्यसंबन्धस्तात्पर्यानुपपत्तितः ।

गङ्गायां घोष इत्यादौ गङ्गापदस्य शक्यार्थे प्रवाहरूपे घोषस्यान्वयानुपपत्तिस्तात्पर्यानुपपत्तिर्वा यत्र प्रतिसंधीयते तत्र लक्षणया

१—तत्प्रतीतीच्छयोच्चरितत्वरूपं तात्पर्यम्, तस्य ज्ञानम् ।

प्रश्नाः—किं नाम पदत्वम् ? कतिविधञ्च तत् ? काश्च ता विधा ? कानि च तासां लक्षणानि ? कानि चोदाहरणानि ? कथञ्च तत्र २ तत्तल्लक्षणसमन्वयः ? तासु विधासु अपि कुत्र कीदृशी कस्य विप्रतिपत्तिः ? तन्निरासप्रकारश्च कीदृशः ?

२—**शक्यसम्बन्ध** इति । शक्येन=यत्किञ्चित्पदशक्यार्थेन सह सम्बन्धः सैव लक्षणा । साच—तात्पर्यानुपपत्तितः=तात्पर्यस्य वक्तुरिच्छायाः अनुपपत्तेर्भवति । साच द्विविधा । जहत्स्वार्था, अजहत्स्वार्था चेति । जहति पदानि स्वार्थं यस्यां सा 'जहत्स्वार्था' । एतस्या उदाहरणं 'गङ्गायां घोष' इति । अत्र—गङ्गापदस्य जलविशेषः प्रवाहरूपः स्वार्थो मुख्यार्थः स एव शक्यः, तत्र घोषपदार्थस्य आभीरपल्लीरूपस्य अन्वयानुपपत्तिः अथवा तात्पर्याऽनुपपत्तिरस्ति, नहि जलप्रवाहस्य साक्षात् सम्बन्धो घोषे वर्त्तते, तस्य साक्षात्सम्बन्धस्तु तीरे गृहीतः, तस्मात् यः प्रवाहस्य तीरे सम्बन्ध स एव गङ्गापदस्य तीररूपार्थबोधनाय लक्षणाव्यापारः । यद्यप्यसौ सम्बन्धः साक्षादर्थनिष्ठः, तथापि शब्द आरोपितो ज्ञेयः, गङ्गापदस्य च सर्वथा मुख्यार्थपरित्यागादियं "जहत्स्वार्था" लक्षणा । 'तीरे घोषः' 'गङ्गातीरे घोष' इति वा वाक्यार्थबोधः । अजहत्स्वार्थाया उदाहरणन्तु—"काकेभ्यो दधि रक्ष्यताम्" इत्यादि अत्र हि—काकपदस्य दध्युपघातके लक्षणा । लक्ष्यतावच्छेदकदध्युपघातकत्वेन रूपेण दध्युपघातकानां काकविडालकुक्कुरादीनां शक्यलक्ष्याणां सर्वेषां बोधात् । "दध्युपघातकत्वावच्छिन्नेभ्यो दधि रक्ष्यताम्" इत्यन्वयबोधः । यदि काकमात्रादेव दधिरक्षायां वक्तुस्तात्पर्यं तदा न लक्षणा । 'सोऽयं देवदत्तः, तत्त्वमसि' इत्यादि वाक्येषु तृतीया जहदजहल्लक्षणाप्येका वेदान्तिभिः स्वीक्रियते । इह विशेषाऽनुपयोगान्न दर्शिता । सर्वत्र तात्पर्यानुपपत्तिरेव लक्षणायां बीजमिति सिद्धान्तः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तीरस्य बोध इति। सा च शक्यसंबन्धरूपा। तथाहि—प्रवाहरूपशक्यार्थसंबन्धस्य तीरे गृहीतत्वात्तीरस्य स्मरणम्, ततः शाब्दबोधः। परन्तु यद्यन्वयानुपपत्तिर्लक्षणाबीजं स्यात्तदा यष्टीः प्रवेशयेत्यत्र लक्षणा न स्यात्, यष्टिषु प्रवेशान्वयस्यानुऽपपत्तेरभावात्, तत्र च यष्टिप्रवेशे भोजनतात्पर्यानुपपत्त्या यष्टिधरेषु लक्षणा। एवं काकेभ्यो दधि रक्ष्यतामित्यादौ काकपदस्य दध्युपघातके लक्षणा सर्वतो दधिरक्षायास्तात्पर्यविषयत्वात्। एवं छत्रिणो यान्तीत्यादौ छत्रिपदस्यैकसार्थवाहित्वे लक्षणा। इयमेवाजहत्स्वार्था लक्षणेत्युच्यते[1] एकसार्थवाहित्वेन रूपेण छत्रितदन्ययोर्बोधात्। यदि चान्वयानुपपत्तिर्लक्षणाबीजं स्यात्तदा क्वचिद्गङ्गापदस्य तीरे क्वचिद्घोषपदस्य मत्स्यादौ लक्षणेति नियमो न स्यात्। इदं तु बोध्यम्। शक्यार्थसंबन्धो यदि तीरत्वेन रूपेण गृहीतस्तदा तीरत्वेन तीरबोधः। यदि तु गङ्गातीरत्वेन रूपेण गृहीतस्तदा तेनैव रूपेण स्मरणम्। अत एव[2] लक्ष्यतावच्छेदके न लक्षणा, तत्प्रकारकबोधस्य तत्र लक्षणां विनाप्युपपत्तेः। परन्तु[3] एवंक्रमेण शक्यतावच्छेदकेऽपि शक्तिर्न स्यात्तत्प्रकारकशक्यार्थस्मरणं प्रति तत्पदस्य सामर्थ्यमित्यस्य सुवचत्वादिति विभावनीयम्। यत्र तु शक्यार्थस्य परंपरासंबन्धरूपा लक्षणा सा लक्षितलक्षणेत्युच्यते यथा[4] द्विरेफादिपदे रेफद्वयसम्बन्धो भ्रमरपदे

१—"एकसार्थवाहिनो यान्ति" इति लक्षणया बोधः।

२—**अत एवेति**—तद्धर्मविशिष्टे लक्षणाग्रहस्य तेन रूपेणोपस्थितिं प्रति शाब्दबोधम्प्रति च कारणत्वमिति नियमादेवेत्यर्थः। **लक्ष्यता**वच्छेदके=तीरत्वादौ। पदानुपस्थाप्यस्यापि तीरत्वादिरूपस्य लक्ष्यतावच्छेदकधर्मस्य शाब्दबोधे भानमित्याशयः।

३—उक्तनियमसमतां शक्यतावच्छेदकधर्मेऽपि स्मारयति—"परन्तु" इति।

प्रश्नाः—लक्षणायाः किं लक्षणम्? कतिविधा च सा? उदाहरणे च कथं लक्षणालक्षणसमन्वयः? लक्ष्यतावच्छेदके लक्षणाऽस्ति नवा? नोचेत्कथं शाब्दबोधे तद्भानम्? लक्षणाया आश्रयणे किं बीजम्? तत्र मतभेदः कीदृशः? सिद्धान्तश्च कः? लक्षितलक्षणाया लक्षणमुदाहरणञ्च व्याख्यापूर्वकं प्रपञ्चय?

४—लक्षितलक्षणाया लक्षणं घटयति **यथेति**। "द्विरेफो रौति" इत्यत्र वाक्यश्रोता द्विरेफपदस्य शक्यार्थे रकारद्वये शब्दकर्तृत्वस्याऽनुपपत्तिं मत्वा लक्षणया मधुपरूपमर्थं प्रतिसन्धत्ते।

Kirtikant Sharma Collection, Najafgarh

गोस्वामिनि लक्षणा ... यदि त्वेकदेशान्वयो नाङ्गीक्रियते तदा गोपदस्य

CC-0. In Public Domain. Digitization by eGangotri

ज्ञायते, भ्रमरपदस्य च सम्बन्धो भ्रमरे ज्ञायते तत्र लक्षितलक्षणा । किन्तु लाक्षणिकं पदं नानुभावकं लाक्षणिकार्थस्य शाब्दबोधे तु पदान्तरं कारणम् । शक्तिलक्षणान्यतरसम्बन्धेनेतरपदार्थान्वितस्व-शक्यार्थशाब्दबोधं प्रति पदानां सामर्थ्यावधारणात् । वाक्ये तु शक्तेरभावाच्छक्यसम्बन्धरूपा लक्षणाऽपि नास्ति । यत्र गम्भीरायां नद्यां घोष इत्युक्तं तत्र नदीपदस्य नदीतीरे लक्षणा । गम्भीरपदा-र्थस्य नद्या सहाभेदेनान्वयः क्वचिदेकदेशान्वयस्यापि स्वीकृतत्वात् । यदि तत्रैकदेशान्वयोऽपि न स्वीक्रियते तदा नदीपदस्य गम्भीरनदी-तीरे लक्षणा गम्भीरपदं तात्पर्यग्राहकम् । बहुव्रीहावप्येवम् । तत्र हि चित्रगुपदादौ यद्येकदेशान्वयः स्वीक्रियते तदा गोपदस्य चित्रगो-स्वामिनि लक्षणा चित्रपदं तात्पर्यग्राहकम् । एवमारूढवानरो वृक्ष इत्यत्र वानरपदस्य वानरारोहणकर्मणि लक्षणा, आरूढपदं तात्पर्य-ग्राहकम् । एवमन्यत्रापि बोध्यम् । तत्पुरुषे तु पूर्वपदे लक्षणा । तथाहि—राजपुरुषादिपदे राजपदार्थेन पुरुषादिपदार्थस्य साक्षान्नान्वयो निपातातिरिक्तनामार्थयोर्भेदेनान्वयबोधस्याव्युत्पन्नत्वात् । अन्यथा

अत्र द्विरेफपदस्य शक्यार्थो रकारद्वयं, तस्य मधुपव्यक्तौ न साक्षात् सम्बन्धः, किन्तु तयोर्द्वयो रेफयोर्भ्रमरपदे सम्बन्धो वर्तते, तस्य भ्रमरपदस्य मधुपेन (पदार्थेन) सह वाच्यवाचकभावः सम्बन्ध इत्यनया रीत्या लक्षितलक्षणा । एतद्विषये मया बहु प्रपञ्चितं मुक्तावलीप्रभायाम् ।

२—नानुभावकम्—शाब्दबोधजनकं नास्ति, किन्तु लाक्षणिकार्थस्य शाब्दबोधे पदान्त-रम्—घोषादिपदान्तरं कारणम् । शक्तिलक्षणान्यतरसम्बन्धेन य इतरपदस्य गङ्गादिपदस्यार्थः—तीरादिरूपः—तेन सहान्वितो यः स्वस्य—घोषादिपदस्य—शक्यार्थः अभीरपल्ल्यात्मकः तद्विषयक-शाब्दबोधं प्रति घोषादिपदानां सामर्थ्यनिश्चयात् । लाक्षणिके पदे स्मारिका शक्तिरेव, नाऽनुभा-विकीति भावः ।

३—यत्रेति । नदीपदस्य नदीतीरे लक्षणायां स्वीकृतायामपि गंभीरापदस्यान्वयस्तु नदीरूपार्थेन सहाभेदः । अर्थात् नदीपदबोध्यो यो नदीतीररूपः पदार्थस्तस्यैकदेशो यो नदीरूपो-ऽर्थस्तेन सहाभेदान्वयः । "चैत्रस्य गुरुकुलम्" इत्यत्र चैत्रपदोत्तरवर्तिषष्ठ्यर्थसम्बन्धस्य गुरुरूपेण पदार्थैकदेशेनाप्यन्वयस्वीकारात्, चैत्रसम्बन्धिनो गुरोः कुलमिति बोधः ।

३—मीमांसकमतं निरसितुमाह—"वाक्ये तु—" इति ।

४—निपातेति—अस्यायमाशयः—राज्ञः पुरुषः=राजपुरुषः इत्यत्र षष्ठीतत्पुरुषसमासे राजपदार्थेन सह पुरुषपदार्थस्य न साक्षादन्वयः अर्थात् विभक्त्यर्थमद्वारीकृत्य अन्वयो न भवितुमर्हति

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

राजा पुरुष इत्यत्रापि तथान्वयबोधः। घटो न पटः इत्यादौ घटपटाभ्यां नञः साक्षादेवान्वयान्निपातातिरिक्तेति। नीलो घट इत्यादौ नामार्थयोरभेदसम्बन्धेनान्वयाद्भेदेनेति। न च राजपुरुष इत्यादि लुप्तविभक्तेः स्मरणं कल्प्यमिति वाच्यम्, अस्मृतविभक्तेरपि ततो बोधोदयात्। तस्माद्राजपदादौ राजसम्बन्धिनि लक्षणा तस्य च पुरुषेण सहाभेदान्वयः। द्वन्द्वे तु, धवखदिरौ छिन्धीत्यादौ धवः

कुत एतदिति चेत्? शृणु नियमम् "अन्ययनिपातातिरिक्तनामार्थयोरभेदसम्बन्धेन नान्वय" इति व्युत्पत्तिरस्ति। तदत्र राजपदार्थोऽपि नामार्थः पुरुषपदार्थोऽपि नामार्थः तयोर्द्वयोर्भेदसम्बन्धेन कथमन्वयः स्यात्। प्रकृते च राज्ञ इति भेदे षष्ठी, अतो लक्षणां विना नैव निर्वाहः स्यादितिभावः। यदीयं व्युत्पत्तिर्न स्वीक्रियते तदा—"राजा पुरुषः" इत्यत्रापि "राजभिन्नः पुरुषः" इत्यर्थकोऽनर्थः शाब्दबोधो भवेत्, सतु कस्यापि नेष्टः। एवञ्च प्रकृते पूर्ववर्त्तिनो राजपदस्य राजसम्बन्धिनि लक्षणां कृत्वा—"राजसम्बन्ध्यभिन्नः पुरुषः" इत्याकारकोऽभेदसम्बन्धेन बोधो नेतव्यः।

प्रश्नाः—व्यवयलक्षणावादिनः के? समस्तपदेषु कुत्र कथं लक्षणा नैयायिकैरङ्गीकृता इति सर्वं सविस्तरं ब्रूहि? 'निपातातिरिक्तनामार्थयोरित्यादिग्रन्थस्य सम्यक् विवरणं कृत्वा प्रकृतेऽस्य सङ्गतिं बोधय?

१—उक्तव्युत्पत्तेः पदकृत्यं दर्शयति—"**घटो न**" इति।

२—**नञः**—नञर्थान्योन्याभावस्येत्यर्थः। नञोऽत्यन्ताभावबोधनेऽनुयोगिवाचकपदोत्तरं सप्तम्यपेक्षणात् अतोऽत्र तदभावात् नञर्थोऽन्योन्याभाव एवेति भावः।

३—निपातातिरिक्तनामार्थयोरभेदेनान्वयबोधस्तु सिद्ध एव, परन्तु भेदसम्बन्धेनाऽन्वयोऽव्युत्पन्नः। "राजपुरुष" इत्यत्रापि निपातातिरिक्तनामार्थसत्त्वात् तयोरुपस्थितिः, अन्वयश्च भेदेन नैव भविष्यति, अभेदेन चाऽसौ विवक्षित एव नास्ति (षष्ठ्या भेदार्थकत्वात्) तस्माद्भवितव्यमत्र तादृशान्वयबोधनाय केनाप्युपायेनेति, सचोपायः पूर्वपदे लक्षणारूप एव ज्ञेय इति भावः।

४—लुप्तविभक्तेः=समासत्वात् लुप्तायाः षष्ठीविभक्तेरित्यर्थः। अतस्तां कल्पयित्वा तस्या एव विभक्तेः सम्बन्धाद्यर्थं द्वारीकृत्य अन्वयो विधीयतामिति किं लक्षणया इति शङ्काकर्त्तुराशयः।

५—अस्मृतविभक्तेरपि=षष्ठीलोपमजानतः पुरुषस्यापीत्यर्थः।

६—तस्मात्=राजपदार्थस्य पुरुषपदार्थेन सह साक्षाद्भेदसम्बन्धेनान्वयाऽसम्भवात्।

७—राजसम्बन्धिनि=राजस्वत्वविशिष्टे लक्षणा=निरूढलक्षणेत्यर्थः।

८—**अन्य** इति। स्वीकार्य इति शेषः। तथाच—"राजपुरुष" इत्यादौ राजपदस्य राजसम्बन्धिनि लक्षणाज्ञानाधीनार्थोपस्थित्या अभेदसम्बन्धेन राजसम्बन्धिप्रकारकः पुरुषविशेष्यकः शाब्दबोधो निराबाधो भवतीति भावः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

खदिरश्च विभक्त्यर्थद्वित्वप्रकारेण बुध्यते। तत्र न लक्षणा। न[1] च साहित्ये लक्षणेति वाच्यम्, साहित्यशून्ययोरपि द्वन्द्वदर्शनात्। नैकक्रियान्वयित्वरूपं[2] साहित्यमस्तीति वाच्यम्, क्रियाभेदेऽपि धवख-दिरौ पश्य छिन्धीत्यादौ तद्दर्शनात्साहित्यस्याननुभवाच्च। अत एव राजपुरोहितौ सायुज्यकामौ यजेयातामित्यत्र लक्षणाभावाद् द्वन्द्व आ-श्रीयते, तस्मात्साहित्यं नार्थः किन्तु वास्तवभेदो यत्र तत्र द्वन्द्वः। न च नीलघटयोरभेद इत्यादौ कथमिति वाच्यम्, तत्र नीलपदस्य नीलत्वे घटपदस्य घटत्वे लक्षणा, अभेद इत्यस्य चाश्रयाभेद इत्यर्थात्। समाहारद्वन्द्वे तु यदि समाहारोऽप्यनुभूयत इत्युच्यते तदाऽहिनकुल-[3]मित्यादौ परपदेऽहिनकुलसमाहारे लक्षणा पूर्वपदं तु तात्पर्य्यग्राहकम्। न च भेरीमृदङ्गं वादयेत्यत्र कथं समाहारस्यान्वयः, अपेक्षाबुद्धि-विशेषरूपस्य तस्य वादनासम्भवादिति वाच्यम्, परम्परासम्बन्धेन तदन्वयात्[4]। एवं[5] पञ्चमूलीत्यादावपि। परे[6] तु अहिनकुलमित्यादौ

१—मीमांसकः शङ्कते—**न चेति**। धवं खदिरे चोभयस्मिन् वर्त्तमानो यः सहवृत्तित्वरूपो धर्मः साहित्याख्यः तदाश्रये लक्षणा स्यादिति शङ्कार्थः। अस्या उत्तरम्—**साहित्यशून्ययो**रिति "हिमविन्ध्यौ" इत्यत्र साहित्यशून्ययोरपि द्वन्द्वदर्शनादित्यर्थः।

२—**एकक्रियान्वयित्वरूपम्**=छेदनरूपैकक्रियान्वयित्वात्मकमित्यर्थः।

३—अहिनकुलमित्यत्र परपदे नकुलपदे अहिनकुलसमाहारस्य लक्षणा, पूर्वपदं= अहिपदं तात्पर्यग्राहकम्।

प्रश्नाः—"राजपुरुष" इत्यत्र कस्मिन् पदे कैर्लक्षणा स्वीक्रियते ? कैश्च न स्वीक्रियते ? द्वयोर्मतयोः कीदृशः शाब्दबोधो भवति ? द्वन्द्वे लक्षणां विना कथमन्वयबोधः। "राजपुरोहितौ सायुज्य कामौ यजेयाताम्" इत्यत्र कथं न लक्षणा ? समाहारद्वन्द्वे लक्षणाश्रयणे कीदृशी व्यवस्थेति सर्वं मूलानुरोधेन निजसंस्कृतेन स्फुटीकुरु ?

४—स्वाश्रयवृत्तित्वरूपपरम्परासम्बन्धद्वारा वादनक्रियायाः समाहारे अन्वयसम्भव इति नाऽयुक्तमिति भावः। अत्र—"स्व" पदेन अपेक्षाबुद्धिविशेषरूपस्य समाहारस्य ग्रहणम्। तस्या-श्रयो विषयतासम्बन्धेन भेरीमृदङ्गादि, तद्वृत्तित्वं वादनक्रियाया अस्तीति समाधानग्रन्थार्थः।

५—पञ्चमूलीत्यत्र द्विग्वर्थसमाहारस्थले—उत्तरपदस्य समाहारे लक्षणा, पूर्वपदं तात्पर्य-ग्राहकमित्यर्थः।

६—**नव्यास्तु**—अहिनकुलमित्यत्र अहिः—नकुलः—इति द्वयोर्बोधः, न समाहारस्य एकवचनबोधितैकत्वसंख्यायाः प्रत्येकमन्वयः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अहिर्नकुलश्च बुध्यते प्रत्येकमेकत्वान्वयः, समाहारसंज्ञा च यत्रैकत्वं नपुंसकत्वं च प्राणितूर्येत्यादिसूत्रेणोक्तं तत्रैव, अन्यत्रैकवचनमसाध्वित्याहुः । पितरौ श्वशुरावित्यादौ पितृपदे जनकदम्पत्योः श्वशुरपदे स्त्रीजनकदम्पत्योर्लक्षणा । एवमन्यत्रापि । घटा इत्यादौ तु न लक्षणा । घटत्वेन रूपेण नानाघटोपस्थितिसंभवात् । कर्मधारयस्थले तु नीलोत्पलमित्यादावभेदसम्बन्धेन नीलपदार्थ उत्पलपदार्थे प्रकारः तत्र च न लक्षणा, अत एव निषादस्थपतिं[1] याजयेदित्यत्र न तत्पुरुषो लक्षणापत्तेः, किंतु कर्मधारयो लक्षणाभावात् । न च निषादस्य सङ्करजातिविशेषस्य वेदानधिकाराद्याजनासम्भव इति वाच्यम्, निषादस्य विद्याप्रयुक्तेस्तत एव कल्पनात् । लाघवेन मुख्यार्थस्यान्वये तदनुपपत्त्या कल्पनायाः फलमुखगौरवतया[2]ऽदोषत्वादिति । उपकुम्भमर्धपिप्पलीत्यादौ परपदे[3] तत्सम्बन्धिनि लक्षणा पूर्वपदार्थप्रधानतनया चान्वयबोध इति । इत्थं च समासे न क्वापि शक्तिः पदशक्त्यैव निर्वाहादिति ।

आसत्तिर्योग्यताकाङ्क्षातात्पर्यज्ञानमिष्यते ॥८२॥
कारणं संनिधानं तु पदस्यासत्तिरुच्यते ।

आसत्तिरित्यादि । आसत्तिज्ञानं योग्यताज्ञानमाकांक्षाज्ञानं तात्पर्यज्ञानं च शाब्दबोधे कारणम् । तत्रासत्तिपदार्थमाह संनिधानं त्विति । यत्पदार्थेन यत्पदार्थस्यान्वयोऽपेक्षितस्तयोरव्यवधानेनोप-

१—निषादस्थपतिमिति—निषादानां स्थपतिः, इति षष्ठी तत्पुरुषः, निषादश्चासौ स्थपतिश्चेति वा कर्मधारयः । तत्र संशये "निषादः स्यात् शब्दसामर्थ्यात्" (जै० सू० ६ । १ । ५१) अनेन कर्मधारय एव सिद्धान्तीकृतः । षष्ठीतत्पुरुषे तु सम्बन्धिनि लक्षणा आश्रयणीया स्यात् । शक्तिवृत्त्या निर्वाहे सति तु जघन्यवृत्तेराश्रयणं न न्याय्यमिति, तस्मात् तत्पुरुषे पूर्वपदे लक्षणेति सारः । अधिकजिज्ञासवो मदीयां "प्रभा" मालोकयन्तु ।

२—कर्मधारयसमासद्वारा प्रथमं मुख्यार्थेन सहान्वयः पश्चात् तदनुपपत्त्या निषादानां विद्याकल्पनेति फलमुखगौरवस्यादोषत्वात् ।

३—कुम्भसंबन्ध्यभिन्नं समीपम्, तथा पिप्पलीसंबन्ध्यभिन्नमर्द्धम् इत्याकारः पूर्वपदार्थप्रधानः शाब्दबोधो भवतीत्यर्थः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

स्थितिः शाब्दबोधे कारणम् । तेन 'गिरिर्भुक्तमग्निमान्देवदत्तेन' इत्यादौ न शाब्दबोधः । 'नीलो घटो द्रव्यं पटः' इत्यादावासत्तिभ्रमाच्छाब्दबोधः आसत्तिभ्रमाच्छाब्दभ्रमाभावेऽपि न क्षतिः । ननु यत्र छत्री कुण्डली वासस्वी देवदत्त इत्याद्युक्तं तत्रोत्तरपदस्मरणेन पूर्वपदस्मरणस्य नाशादव्यवधानेन तदुत्तरपदस्मरणासंभव इति चेन्न प्रत्येकपदानुभवजन्यसंस्कारैश्चरमस्य तावत्पदविषयस्मरणस्याव्यवधानेनोत्पत्तेः नानासंनिकर्षैरेकप्रत्यक्षस्येव नानासंस्कारैरेकस्मरणोत्पत्तेरपि संभवात् । तावत्पदसंस्कारसहितचरमवर्णज्ञानस्योद्बोधकत्वात् । कथमन्यथा नानावर्णैरेकपदस्मरणम् । परंतु तावत्पदार्थानां स्मरणादेकदैव खलेकपोतन्यायेन तावत्पदार्थानां क्रियाकर्मभावेनान्वयबोधरूपः शाब्दबोधो भवतीति केचित् ।

प्रश्नाः—कर्मधारये लक्षणाऽभावे किं बीजम् ? अहिनकुलम्, पितरौ, श्वशुरौ, उपकुम्भम्, अर्धपिप्पली इत्यादौ कुत्र कुत्र लक्षणा ? कथञ्च सा ? इति सोपपत्ति लिख्यताम् ?

१—शाब्दबोधे सहकारिकारणान्याह—**आसत्तिरिति** । अत्र—"आसत्तियोग्यता" इति विसर्ग रहित एव पाठः साधीयान् भाति । अन्यथा आसत्तिज्ञानमित्यादि व्याख्यानं दुःशकम् परन्तु बहुषु पुस्तकेषु एतादृश एव पाठः । अस्मदूहां प्राचीना "प्रभा" पि सम्मनुते । तथाहि "आसत्तियोग्यताकाङ्क्षेत्यादि मूलेन द्वन्द्वोत्तरं श्रूयमाणज्ञानपदस्य प्रत्येकमभिसम्बन्धात्" इत्यादि ।

२—"न शाब्दबोध" इति । तथाच—गिरिर्भुक्तमिति वाक्यात् अभ्रान्तस्य शाब्दबोधानुदयेन गिरिपदभुक्तपदयोरव्यवधानस्य निरुक्तावच्छेदकताश्रयतानिष्ठत्वाभावान्नातिव्याप्तिरित्यर्थः ।

३—वक्तृतात्पर्यविशिष्टानामेव पदानां परस्परं सन्निधानमासत्तिरित्याकूतकम् । प्रकृते तु पटपदार्थे नीलपदार्थाऽभेदबोधे वक्तुस्तात्पर्यम् अतोत्र नाऽसत्तिरस्तीति भावः

४—"ननु" इति । अव्यवधानेन पदोपस्थितिः शाब्दबोधे हेतुरित्युक्तम्, परन्तु यत्राऽनेकपदघटितं वाक्यम् तत्र अव्यवधानेन पदोपस्थित्यभावात् कथं शाब्दबोधः स्यादिति शङ्का । अस्याः समाधानमाह—**प्रत्येकमिति** । तत्तत्पदविषयकप्रत्येकपदानुभवजन्यतत्तत्पदविषयकप्रत्येकसंस्कारैरित्यर्थः । **तावत्पदेति**—उद्बुद्धसंस्कारविषयीभूतानि यावन्ति पदानि तावत्पदविषयैकस्मरणस्येत्यर्थः । एतत् दृष्टान्तद्वारा द्रढयति—**नानासन्निकर्षैरिति** । अत्रायमाशयः—यथा युगपत्कालावच्छेदेन यत्र घटचक्षुःसंयोगः पटचक्षुःसंयोगश्च जातः तत्र "इमौ घटपटौ" इत्थाकारकोभयसमूहालम्बनात्मकं प्रत्यक्षं जायते तद्वत् नानासंस्कारैः एकस्यैव समूहालम्बनात्मकस्मरणस्याप्युपपत्तौ न किञ्चिद्बाधकम् । **समूहालम्बनात्मकपदजन्यपदार्थोपस्थितिरेव** शाब्दबोधम्प्रति हेतुरिति निष्कर्षः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वृद्धा युवानः शिशवः कपोताः खले यथामी युगपत्पतन्ति ।
तथैव सर्वे युगपत्पदार्थाः परस्परेणान्वयिनो भवन्ति ॥
अपरे तु—यद्यदाकांक्षितं योग्यं संनिधानं प्रपद्यते ।
तेन तेनान्वितः स्वार्थः पदैरेवावगम्यते ॥

तथा च खण्डवाक्यार्थबोधानन्तरं तथैव पदार्थस्मृत्या महावाक्यार्थबोध इत्यप्याहुः । एतेन तावद्वर्णाभिव्यङ्ग्यः पदस्फोटोऽपि निरस्तः । तत्तद्वर्णसंस्कारसहितचरमवर्णोपलम्भेन तद्व्यञ्जकेनैवोपपत्तेरिति । इदं तु बोध्यम् । यत्र द्वारमित्युक्तं तत्र पिधेहीत्यादिपदस्य ज्ञानादेव बोधो नतु पिधानादिरूपार्थज्ञानात् । पदजन्यपदार्थोपस्थितेस्तच्छाब्दबोधे हेतुत्वात् । किंच क्रियाकर्मपदानां तेन तेनैव सह साकाङ्क्षत्वात् । तेन क्रियापदं विना कथं शाब्दबोधः स्यात् । तथा पुष्पेभ्य इत्यादौ स्पृहयतीत्यादिपदाध्याहारं विना

१—**तथाचेति**—एतन्मते पूर्वोक्तस्य समूहालम्बनात्मकस्य पदार्थस्मरणस्य शाब्दबोधे नापेक्षेति भावः । वैयाकरणमतं निरस्यति—**एतेनेति** ।

२—**तावद्वर्णा**भिव्यङ्ग्यः=एकस्मिन् पदे यावन्तो वर्णास्तैरभिव्यङ्ग्यः=प्रकाश्यः । वैयाकरणा वर्णातिरिक्तस्य स्फोटात्मकस्य शब्दस्यैव वाचकत्वमिच्छन्ति । स्फुटत्यर्थोऽस्मादिति **स्फोटः** । अयं पदस्फोटादिभेदेन नानाविधः, मञ्जूषादौ प्रपञ्चितः ।

३—**तत्तदिति**—ते ते ये वर्णाः अर्थात् पूर्वे पूर्वे ये वर्णाः, तेषामनुभवजन्मा ये संस्काराः, तैः सहितो यश्चरमवर्णस्य अन्तिमवर्णस्योपलम्भः ज्ञानम् अर्थात् श्रौत्रः साक्षात्कारः, तेनैव तद्व्यञ्जकेन=पदाभिव्यक्तिहेतुभूतेन उपपत्तेः—अर्थबोधोपपत्तेः = पदार्थज्ञाननिर्वाहान्मुधैव स्फोटकल्पनेति भावः ।

४—लाघवेन पदार्थोपस्थितिरेव शाब्दबोधे हेतुर्नतु पदजन्यपदार्थोपस्थितिरिति अतएव "द्वारम्" इत्यादौ न "पिधेहि" इति पदाध्याहारः, अपित्वर्थाध्याहार एवेति प्राभाकरमतं दूषयितुमाह—"**इदन्तु बोध्यम्**" इत्यादि ।

५—अन्यथा—प्रत्यक्षादिनोपस्थितिस्यापि शाब्दबोधः स्यात, तस्मात् पदाध्याहारपक्ष एव श्रेयानिति भावः ।

प्रश्नाः—आसत्त्यादीनां स्वरूपं प्रपञ्चय ? यत्र पूर्वपदीयस्मरणं नष्टं तत्र कथं शाब्दबोधरीतिः प्रदर्शितेति स्फुटं वर्ण्यताम् ? कः स्फोटपदार्थो नाम कथञ्च तस्य निरासः ?

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

चतुर्थ्यनुपपत्तेः पदाध्याहार[1] आवश्यकः।

पदार्थे तत्र तद्वत्ता योग्यता परिकीर्तिता ॥ ८३ ॥

एकपदार्थे[2]ऽपरपदार्थसम्बन्धो योग्यतेत्यर्थः। तज्ज्ञानाभावाच्च-वह्निना सिञ्चतीत्यादौ न शाब्दबोधः। नन्वेतस्या योग्यताया ज्ञानं शाब्दबोधात्प्राक्सर्वत्र न सम्भवति वाक्यार्थस्यापूर्वत्वा[3]दिति चेन्न, तत्तत्पदार्थस्मरणे सति क्वचित्संशयरूपस्य क्वचिन्निश्चयरूपस्यापि योग्यताया ज्ञानस्य सम्भवात्। नव्यास्तु योग्यताया ज्ञानं न शाब्द-ज्ञाने कारणम्। वह्निना सिञ्चतीत्यादौ सेके वह्निकरणत्वाभावरू-पाऽयोग्यतानिश्चयेन प्रतिबन्धान्न शाब्दबोधः। तदभावनिश्चयस्य[4] लौकिकसंनिकर्षाजन्यदोषविशेषाजन्यज्ञानमात्रे प्रतिबन्धकत्वा-च्छाब्दबोधं प्रत्यपि प्रतिबन्धकत्वं सिद्धम्। योग्यताज्ञानविलम्बाच्च-शाब्दबोधविलम्बोऽसिद्ध इति वदन्ति ॥ ८२ ॥ ८३ ॥

आकाङ्क्षां निर्वक्ति—

१—पदाध्याहार इति—चतुर्थ्यनुपपत्तिरूपाद्दोषादिति भावः।

२—एकपदार्थे = प्रकृतवाक्यघटकैकपदार्थे। अपरपदार्थसम्बन्धः = प्रकृतवाक्यघटका-परपदार्थस्य प्रयोक्तृतात्पर्यविषयसम्बन्ध इत्यर्थः।

३—अपूर्वत्वात् = सर्वत्र शाब्दबोधात् पूर्वमनिश्चितत्वात्।

४—तदभावनिश्चयस्येति। "अनाहार्याप्रामाण्यज्ञानानास्कन्दिततद्धर्मिकतदभावनिश्चयः लौकिकसंनिकर्षाजन्यदोषविशेषाजन्यतद्धर्मिकतज्ज्ञानमात्रम्प्रति प्रतिबन्धक" इति नियमः। अत्र नियमे प्रथमतत्पदेन प्रकृतधर्मिणो ग्रहणं द्वितीयतत्पदेन धर्मस्य ग्रहणम्। बाधकालीनेच्छा-जन्यज्ञानमाहार्यज्ञानम्—यथा शालग्रामशिलायामीश्वरबुद्धिः, प्रतिमायां वा देवबुद्धिरित्यादौ। तद्भिन्न-मनाहार्यम्। अप्रामाण्यज्ञानानास्कन्दितं नाम प्रामाण्यप्रकारकज्ञानविशेष्यं यत् तद्भिन्नमप्रामाण्यज्ञाना-नास्कन्दितम्। निश्चयत्वं च संशयभिन्नज्ञानत्वम्। एवञ्च अनाहार्याप्रामाण्यज्ञानानास्कन्दिततद्ध-र्मिकतदभावनिश्चयस्य लौकिकसंनिकर्षाजन्यदोषविशेषाजन्यतद्धर्मिकतज्ज्ञानमात्रे प्रतिबन्धकत्वमिति प्रतिबध्यप्रतिबन्धकभावासिद्धिः। प्रत्यक्षाभिन्नं ज्ञानमात्रं लौकिकसंनिकर्षाजन्यम्। तत्र दोषविशेष जन्यं "पीतः शंखः" इत्यादिज्ञानं विहाय यावज्ज्ञानं प्रति तद्धर्मिकतदभावनिश्चयस्य प्रतिबन्धकत्वात् वह्निना सिञ्चतीत्यत्र सेकेपि वह्निकरणत्वाभावरूपायोग्यतानिश्चयस्य प्रतिबन्धकत्वं मन्तव्यम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

यत्पदेन विना यस्याननुभावकता भवेत्।
आकाङ्क्षा वक्तुरिच्छा तु तात्पर्यं परिकीर्तितम्॥८४॥

येन पदेन विना यत्पदस्यान्वयाननुभावकत्वं तेन पदेन सह तस्याकाङ्क्षेत्यर्थः। क्रियापदं विना कारकपदं नान्वयबोधं जनयतीति तेन तस्याकाङ्क्षा। वस्तुतस्तु क्रियाकारकपदानां संनिधानमासत्त्या चरितार्थम्। परन्तु घटकर्मताबोधं प्रति घटपदोत्तराद्वितीयारूपाकाङ्क्षाज्ञानं कारणम्। तेन घटः कर्मत्वमानयनं कृतिरित्यादौ न शाब्दबोधः। अयमेति पुत्रो राज्ञः पुरुषोऽपसार्यतामित्यादौ तु पुत्रेण सह राजपदस्य तात्पर्यग्रहसत्त्वात्तेनैव सहान्वयबोधः। पुरुषेण सह तात्पर्यग्रहे तु तेन सहान्वयबोधः स्यादेव। तात्पर्य्यं निर्वक्ति। वक्तुरिच्छेति। यदि तात्पर्यज्ञानं कारणं न स्यात्तदा 'सैन्धवमानय' इत्यादौ क्वचिदश्वस्य क्वचिल्लवणस्य बोधो न स्यात्

१—अन्वयाननुभावकत्वम्=तात्पर्यविषयशाब्दबोधप्रयोजकत्वाभावः, अर्थास्मारकत्वमिति यावत्। यथा "घटम्" इति कारकपदम् "आनय" इति क्रियापदं विना नान्वयबोधं जनयतीति तस्य तदाकाङ्क्षा। गौरश्वः पुरुषोहस्तीत्यादौ नाकाङ्क्षा अतएव न शाब्दबोधः। अत्रत्यं रहस्यं वक्तुमाह—"वस्तुतस्तु" इति। अस्यायमाशयः—एकपदे अपरपदवत्त्वं नाम अपरपदाव्यवहितोत्तरत्वम्। तत्र अव्यवधानांशस्य आसत्त्यैव लाभः। **आसत्तिर्हि** पदाव्यवधानरूपा। उत्तरत्वांशस्तु—क्रियाकारकपदयोर्नापेक्षितः। "चैत्रो गच्छति, गच्छति चैत्र" इति वाक्याद्वयादपि वाक्यार्थबोधात्, तस्मात् क्रियाकारकपदयोराकाङ्क्षा नास्त्येव। किन्तु—प्रकृतिप्रत्यययोरेव सा मन्तव्या तत्राप्य'व्यवधानांशस्य आसत्त्यैव लाभात् प्रकृत्युत्तरत्वरूपं प्रत्ययाकाङ्क्षाज्ञानं कारणमिति बोध्यम्। एतस्य फलमाह—"तेन घटः कर्मत्वम्" इत्यादि।

२—अयमेति पुत्रो राज्ञः पुरुषोऽपसार्यताम् इत्यादावुभयविधाकांक्षावति वाक्ये वक्तृतात्पर्यानुरोधेन शाब्दबोधो भवति। अत्र राज्ञः पुत्र आयाति अग्रे पुरुषः=जनसमुदायः अपसार्यताम् यदि पुरुषेऽन्वयः तदा राज्ञः पुरुष आयाति अग्रे पुत्रः—अपसार्यतामित्यन्वयबोधः। इत्थञ्च—"पुस्तकमानय" इत्यादौ पुस्तकनिष्ठकर्मत्वविशेष्यकाधेयतासंसर्गकपुस्तकप्रकारकप्रतीतीच्छा वक्तुस्तात्पर्यम्। "तादृशेच्छयोच्चरितमिदं वाक्यम्" इत्याकारकं श्रोतुस्तात्पर्यज्ञानं वाक्यार्थबोधे कारणमिति ध्येयम्। एवं तात्पर्य्यज्ञानस्य शाब्दबोधे कारणत्वाभ्युपगमेन "सैन्धवमानय" इत्युक्तौ भोजनकाले लवणस्यैव, यात्राकाले चाश्वस्यैव बोध इति यथायथमूह्यम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

नच तात्पर्यग्राहकप्रकरणादीनां शाब्दबोधे कारणत्वमस्त्विति वाच्यम्, तेषामननुगमात्। तात्पर्यज्ञानजनकत्वेन तेषामनुगमे तु तात्पर्यज्ञानमेव लाघवात्कारणमस्तु। इत्थं च वेदस्थलेऽपि तात्पर्यज्ञानार्थमीश्वरः कल्प्यते। नच तत्राऽध्यापकतात्पर्यज्ञानं कारणमिति वाच्यम्, सर्गादावध्यापकाभावात्। नच प्रलय एव नास्तीति कुतः सर्गादिरिति वाच्यम्, प्रलयस्यागमेषु प्रतिपाद्यत्वात्। इत्थं च शुकवाक्येऽपीश्वरीयतात्पर्यज्ञानं कारणम्। विसंवादिशुकवाक्ये तु शिक्षयितुरेव तात्पर्यज्ञानं कारणम्। अन्ये तु नानार्थादौ क्वचिदेव तात्पर्यज्ञानं कारणम्। तथाच शुकवाक्ये विनैव तात्पर्यज्ञानं शाब्दबोधः। वेदे त्वनादिमीमांसापरिशोधिततर्कैरेवार्थावधारणमित्याहुः।

इति श्रीविश्वनाथन्यायपञ्चाननभट्टाचार्यविरचितायां सिद्धान्तमुक्तावल्यां शब्दखण्डं समाप्तम्।

पूर्वमनुभवस्मरणभेदाद् बुद्धेर्द्वैविध्यमुक्तम्। तत्रानुभवप्रकारा दर्शिताः, सुगमतया स्मरणं न दर्शितम्। तत्र[2] हि पूर्वानुभवः कारणम्। अत्र केचित्—अनुभवत्वेन न कारणत्वं किन्तु ज्ञानत्वेनैव[3]। अन्यथा सकृदनुभवस्थले स्मरणानन्तरं स्मरणं न स्यात्समानप्रकारकस्मरणेन पूर्वसंस्कारस्य विनष्टत्वात्। मन्मते तु तेनैव स्मरणेन संस्कारान्तरद्वारा स्मरणान्तरं जन्यत इत्याहुः तन्न[4] यत्र समूहाल-

---

१—प्रकरणादीनामिति—आदिना संयोगविप्रयोगाद्या गृह्यन्ते संयोगादीनां प्रपञ्चो मत्कृतकाव्यादर्शकुसुमप्रतिमायां मदीयकाव्यप्रकाशप्रभायाञ्च द्रष्टव्यः।

२—तत्र=स्मरणे पूर्वानुभवः कारणम्। अननुभूतस्य स्मरणासम्भवादित्यर्थः।

३—एतन्मते स्मृतित्वाऽवच्छिन्नं प्रति ज्ञानत्वाऽवच्छिन्नमेव कारणं नाऽनुभवत्वाऽवच्छिन्नम्।

४—विशेषधर्मावच्छिन्नकारणतावादी उक्तं खण्डयति "तन्न" इति। सिद्धान्तिग्रन्थस्यायमाशयः। यदि विशेषधर्मेण कार्यकारणभावस्य व्यभिचारो न ज्ञायते तदा सामान्यधर्मेण कार्यकारणभावस्य कल्पना न युक्ता। प्रकृते अनुभवत्वरूपो विशेषधर्मः, सच प्रत्यक्षादिचतुर्ष्वेव वर्त्तते। ज्ञानत्वरूपसामान्यधर्मस्तु स्मृत्यनुभवोभयसाधारणः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ऽनन्तरं घटपटादीनां क्रमेण स्मरणमजनिष्ट, सकलविषयकस्मरणं तु नाभूत् तत्र फलस्य संसारनाशकत्वाभावात्कालस्य रोगस्य चरमफलस्य वा संस्कारनाशकत्वं वाच्यम् । तथा च न क्रमिकस्मरणानुपपत्तिः । नच पुनः पुनः स्मरणाद् दृढतरसंकारानुपपत्तिरिति वाच्यम्, झटित्युद्बोधकसमवधानस्य दार्ढ्यपदार्थत्वात् । नच विनिगमनाविरहादेव ज्ञानत्वेनापि जनकत्वं स्यादिति वाच्यम्, विशेषधर्मेण व्यभिचाराज्ञाने सामान्यधर्मेणान्यथासिद्धत्वात् । कथमन्यथा दण्डस्य भ्रमिद्वारा द्रव्यत्वेन रूपेण न कारणत्वम् । न चान्तरालिकस्मरणानां संस्कारनाशकत्वसंशयाद्व्यभिचारसंशय इति वाच्यम्, अनन्तसंकार तन्नाशकल्पनापेक्षया लाघवेन चरमस्मरणस्यैव संसारनाशकत्वकल्पनेन व्यभिचारसंशयाभावात् । इति स्मृतिप्रक्रिया ।

इदानीं क्रमप्राप्तं मनो निरूपयितुमाह—

साक्षात्कारे सुखादीनां करणं मन उच्यते ।
अयौगपद्याज्ज्ञानानां तस्याणुत्वमिहेष्यते ॥ ८५ ॥

एतेन मनसि प्रमाणं दर्शितम् । तथाहि—सुखसाक्षात्कारः सकरणको जन्यसाक्षात्कारत्वात् चाक्षुषसाक्षात्कारवत्, इत्यनुमानेन मनसः करणत्वसिद्धिः । नचैवं दुःखादिसाक्षात्काराणामपि करणान्तराणि स्युरिति वाच्यम्, लाघवादेकस्यैव तादृशसकलसाक्षात्कारकरणतया सिद्धेः । एवं सुखादीनामसमवायिकारणसंयोगा-

---

१—कथमन्यथेति । यदि सामान्यधर्मेणैव कारणता मन्यते तदा घटादिकार्यं प्रति दण्डस्य भ्रमिद्वारा द्रव्यत्वेनापि कारणता स्यात्, अर्थात् यद्यपि दण्डे दण्डत्वं द्रव्यत्वमुभयं विद्यते तथापि द्रव्यत्वेनापि कारणत्वं मन्तव्यं स्यात् तच्च नाङ्गीकृतम् ।

२—अन्तिमस्मरणात् प्राक् मध्येभवानां स्मरणानामपि संस्कारनाशकत्वशंका स्यात् एवं च मध्यपातिस्मरणेन संस्कारनाशस्य सन्देहे स्मृतित्वावच्छिन्नं प्रति अनुभवत्वेन कार्यकारणभावस्यापि व्यभिचाररूपः सन्देहः स्यादित्यत उक्तम् अनन्तेति ।

प्रश्नाः—मनसः किं लक्षणम् ? किञ्च तत्र प्रमाणम् ? तदणुपरिमाणं मध्यमपरिमाणं वा ? आद्ये का युक्तिः ? द्वितीये को दोषः ?

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

श्रयतया मनसः सिद्धिर्बोद्धव्या । तत्र मनसोऽणुत्वे प्रमाणमाह । अयौगपद्यादिति । ज्ञानानां चाक्षुषरासनादीनामयौगपद्यमेककालोत्पत्तिर्नास्तीत्यनुभवसिद्धम् । तत्र नानेन्द्रियाणां सत्यपि विषयसंनिधाने यत्सम्बन्धादेकेनेन्द्रियेण ज्ञानमुत्पद्यते यदसम्बन्धाच्च परैर्ज्ञानं नोत्पद्यते तन्मनसो विभुत्वे चासंनिधानं न सम्भवतीति न विभु मनः । नच तदानीमदृष्टविशेषोद्बोधकविलम्बादेव तज्ज्ञानविलम्ब इति वाच्यम्, तथासति चक्षुरादीनामप्यकल्पनापत्तेः । नच दीर्घशष्कुलीभक्षणादौ नानावधानभाजां च कथमेकदा नानेन्द्रियजन्यज्ञानमिति वाच्यम्, मनसोऽतिलाघवात्त्वरया नानेन्द्रियसम्बन्धान्नानाज्ञानोत्पत्तेः । उत्पलशतपत्रभेदादिवद्यौगपद्यप्रत्ययस्य भ्रान्तत्वात् । नच मनसः संकोचविकाशशालित्वादुभयोपपत्तिरस्त्विति वाच्यम्, नानावयवतन्नाशादिकल्पने गौरवाल्लाघवान्निरवयवस्याऽणुरूपस्यैव मनसः कल्पनादिति संक्षेपः ॥ ८५ ॥

इति द्रव्यपदार्थो व्याख्यातः ।

द्रव्यं निरूप्य गुणान्निरूपयति—

अथ द्रव्याश्रिता ज्ञेया निर्गुणा निष्क्रिया गुणाः ।

गुणत्वजातौ किं मानमिति चेत्, इदम्—द्रव्यकर्मभिन्ने सामान्यवति या कारणता सा किंचिद्धर्मावच्छिन्ना निरवच्छिन्नकारणताया असम्भवात् । नहि रूपत्वादिकं सत्ता वा तत्रावच्छेदिका न्यूनातिरिक्तदेशवृत्तित्वात् । अतश्चतुर्विंशत्यनुगतं किंचिद्वाच्यं तदेव गुण[3]-

---

१—अत्रेदमनुमानम्—सुखदुःखाद्यसमवायिकारणं संयोगः प्रतियोगित्वेन क्वचिदाश्रितः मुख्यसम्बन्धत्वात् समवायवत् । यच्च तादृशसंयोगाश्रयः तदेव मनः ।

२—अवसरसङ्गत्येति शेषः ।

३—वस्तुतस्तु पारिमाण्डल्यस्य क्वाप्यकारणतया गुणत्वस्याप्यतिप्रसक्तत्वेनाऽनवच्छेदकत्वान्न कारणतावच्छेदकरूपेण गुणत्वजातिसिद्धिः । अतो—गुणपदशक्यता किञ्चिद्धर्मावच्छिन्ना शक्यतात्वात् घटपदशक्यतावत् । "या या शक्यता सा सा किञ्चिद्धर्माऽवच्छिन्ना" इति व्याप्तेः, तच्च शक्यतावच्छेदकं प्रकृते गुणत्वमेवेत्यनुमानेन गुणत्वजातिसिद्धिः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

त्वमिति सिद्धम् * । द्रव्याश्रिता इति । यद्यपि द्रव्याश्रितत्वं न लक्षणं कर्मादावतिव्याप्तेस्तथापि द्रव्यत्वव्यापकतावच्छेदकसत्ताभिन्नजातिमत्त्वं तदर्थः । भवति हि गुणत्वं द्रव्यत्वव्यापकतावच्छेदकं तद्वत्ता च गुणानामिति । द्रव्यत्व कर्मत्वं वा न द्रव्यत्वव्यापकतावच्छेदकं गगनादौ द्रव्यकर्मणोरभावात् । द्रव्यत्ववत्त्वं सामान्यत्वादिकं वा न जातिरिति तद्व्युदासः । निर्गुणा इति । यद्यपि निर्गुणत्वं कर्मादावपि तथापि सामान्यवत्त्वे सति कर्मान्यत्वे च सति निर्गुणत्वं बोध्यम् । जात्यादीनां न सामान्यवत्त्वं, कर्मणो न कर्मान्यत्वं, द्रव्यस्य न निर्गुणत्वमिति तत्र नातिव्याप्तिः । निष्क्रिया इति स्वरूपकथनं, नतु लक्षणं गगनादावतिव्याप्तेः ।

रूपं रसः स्पर्शगन्धौ परत्वमपरत्वकम् ॥ ८६ ॥
द्रवत्वं स्नेहवेगाश्च मता मूर्तगुणा अमी ।

* मूर्तगुणा इति । अत्र वेगेन स्थितिस्थापकोऽप्युपलक्षणीयः । अमूर्तेषु न वर्तन्त इत्यर्थः । लक्षणं तु तावदन्योन्यान्यत्वम्[2] । एवमग्रेऽपि ।

---

* कन्दलीकारस्तु—"गुणत्वं रूपादिषु रत्नत्वमिवोपदेशसहकारिणा प्रत्यक्षेणैव गृह्यते" इत्याह ।

१—द्रव्यत्वमिति—अस्यायमाशयः । द्रव्यवृत्ति द्रव्यत्वम्, कर्मवृत्ति कर्मत्वम्, तच्चैतदुभयं द्रव्यत्वनिरूपितव्यापकतावच्छेदकं न भवितुमर्हति, यदि सर्वद्रव्येषु द्रव्यं वा कर्म वा विद्येत तर्हि द्रव्यत्वनिरूपितव्यापकता द्रव्येषु कर्मसु वा समानीता स्यात्, तत्र च विद्यमानौ धर्मौ द्रव्यत्वं कर्मत्वं वा व्यापकतावच्छेदकोऽपि भवेत्, नत्वेवम् आकाशादिषु पञ्चसु न किञ्चिदपि द्रव्यान्तरं (कार्यद्रव्यम्) समवैति, नापिचाऽऽकाशादिचतुष्टये किमपि कर्म विद्यते, द्रव्यत्वे भवन् द्रव्यत्ववत्त्वं न सामान्यधर्मः अर्थात् जातिरूपो धर्मो नास्ति किन्तूपाधिः, तस्माद् "द्रव्यत्वव्यापकतावच्छेदकसत्ताभिन्नजातिमत्त्वं" गुणलक्षणं सुस्थम् ।

* एते मूर्त्तानामेव गुणाः, नामूर्त्तानाम् ।

२—अन्यान्यत्वम्=एतद्भिन्नभिन्नत्वमित्यर्थः । तथा च—दर्शितकारिकान्तर्गतरूपादिदशकभिन्नं प्रपञ्चमात्रम्, तद्भिन्नत्वम्, अर्थात् प्रपञ्चमात्रप्रतियोगिकभेद एषु दशस्वेव वर्तत इति लक्षणसमन्वयः । एवमग्रेऽपि बोध्यम् ।

प्रश्नाः—इतोऽग्रेऽस्मद्दर्शितरीत्या क्वचित् २ स्वयमपि प्रश्नाः कल्पनीयाः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

धर्माधर्मौ भावना च शब्दो बुद्ध्यादयोऽपि च ॥८७॥

एतेऽमूर्तगुणाः सर्वे विद्वद्भिः परिकीर्तिताः ।

अमूर्तगुणा इति । मूर्तेषु न वर्तन्त इत्यर्थः ।

सङ्ख्यादयो विभागान्ता उभयेषां गुणा मताः ॥८८॥

उभयेषामिति । मूर्तामूर्तगुणा इत्यर्थः ॥ ८६—८६ ॥

संयोगश्च विभागश्च सङ्ख्या द्वित्वादिकास्तथा ।

द्विपृथक्त्वादयस्तद्वदेतेऽनेकाश्रिता गुणाः ॥ ८९ ॥

[1]अनेकाश्रिता इति । संयोगविभागद्वित्वादीनि द्विवृत्तीनि । त्रित्वचतुष्ट्वादिकं त्रिचतुरादिवृत्तीति बोध्यम् ॥ ८९ ॥

अतः शेषगुणाः सर्वे मता [2]एकैकवृत्तयः ।

रूपरसगन्धस्पर्शैकत्वपरिमाणैकपृथक्त्वपरत्वबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नगुरुत्वद्रवत्वस्नेहसंस्कारादृष्टशब्दा इत्यर्थः ।

बुद्ध्यादिषट्कं स्पर्शान्ताः स्नेहः सांसिद्धिको द्रवः ॥९०॥

अदृष्टभावनाशब्दा अमी वैशेषिका गुणाः ।

बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नान्ता इत्यर्थः । स्पर्शान्ताः रूपरसगन्धस्पर्शा इत्यर्थः । द्रवो द्रवत्वम् । [3]वैशेषिका इति । विशेषा एव वैशेषिकाः । स्वार्थे ठक् । विशेषगुणा इत्यर्थः ।

सङ्ख्यादिरपरत्वान्तो द्रवः सांसिद्धिकस्तथा ॥ ९१ ॥

गुरुत्ववेगौ [4]सामान्यगुणा एते प्रकीर्तिताः ।

१—संयोगव्यक्तिरेका, एका च विभागव्यक्तिः उभयोर्द्रव्ययोर्वर्त्तते इत्यनेकाश्रितत्वम् । एवमन्यत्रापि अनेकशब्दश्च प्रकृते एको न भवतीति व्युत्पत्त्या द्वयोर्बहुष्वपि साधारणः ।

२—न पुनरेका रूपव्यक्तिः संयोगवदुभयत्र व्यासज्य वर्त्तते इति भावः ।

३—विशेषो व्यवच्छेदः तस्मै ये प्रभवान्ति ते गुणा वैशेषिका रूपादयः, एते हि स्वाश्रयमितरस्माद्व्यवच्छिन्दन्ति, न सङ्ख्यादय इति कन्दली ।

४—सामान्याय=स्वाश्रयसाधर्म्याय गुणाः, न स्वाश्रयविशेषायेत्यर्थः । चक्रन्यायन-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सङ्ख्यादिरिति । सङ्ख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वानीत्यर्थः

सङ्ख्यादिरपरत्वान्तो द्रवत्वं स्नेह एव च ॥९२॥

एते तु द्वीन्द्रियग्राह्याः—

द्वीन्द्रियेति । चक्षुषा त्वचाऽपि ग्रहणयोग्यत्वात् ।

अथ स्पर्शान्तशब्दकाः ।

बाह्यैकैकेन्द्रियग्राह्याः—

बाह्येति । रूपादीनां चक्षुरादिग्राह्यत्वात् ।

गुरुत्वादृष्टभावनाः ॥ ९३ ॥

अतीन्द्रिया विभूनां तु ये स्युर्वैशेषिका गुणाः ।

[1]अकारणगुणोत्पन्ना एते तु परिकीर्तिताः ॥ ९४ ॥

विभूनामिति । बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनाशब्दा इत्यर्थः । अकारणेति कारणगुणेन कार्ये ये गुणा उत्पद्यन्ते ते कारणगुणपूर्वका रूपादयो वक्ष्यन्ते बुद्ध्यादयस्तु न तादृशा आत्मादेः कारणाभावात् ॥ ९०—९४ ॥

अपाकजास्तु स्पर्शान्ता द्रवत्वं च तथाविधम् ।

स्नेहवेगगुरुत्वैकपृथक्त्वपरिमाणकम् ॥ ९५ ॥

स्थितिस्थापक इत्येते स्युः [2]कारणगुणोद्भवाः ।

यानुसारिणस्तु—रूपस्पर्शान्यत्वे सति द्रव्यविभाजकोपाधिव्याप्यतावच्छेदकसंयोगविभागद्रवत्वावृत्तिजातिशून्यगुणत्वं **सामान्यगुणत्वम्** इत्याहुः । द्रव्यविभाजकोपाधिः पृथिवीत्वादिः तद्व्याप्यतावच्छेदकञ्च गन्धत्वादि, तच्छून्यत्वस्य सङ्ख्यादौ सत्त्वाल्लक्षणसमन्वयः ।

१—स्वाश्रयस्य यत्समवायिकारणं तद्गुणपूर्वका न भवन्ति नित्यगुणत्वात् नित्यानामाकाशात्मनां गुणत्वादित्यर्थः ।

२—स्वाश्रयस्य यत्समवायिकारणं तस्य ये गुणाः, तत्पूर्वकाः रूपादयः । तन्तुरूपादिपूर्वकाः पटरूपादयो नियमेन तद्धर्मानुविधानात्, अतत्पूर्वकत्वे हि पटे यत्किञ्चिद्गुणान्तरं स्यान्नियमहेतोरभावात् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अपाकजास्त्विवति । पाकजरूपादीनां कारणगुणपूर्वकत्वाभावात् अपाकजा इत्युक्तम् । तथाविधमपाकजम् । तथैकत्वमपि बोध्यम् । स्पष्टम् ।

संयोगश्च विभागश्च वेगश्चैते तु कर्मजाः ॥ ९६ ॥

कर्मजा इति । यद्यपि कर्मजत्वं न साधर्म्यं घटादावतिव्याप्तेः, संयोगजसंयोगेऽव्याप्तेश्च । तथापि कर्मजवृत्तिगुणत्वव्याप्यजातिमत्त्वं बोध्यम् । एवमन्यत्राप्यूह्यम् ॥ ९५ ॥ ९६ ॥

स्पर्शान्तपरिमाणैकपृथक्त्वं स्नेहशब्दके ।

भवेदसमवायित्वं—

स्पर्शान्तेति । [स्पर्शोऽत्रानुष्णो ग्राह्यः] एकपृथक्त्वमित्यत्र त्वप्रत्ययस्य प्रत्येकमन्वयादेकत्वं पृथक्त्वं च ग्राह्यम् । पृथक्त्वपदेन चैकपृथक्त्वं विवक्षितम् । भवेदसमवायित्वमिति । घटादिरूपरसगन्धस्पर्शाः कपालादिरूपरसगन्धस्पर्शेभ्यो भवन्ति । एवं कपालादिपरिमाणादीनां घटादिपरिमाणाद्यसमवायिकारणत्वम् । शब्दस्यापि द्वितीयशब्दं प्रत्यसमवायिकारणत्वम् । एवं स्थितिस्थापकैकपृथक्त्वयोरपि ज्ञेयम् ।

—अथ वैशेषिके गुणे ॥ ९७ ॥

आत्मनः स्यान्निमित्तत्वम्—

निमित्तत्वमिति । बुद्ध्यादीनामिच्छादिनिमित्तत्वादिति भावः ।

—उष्णस्पर्शगुरुत्वयोः ।

वेगेऽपि च द्रवत्वे च संयोगादिद्वये तथा ॥ ९८ ॥

द्विधैव कारणत्वं स्याद्

द्विधैवेति । असमवायिकारणत्वं निमित्तकारणत्वं च । तथाहि—उष्णस्पर्श उष्णस्पर्शस्यासमवायिकारणं पाकजे निमित्तम् । गुरुत्वं गुरुत्वपतनयोरसमवायिकारणं प्रतिघाते निमित्तम् । वेगो वेगस्पन्द-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

नयोरसमवायी अभिघाते निमित्तम् । द्रवत्वं द्रवत्वस्पन्दनयोरसमवायि, संग्रहे निमित्तम् । भेरीदण्डसंयोगः शब्दे निमित्तम्–भेर्याकाशसंयोगेऽसमवायी । वंशदलद्वयविभागः शब्दे निमित्तम्, वंशदलाकाशविभागेऽसमवायीति ।

अथ प्रादेशिको भवेत् ।

वैशेषिको विभुगुणः संयोगादिद्वयं तथा ॥ ९६ ॥

प्रादेशिकोऽव्याप्यवृत्तिः ॥ ९७ ॥ ९८ ॥ ९९ ॥

चक्षुर्ग्राह्यं भवेद्रूपं द्रव्यादेरुपलम्भकम् ।

चक्षुषः सहकारि स्याच्छुक्लादिकमनेकधा ॥ १०० ॥

चक्षुरिति । रूपत्वजातिस्तु प्रत्यक्षसिद्धा । रूपशब्दोल्लेखिनी प्रतीतिर्नास्तीति चेन्मास्तु रूपशब्दप्रयोगस्तथापि नीलपीतादिष्वनुगतजातिविशेषोऽनुभवसिद्ध एव । रूपशब्दाप्रयोगेऽपि नीलो वर्णः पीतो वर्ण इति वर्णविशेषोल्लेखिनी प्रतीतिरस्त्येव । एवं नीलत्वादिकमपि प्रत्यक्षसिद्धम् । न चैकैका एव नीलरूपादिव्यक्तय इत्येकव्यक्तिवृत्तित्वान्नीलत्वादिकं न जातिरिति वाच्यम्, नीलो नष्टो रक्त उत्पन्न इत्यादिप्रतीतेर्नीलादेरुत्पादविनाशशालितया नानात्वात् । अन्यथा एकनीलनाशे जगदनीलमापद्येत । नच नीलसमवायरक्तसमवाययोरेवोत्पादविनाशविषयकोऽसो प्रत्यय इति वाच्यं, प्रतीत्या समवायानुल्लेखात् । नच स एवायं नील इति प्रत्ययाल्लाघवाच्चैक्यमिति वाच्यं, प्रत्यक्षस्य तज्जातीयविषयकत्वात् । सैवेयं गुर्जरीतिवत् । लाघवं तु प्रत्यक्षबाधितम् । अन्यथा घटादीनामप्यैक्यप्रसङ्गात् । उत्पादविनाशबुद्धेः समवायावलम्बनत्वापत्तेरिति । एतेन रसादिकमपि

१—"नीलो नष्टो रक्त उत्पन्नः" इति प्रत्ययश्च नीलसमवायनाशं रक्तसमवायोत्पत्तिं चावगाहते न तु नीलनाशरक्तोत्पत्तीं तथा च नीलपीतादिव्यक्तिषु नानात्वकल्पनमनुचितमित्याशयः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

व्याख्यातम् । चक्षुर्ग्राह्यमिति । चक्षुर्ग्राह्यविशेषगुणत्वमित्यर्थः । एवमग्रेऽपि । द्रव्यादेरिति । उपलम्भकमुपलब्धिकारणम् । इदमेव विवृणोति । चक्षुष इति । द्रव्यगुणकर्मसामान्यानां चाक्षुषप्रत्यक्षं प्रति उद्भूतरूपं कारणम् । शुक्लादिकमनेकधेति । तच्च रूपं शुक्लनीलपीतरक्तहरितकपिशकर्बुरादिभेदादनेकप्रकारकं भवति । ननु कथं कर्बुरमतिरिक्तरूपं भवति । इत्थं नीलपीताद्यवयवारब्धोऽवयवी न तावन्नीरूपोऽप्रत्यक्षप्रसङ्गात् । नापि व्याप्यवृत्ति नीलादिरूपमुत्पद्यते पीतावच्छेदेनापि नीलोपलब्धिप्रसङ्गात् । नाप्यव्याप्यवृत्तिनीलादिकमुत्पद्यते व्याप्यवृत्तिजातीयगुणानामव्याप्यवृत्तित्वे विरोधात् । तस्मान्नानाजातीयरूपैरवयविनि विजातीयं चित्रं रूपमारभ्यते । अत एवैकं चित्रमित्यनुभवोऽपि । नानारूपकल्पने गौरवात् । इत्थं च नीलादीनां पीताद्यारम्भे प्रतिबन्धकत्वकल्पनादवयविनि न पीताद्युत्पत्तिः । एतेन स्पर्शोऽपि व्याख्यातः । रसादिकमपि नाव्याप्यवृत्ति, किंतु नानाजातीयरसवदवयवैरारब्धेऽवयविनि रसाभावेऽपि न क्षतिः । तत्र रसनयाऽवयवरस एव गृह्यते, रसनेन्द्रियादीनां द्रव्यग्रहे सामर्थ्याभावात् , अवयविनो नीरसत्वेऽपि क्षतेरभावात् । नव्यास्तु—तत्राव्याप्यवृत्त्येव नानारूपं, नीलादेः पीतादिप्रतिबन्धकत्वकल्पने गौरवात् । अतएव—

> लोहितो यस्तु वर्णेन मुखे पुच्छे च पाण्डुरः ।
> श्वेतः खुरविषाणाभ्यां स नीलो वृष उच्यते ।

१—कर्बुरम्=चित्रम् । आदिना कपिशः ।

२—इत्थञ्चेति—दर्शितरीत्या लाघवबलेन चित्ररूपसिद्धावित्यर्थः ।

३—प्रतिबन्धकत्वकल्पनादिति । समवायेन नीलं प्रति स्वसमवायिसमवेतत्वसम्बन्धेन नीलातिरिक्तरूपत्वेन पीतरूपं प्रति पीतातिरिक्तरूपत्वेन प्रतिबन्धकत्वमितिरीत्या प्रतिबध्यप्रतिबन्धकभावकल्पनादित्यर्थः ।

४—तथाच प्राचीनानां मते रूपस्येव स्पर्शस्यापि व्याप्यवृत्तितया नानास्पर्शवदवयवारब्धद्रव्ये परस्परविरोधेन मृदुस्पर्शाद्युत्पत्त्यसम्भवात् तद्द्रव्यस्य स्पार्शनानुपपत्त्या चित्ररूपवत् चित्रस्पर्शोऽप्यङ्गीकार्यः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

इत्यादिशास्त्रमप्युपपद्यते । न च व्याप्याव्याप्यवृत्तिजातीययो-र्द्वयोर्विरोधः, मानाभावात् । नच लाघवादेकं रूपम्, अनुभवविरोधात्[1] । अन्यथा घटादेरपि लाघवादैक्यं स्यात् । एतेन स्पर्शादि-कमपि व्याख्यातमिति वदन्ति ॥ १०० ॥

जलादिपरमाणौ तन्नित्यमन्यत्सहेतुकम् ।

जलादीति । जलपरमाणौ तेजःपरमाणौ च रूपं नित्यम् । पृथिवीपरमाणुरूपं तु न नित्यं तत्र पाकेन रूपान्तरोत्पत्तेः । नहि घटस्य पाकानन्तरं तदवयवोऽपक्व उपलभ्यते । नहि रक्तकपालस्य[2] कपालिका नीलावयवा भवति । एवं क्रमेण परमाणावपि पाकसिद्धेः । अन्यज्जलतेजःपरमाणुरूपभिन्नं रूपं सहेतुकं जन्यम् ।

रसं निरूपयति—

रसस्तु रसनाग्राह्यो मधुरादिरनेकधा ॥ १०१ ॥
सहकारी रसज्ञाया नित्यतादि च पूर्ववत् ।

रसस्त्विवति । सहकारीति । रासनज्ञाने रसः कारणमित्यर्थः । पूर्ववदिति । जलपरमाणौ रसो नित्योऽन्यः सर्वोऽपि रसोऽनित्य इत्यर्थः ।

गन्धं निरूपयति—

घ्राणग्राह्यो भवेद्गन्धो घ्राणस्यैवोपकारकः ॥ १०२ ॥

घ्राणग्राह्य इति । उपकारक इति । घ्राणजन्यज्ञाने कारण-मित्यर्थः । सर्वो गन्धोऽनित्य एव ॥ १०१ ॥ १०२ ॥

सौरभश्चासौरभश्च स द्वेधा परिकीर्तितः ।

स्पर्शं निरूपयति—

स्पर्शस्त्वगिन्द्रियग्राह्यस्त्वचः स्यादुपकारकः ॥ १०३ ॥

१—" अयं नीलादिनानावर्णयुक्तोऽवयवी " इत्यनुभवविरोधादित्यर्थः ।
२—ननु घटावयवेऽप्यायातु पाको नतु परमाणावत आह नहि रक्तेति ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

स्पर्श इति। उपकारक इति। स्पार्शनप्रत्यक्षे स्पर्शः कारणमित्यर्थः ॥ १०३ ॥

अनुष्णाशीतशीतोष्णभेदात्स त्रिविधो मतः।
काठिन्यादि क्षितावेव नित्यतादि च पूर्ववत् ॥१०४॥

अनुष्णाशीतेति। पृथिव्यां वायौ च स्पर्शोऽनुष्णाशीतः। जले शीतः। तेजस्युष्णः। काठिन्येति। कठिनसुकुमारस्पर्शौ पृथिव्यामेवेत्यर्थः। कठिनत्वादिकं तु न संयोगगतो जातिविशेषः, चक्षुर्ग्राह्यत्वापत्तेः। पूर्ववदिति। जलतेजोवायुपरमाणुस्पर्शा नित्यास्तद्भिन्नास्त्वनित्या इत्यर्थः ॥ १०४ ॥

एतेषां पाकजत्वं तु क्षितौ नान्यत्र कुत्रचित्।
तत्रापि परमाणौ स्यात्पाको वैशेषिके नये ॥ १०५ ॥

एतेषामिति। एतेषां रूपरसगन्धस्पर्शानां नान्यत्रेति। पृथिव्यां हि रूपरसगन्धस्पर्शपरावृत्तिरग्निसंयोगादुपलभ्यते। नहि शतधा ध्मायमाने जले रूपादिकं परिवर्त्तते। नीरे सौरभमौष्ण्यं चान्वयव्यतिरेकाभ्यामौपाधिकमेवेति निर्णीयते। पवनपृथिव्योः शीतस्पर्शादिवत्। तत्रापि पृथिवीष्वपि मध्ये परमाणावेव रूपादीनां पाक इति वैशेषिका वदन्ति। तेषामयमाशयः। अवयविनाऽवष्टब्धेष्ववयवेषु पाको न[3] सम्भवति परन्तु वह्निसंयोगेनावयविषु विनष्टेषु स्वतन्त्रेषु परमाणुषु पाकः। पुनश्च पक्वपरमाणुसंयोगाद्द्व्यणुकादिक्रमेण पुनर्महावयविपर्यन्तमुत्पत्तिः। तेजसामतिशयितवेग-

१—"कठिनः संयोग" इति प्रतीतिस्तु कठिनस्पर्शवद्द्रव्यप्रतियोगित्वं विषयीकरोतीति भावः।

२—एते एव "पीलुपाकवादिन" इत्युच्यन्ते।

३—रूपादिपरावृत्तिफलकस्तेजःसंयोगो न सम्भवतीत्यर्थः, रूपादिपरावृत्तिर्न भवतीति यावत्। रूपादिनाशं प्रति साक्षात्परंपरासाधारणसर्वावयवावच्छेदेन तेजःसंयोगस्य हेतुतया अवयविनावष्टब्धेष्ववयवेषु सत्सु अवयविनि रूपादिनाशो न सम्भवति तद्धेतोः सर्वावयवावच्छेदेन तेजःसंयोगस्याभावादिति भावः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वशात्पूर्वव्यूहनाशो झटिति व्यूहान्तरोत्पत्तिश्चेति। अत्र द्व्यणुकादिविनाशमारभ्य कतिभिः क्षणैः पुनरुत्पन्नया रूपादिमद्भवतीति शिष्यबुद्धिवैशद्यार्थं क्षणप्रक्रिया। तत्र विभागजविभागानङ्गीकारे नवक्षणा, तदङ्गीकारे तु विभागः किंचित्सापेक्षो विभागं जनयेत्। निरपेक्षस्य तत्त्वे कर्मत्वं स्यात्। "संयोगविभागयोरनपेक्षं कारणं कर्मेति" वैशेषिकसूत्रम्[1]। स्वोत्तरोत्पन्नभावान्तरानपेक्षत्वं तस्यार्थः। अन्यथा कर्मणोऽप्युत्तरसंयोगोत्पत्तौ पूर्वसंयोगनाशापेक्षणादव्याप्तिः स्यात्। तत्र यदि द्रव्यारम्भकसंयोगविनाशविशिष्टं कालमपेक्ष्य विभागजविभागः स्यात्तदा दशक्षणा। अथ द्रव्यनाशविशिष्टं कालमपेक्ष्य विभागजविभागः स्यात्तदैकादशक्षणा। तथाहि—अथ नवक्षणा। वह्निसंयोगात्परमाणौ कर्म। ततः परमाण्वन्तरेण विभागः। तत आरम्भकसंयोगनाशः। ततो द्व्यणुकनाशः॥ १॥ ततः परमाणौ[2] श्यामादिनाशः॥ २॥ ततो रक्ताद्युत्पत्तिः॥ ३॥ ततो द्रव्यारम्भानुगुणा क्रिया॥ ४॥ ततो विभागः॥५॥ ततः पूर्वसंयोगानाशः॥६॥ तत आरम्भकसंयोगः। ७। ततो द्व्यणुकोत्पत्तिः। ८। ततो रक्ताद्युत्पत्तिः। ९। ननु श्यामादिनाशक्षणे रक्तोत्पत्तिक्षणे वा परमाणौ द्रव्यारम्भानुगुणः क्रियास्त्विति चेन्न, अग्निसंयुक्ते परमाणौ यत्कर्म तद्विनाशमन्तरेण गुणोत्पत्तिमन्तरेण च परमाणौ क्रियान्तराभावात्कर्मवति कर्मान्तरानुत्पत्तेर्निर्गुणे द्रव्ये द्रव्यारम्भानुगुणक्रियानुपपत्तेश्च। तथापि परमाणौ श्यामादिनिवृत्तिसमकालं रक्ताद्युत्पत्तिः स्यादिति चेन्न, पूर्वरूपादिध्वंसस्यापि रूपान्तरे हेतुत्वात्। इति नवक्षणा। अथ दशक्षणा। सा च आरम्भकसंयोगविनाशविशिष्टं कालमपेक्ष्य विभागेन विभागजनने सति स्यात्। तथाहि—वह्नि-

---

१—सूत्रन्तु—"एकद्रव्यमगुणं संयोगविभागेष्वनपेक्षकारणमिति कर्मलक्षणम्" (वै० १। १। १६) इति सूत्रस्थं लक्षणं निष्कर्षयति—संयोगेति।

२—ततः परमाणौ इति। परमाणुगतरूपनाशं प्रति द्व्यणुकात्मकद्रव्यस्य प्रतिबन्धकतया तत्पूर्वं श्यामनाशासम्भवादिति भावः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

संयोगाद्द्व्यणुकारम्भके परमाणौ कर्म । ततो विभागः । तत आरम्भकसंयोगनाशः । ततो द्व्यणुकनाशविभागजविभागौ । १ । ततः श्यामनाशपूर्वसंयोगनाशौ । २ । ततो रक्तोत्पत्त्युत्तरसंयोगौ । ३ । ततो वह्निनोदनजन्यपरमाणुकर्मणो नाशः । ४ । ततोऽदृष्टवदात्मसंयोगाद्द्रव्यारम्भानुगुणा क्रिया । ५ । ततो विभागः । ६ । ततः पूर्वसंयोगनाशः । ७ । तत आरम्भकसंयोगः । ८ । ततो द्व्यणुकोत्पत्तिः । ९ । ततो रक्तोत्पत्तिः । १० । अथैकादशक्षणा । वह्निसंयोगात्परमाणौ कर्म । ततो विभागः । ततो द्रव्यारम्भकसंयोगनाशः । ततो द्व्यणुकनाशः । १ । ततो द्व्यणुकनाशविशिष्टं कालमपेक्ष्य विभागजविभागश्यामनाशौ । २ । ततः पूर्वसंयोगनाशरक्तोत्पत्ती । ३ । तत उत्तरसंयोगः । ४ । ततो वह्निनोदनजन्यपरमाणुकर्मनाशः । ५ । ततोऽदृष्टवदात्मसंयोगाद्द्रव्यारम्भानुगुणा क्रिया । ६ । ततो विभागः । ७ । ततः पूर्वसंयोगनाशः ॥ ८ ॥ ततो द्रव्यारम्भकोत्तरसंयोगः ॥ ८ ॥ ततो द्व्यणुकोत्पत्तिः ॥ १० ॥ ततो रक्ताद्युत्पत्तिः ॥ ११ ॥ इति । [1]मध्यमशब्दवदेकस्मादग्निसंयोगान्न रूपनाशोत्पादौ तावत्कालमेकस्याग्नेरस्थिरत्वात् । किंच नाशक एव यद्युत्पादकस्तदा नष्टे रूपादावग्निनाशे नीरूपश्चिरं परमाणुः स्यात् । उत्पादकश्चेन्नाशकस्तदा रक्तोत्पत्तौ तदग्निनाशे रक्ततरता [2] न स्यात् । अथ [3]परमाण्वन्तरे कर्मचिन्तनात्पञ्चमादिक्षणोऽपि

१—अत्र य एवाग्निसंयोगो द्व्यणुकनाशकः स एव श्यामनाशे रक्तोत्पादे च हेतुरिति केषांचिन्मतं पुनरग्न्यन्तरसंयोगादिति भाष्यविरुद्धं नादरणीयमित्याभिप्रेत्याह मध्यमशब्दवदिति अयमाशयः—यथा आद्यन्तशब्दं वर्जयित्वा मध्यवर्तियावच्छब्दानां स्वपूर्वशब्दनाशं प्रति स्वोत्तरशब्दोत्पत्तिं प्रति च कारणता तथेत्यर्थः । एकस्मादिति—द्व्यणुकनाशकादेकस्मादित्यर्थः ।

२—रक्ततरता न स्यादिति । अयं भावः—रूपनाशकतावच्छेदकं विलक्षणाग्निसंयोगत्वं तदेव यद्युत्पादकतावच्छेदकं तदा कार्यतावच्छेदकमपि सामान्यतः पृथ्वीपरमाणुरूपत्वं त्वया वाच्यं तथा सति क्वचिद्रक्ततरता क्वचिच्च रक्ततमता परमाणौ न स्यात्, कार्यवैचित्र्यस्य कारणतावच्छेदकभेदाधीनत्वादिति ।

३—अथ परमाण्वन्तरं इति । द्व्यणुकनाशकक्रियावत्परमाणुभिन्नद्व्यणुकान्तरारम्भकपरमाणावित्यर्थः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

गुणोत्पत्तिः। तथाहि। एकत्र परमाणौ कर्म। ततो विभागः। तत आरम्भकसंयोगनाशपरमाण्वन्तरकर्मणी। ततस्तु द्व्यणुकनाशः। परमाण्वन्तरकर्मजन्यविभाग इत्येकः कालः।१। ततः श्यामादिनाशः। विभागाच्च पूर्वसंयोगनाशश्चेत्येकः कालः।२। ततो रक्तोत्पत्तिर्द्रव्यारम्भकसंयोगश्चेत्येकः कालः।३। अथ द्व्यणुकोत्पत्तिः।४। ततो रक्तोत्पत्तिरिति।५। पञ्चक्षणा। द्रव्यनाशसमकालं परमाण्वन्तरे कर्मचिन्तनात्षष्ठे गुणोत्पत्तिः। तथा हि—परमाणुकर्मणा परमाण्वन्तरविभागः। तत आरम्भकसंयोगनाशः। अथ द्व्यणुकनाशपरमाण्वन्तरकर्मणी।१। अथ श्यामादिनाशः। परमाण्वन्तरकर्मजश्च विभागः।२। ततो रक्तोत्पत्तिः परमाण्वन्तरे पूर्वसंयोगनाशश्च।३। ततः परमाण्वन्तरसंयोगः।४। ततो द्व्यणुकोत्पत्तिः।५। अथ रक्तोत्पत्तिरिति।६। षट्क्षणा। एवं श्यामनाशक्षणे परमाणनन्तरेण कर्मचिन्तनात्सप्तक्षणा। तथा हि—परमाणौ कर्म ततः परमाण्वन्तरेण विभागः। तत आरम्भकसंयोगनाशः। ततो द्व्यणुकनाशः।१। ततः श्यामादिनाशपरमाण्वन्तरकर्मणी।२। ततो रक्तोत्पत्तिः परमाण्वन्तरे कर्मजविभागश्च।३। ततः परमाण्वन्तरेण पूर्वसंयोगनाशः।४। ततः परमाण्वन्तरेण संयोगः।५। ततो द्व्यणुकोत्पत्तिः।६। ततो रक्तोत्पत्तिः।७। इति सप्तक्षणा। एवं रक्तोत्पत्तिसमकालं परमाण्वन्तरे कर्मचिन्तनादष्टक्षणा। तथाहि। परमाणौ कर्म। ततः परमाण्वन्तरविभागः। तत आरम्भकसंयोगनाशः। ततो द्व्यणुकनाशः।१। ततः श्यामनाशः।२। ततो रक्तोत्पत्तिपरमाण्वन्तरकर्मणी।३। ततः परमाण्वन्तरकर्मजविभागः।४। ततः परमाण्वन्तरे पूर्वसंयोगनाशः।५। ततः परमाण्वन्तरसंयोगः।६। ततो द्व्यणुकोत्पत्तिः।७। अथ रक्तो-

---

१—द्व्यणुकारम्भकसंयोगनाशाद्युत्पत्तिक्षणे द्व्यणुकान्तरारम्भककर्मचिन्तनादित्यर्थः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

त्पत्तिरित्यष्ट[1]क्षणा ॥ १०५ ॥

नैयायिकानां तु नये द्व्यणुकादावपीष्यते ।

नैयायिकानामिति । नैयायिकानां मते द्व्यणुकादाववयविन्यपि भवति । तेषामयमाशयः । अवयविनां सच्छिद्रत्वाद्वह्नेः सूक्ष्मावयवैरन्तःप्रविष्टैरवयवेष्ववष्टब्धेष्वपि पाको न विरुद्ध्यते । अनन्तावयवितन्नाशकल्पने गौरवात् । इत्थं च सोऽयं घट इत्यादिप्र[2]त्यभिज्ञाऽपि संगच्छते । यत्र तु न प्रत्यभिज्ञा तत्रावयविनाशोऽपि स्वीक्रियत इति ।

सङ्ख्यां निरूपयितुमाह—

गणनाव्यवहारे तु हेतुः सङ्ख्याभिधीयते ॥ १०६ ॥

गणनेति । गणनाव्यवहारासाधारणकारणं सङ्ख्येत्यर्थः ।१०६।

नित्येषु नित्यमेकत्वमनित्येऽनित्यमिष्यते ।

द्वित्वादयः परार्धान्ता अपेक्षाबुद्धिजा मताः ॥ १०७ ॥

नित्येष्विति । नित्येषु परमाण्वादिषु एकत्वं नित्यम् । अनित्ये घटादावेकत्वमनित्यमित्यर्थः । द्वित्वादयो [3]व्यासज्यवृत्तिसङ्ख्या अपेक्षाबुद्धिजन्याः ॥ १०७ ॥

अनेकाश्रयपर्याप्ता एते तु परिकीर्तिताः ।

अपेक्षाबुद्धिनाशाच्च नाशस्तेषां निरूपितः ॥ १०८ ॥

१—अत्रारम्भकसंयोगनाशक्षणे परमाण्वन्तरे कर्मोत्पत्तिक्षणे द्व्यणुकनाशप्रभृतिपञ्चमक्षणे रूपादिमत्त्वं, द्व्यणुकनाशक्षणे परमाण्वन्तरे तदुत्पत्तिपक्षे षष्ठक्षणे रूपादिमत्त्वम्, श्यामादिनाशक्षणे परमाण्वन्तरे तदुत्पत्तिपक्षे सप्तमक्षणे रूपादिमत्त्वम्, रक्तोत्पत्तिक्षणे परमाण्वन्तरे तदुत्पत्तिपक्षेऽष्टमक्षणे रूपादिमत्त्वं सम्भवतीति फलितम् ।

२—"प्रत्यभिज्ञापि" इति । पूर्वावयविनाशे तदुत्तरोत्पन्नावयविनि पूर्वावयविनोरभेदाभावेनाभेदावगाहिनी प्रत्यभिज्ञा न स्यादिति भावः ।

३—एकत्वान्यसंख्यामात्रमपेक्षाबुद्धिरूपनिमित्तकारणजन्यमित्यर्थः । असमवायिकारणं तु द्वित्वं प्रति समवायिकारणगतयावदेकत्वमिति बोध्यम् । व्यासज्येति । धर्मद्वयसमनियतवृत्तिद्वित्वादिपरार्द्धपर्यन्ता यावत्संख्या अपेक्षाबुद्धिजन्या इत्यर्थः ।

प्रश्नाः—पीलुपाकवादपिठरपाकवादस्वरूपोक्तिपुरःसरं संक्षेपेण पाकजप्रक्रियामवतारय ?

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अनेकेति । यद्यपि द्वित्वादिसमवायः प्रत्येकं घटादावपि वर्तते तथाप्येको द्वाविति प्रत्ययाभावात् एको न द्वाविति प्रत्ययसंभवाच्च द्वित्वादीनां पर्याप्तिलक्षणः कश्चन संबन्धोऽनेकाश्रयोऽभ्युपगम्यते । प्रथममपेक्षाबुद्धिः, ततो द्वित्वोत्पत्तिः, ततो विशेषणज्ञानं द्वित्वत्व-निर्विकल्पात्मकम्[1] ततो द्वित्वत्वविशिष्टप्रत्यक्षम्, अपेक्षाबुद्धिना-शश्च[2] ततो द्वित्वनाश इति । यद्यपि ज्ञानानां द्विक्षणमात्रस्थायित्वं योग्यविभुविशेषगुणानां स्वोत्तरवर्तिगुणनाश्यत्वात् । तथाप्यपेक्षा-बुद्धेस्त्रिक्षणावस्थायित्वं कल्प्यते । अन्यथा[3] निर्विकल्पकालेऽपेक्षाबुद्धि-नाशानन्तरं द्वित्वस्यैव नाशः स्यान्न तु द्वित्वप्रत्यक्षं, तदानीं विषयाभावात्[4] विद्यमानस्यैव चक्षुरादिना ज्ञानजननोपगमात्[5] तस्मात् द्वित्वप्रत्यक्षादिकमपेक्षाबुद्धेर्नाशकं कल्प्यते । न चापेक्षाबुद्धिः नाशात्कथं द्वित्वनाश इति वाच्यं, कालान्तरे द्वित्वप्रत्यक्षाभावात्, अपेक्षाबुद्धिस्तदुत्पादिका तन्नाशात्तन्नाश इति कल्पनात्[6] अत एव तत्पुरुषीयापेक्षाबुद्धिजन्यद्वित्वादिकं तेनैव गृह्यते इति कल्प्यते । न चापेक्षाबुद्धेर्द्वित्वप्रत्यक्षे कारणत्वमस्त्विति वाच्यम्, लाघवेन द्वित्वं प्रत्येव कारणत्वस्यैवोचितत्वात् । अतीन्द्रिये द्व्यणुकादावपेक्षाबुद्धि-र्योगिनाम् । सर्गादिकालीनपरमाण्वादावीश्वरीयापेक्षाबुद्धिर्ब्रह्माण्डा-न्तरवर्तियोगिनामपेक्षाबुद्धिर्वा द्वित्वादिकारणमिति ॥१०८॥

१—विशेषणज्ञानमिति—द्वित्वत्वद्वित्वोभयनिष्ठतुरीयविषयताशालि ज्ञानमित्यर्थः ।

२—कल्प्यते=स्वीक्रियते इत्यर्थः ।

३—अन्यथा=अपेक्षाबुद्धेर्द्विक्षणमात्रावस्थायित्वे ।

४—विद्यमानस्य=उत्पत्स्यमानप्रत्यक्षसमानकालीनस्येत्यर्थः ।

५—द्वित्वप्रत्यक्षादिकमिति—द्वित्वद्वित्वत्वनिर्विकल्पकमित्यर्थः । आदिना त्रित्वद्विपृथ-क्त्वादिप्रत्यक्षपरिग्रहः । "योग्यविभुविशेषगुणत्वस्य स्वत्वस्य चानुगतस्याभावेन स्वोत्तरोत्पन्नगुणत्व-स्यानुगतस्याभावात्तत्तद्व्यक्तित्वेनैव नाश्यनाशकभावस्य वाच्यतया द्वित्वत्वविशिष्टप्रत्यक्षरूपकार्या-नुरोधेन द्वित्वद्वित्वत्वनिर्विकल्पकस्यैव तद्व्यक्तित्वेनापेक्षाबुद्धिनाशकत्वं कल्प्यते नतु द्वितीयक्ष-णोत्पन्नस्मरणादेरिति भावः" इति दिनकरी ।

प्रश्नाः—अपेक्षाबुद्धेः स्वरूपं विस्तरेण प्रपञ्चनीयम् ?

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अपेक्षाबुद्धिः केन्यत आह—

अनेकैकत्वबुद्धिर्या साऽपेक्षाबुद्धिरिष्यते ।

अनेकेति । "अयमेकोऽयमेक" इत्याकारिका इत्यर्थः । इदं तु बोध्यम् यत्रानियतैकत्वज्ञानं तत्र त्रित्वादिभिन्ना बहुत्वसंख्योत्पद्यते यथा सेनावनादाविति कन्दलीकारः । आचार्यास्तु त्रित्वादिकमेव बहुत्वं मन्यते । तथा च त्रित्वत्वादिव्यापिका बहुत्वत्वजातिर्नातिरिच्यते । सेनावनादावुत्पन्नेऽपि त्रित्वादौ त्रित्वत्वाद्यग्रहो दोषात् । इत्थं चेतो बहुतरेयं सेनेति प्रतीतिरुपपद्यते । बहुत्वस्य संख्यान्तरत्वे तु तत्तारतम्याभावान्नोपपद्यतेत्यवधेयम् ।

परिमाणं निरूपयति--

परिमाणं भवेन्मानव्यवहारस्य कारणम् ॥ १०९ ॥

परिमाणमिति । परिमितिव्यवहारासाधारणं कारणं परिमाणमित्यर्थः ॥ १०९ ॥

अणु दीर्घं महद्ध्रस्वमिति तद्भेद ईरितः ।

तच्चतुर्विधं अणु महद् दीर्घं ह्रस्वं चेति--

अनित्ये तदनित्यं स्यान्नित्ये नित्यमुदाहृतम् ॥ ११० ॥

सङ्ख्यातः परिमाणाच्च प्रचयादपि जायते ।

तत्परिमाणम् । नित्यमित्यत्र परिमाणमित्यनुषज्ये । जायत इत्यत्रापि परिमाणमित्यनुवर्तते । अनित्यमिति पूर्वेणान्वितम् । तथा चानित्यपरिमाणं सङ्ख्याजन्यं परिमाणजन्यं प्रचयजन्यं चेत्यर्थः ।

१—अयमेक इति । तत्तद्व्यक्तिमात्रनिष्ठेदन्त्वावच्छिन्नविशेष्यतानिरूपितैकत्वप्रकारता-शालिनी बुद्धिरपेक्षाबुद्धिपदार्थ इति भावः ।

२—दोषाद् नियतानेकैकत्वज्ञानाभावात् ।

प्रश्नाः—कतिविधं परिमाणम् ? अनित्यपरिमाणहेतून् लिख ?

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तत्र सङ्ख्याजन्यमुदाहरति—

अनित्यं द्व्यणुकादौ तु संख्याजन्यमुदाहृतम् ॥१११॥

द्व्यणुकस्य त्रसरेणोश्च परिमाणं प्रति परमाणु परिमाणं द्व्यणुकपरिमाणं वा न कारणं परिमाणस्य स्वसमानजातीयोत्कृष्टपरिमाणजनकत्वात् । द्व्यणुकस्याणुपरिमाणं तु परमाण्वणुत्वापेक्षया नोत्कृष्टम् । त्रसरेणुपरिमाणं तु न सजातीयम् । अतः परमाणौ द्वित्वसंख्या द्व्यणुकपरिमाणस्य, द्व्यणुके त्रित्वसंख्या च त्रसरेणुपरिमाणस्यासमवायिकारणमित्यर्थः ॥ ११० ॥ १११ ॥

परिमाणजन्यं परिमाणमुदाहरति—

परिमाणं घटादौ तु परिमाणजमुच्यते ।
प्रचयः शिथिलाख्यो यः संयोगस्तेन जन्यते ॥१०२॥
परिमाणं तूलकादौ-

परिमाणं घटादाविति । घटादिपरिमाणं कपालादिपरिमाणजन्यम् । प्रचयजन्यमुदाहर्तुं प्रचयं निर्वक्ति प्रचय इति ॥११२॥

नाशस्त्वाश्रयनाशतः ।

परिमाणं चाश्रयनाशादेव नश्यतीत्याह । नाश इति । अर्थात्परिमाणस्यैव । न चावयवनाशः कथं परिमाणनाशकः सत्यप्यवयविनि त्रिचतुरादिपरमाणुविश्लेषे तदुपचये चावयविनः प्रत्यभिज्ञानेपि परिमाणान्तरस्य प्रत्यक्षसिद्धत्वादिति वाच्यम्, परमाणुविश्लेषे हि द्व्यणुकस्य नाशोऽवश्यमभ्युपेयस्तन्नाशे च त्रसरेणुकनाशः, एवंक्रमेण महावयविनो नाशस्यावश्यकत्वात् । सति च नाशकेऽनभ्युपगममात्रेण नाशस्यापलपितुमशक्यत्वात् । शरीरादाववयवोपचयेऽसमवायिकारणनाशस्यावश्यकत्वादवयविनाश आवश्यकः । नच पटादिविनाशेऽपि तन्त्वन्तरसंयोगात्परिमाणाधिक्यं न स्यादिति वाच्यम्, तत्रापि वेमाद्यभिघातेनासमवायिकारणतन्तुसंयोगनाशात्पटनाशस्या-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वश्यकत्वात् । किंच तन्त्वरस्य तत्पटावयवत्वे पूर्वं तत्पट एव न स्यात्तन्त्वन्तररूपकारणाभावात् । तन्त्वन्तरस्यावयवत्वाभावे च न तेन परिमाणाधिक्यं संयुक्तद्रव्यान्तरवत् । तस्मात्तत्र तन्त्वन्तरसंयोगे सति पूर्वपटनाशस्ततः पटान्तरोत्पत्तिरित्यवश्यं स्वीकार्यम् । अवयविनः प्रत्यभिज्ञानं तु साजात्येन दीपकलिकादिवत् । न च पूर्वतन्तव एव तन्त्वन्तरसहकारात्पूर्वपटे सत्येव पटान्तरमारभन्तामिति वाच्यम्, मूर्तयोः समानदेशताविरोधात्तत्र पटद्वयासम्भवादेकदा नानाद्रव्यस्य तत्रोपलम्भस्य बाधितत्वाच्च । तस्मात्पूर्वद्रव्यस्य प्रतिबन्धकस्य विनाशे द्रव्यान्तरोत्पत्तिरित्यवश्यमभ्युपेयत्वात् ।

पृथक्त्वं निरूपयति—

सङ्ख्यावत्तु पृथकत्वं स्यात्पृथक्प्रत्ययकारणम् ॥११३॥
अन्योन्याभावतो नास्य चरितार्थत्वमिष्यते ।
अस्मात्पृथगिदं नेति प्रतीतिर्हि विलक्षणा ॥ ११४ ॥

सङ्ख्यावदिति । पृथक्प्रत्ययासाधारणं कारणं पृथक्त्वम् । तन्नित्यादिकं सङ्ख्यावत् । तथाहि । नित्येष्वेकत्वं नित्यम् । अनित्येष्वनित्यम् । अनित्यमेकत्वं तु आश्रयद्वितीयक्षणे चोत्पद्यते आश्रयनाशान्नश्यति । तथैकपृथक्त्वमपि । द्वित्वादिवच्च द्विपृथक्त्वादिकमपीत्यर्थः । नन्वयमस्मात्पृथगित्यादावन्योन्याभावो भासते तत्कथं पृथक्त्वं गुणान्तरं स्वीक्रियते, न चास्तु पृथक्त्वं, न त्वन्योन्याभाव इति वाच्यम्, रूपं न घट इति प्रतीत्यनापत्तेः । नहि रूपे घटावादिकं पृथक्त्वमस्ति येन परम्परासम्बन्धः कल्प्येत इत्यत आह । अस्मादिति । ननु शब्दवैलक्षण्यमेव न त्वर्थवैलक्षण्यमिति चेन्न, विनार्थभेदं घटात्पृथगितिवद्घटो न पट इत्यत्रापि [1]पञ्चमीप्रसङ्गात् । तस्मा-

---

१—पञ्चमीप्रसंगादिति । अन्योन्याभावार्थकपदयोगस्य पञ्चमीप्रयोजकस्य तत्र सत्त्वादिति भावः । अत्र नव्या.—अन्योन्याभाव एव पृथक्त्वं न तु गुणान्तरं नच घटो नेत्यत्र पञ्चम्याप-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

द्यदर्थयोगे पञ्चमी सोऽर्थो नञर्थान्योन्याभावतो भिन्नो गुणान्तरं कल्प्यत इति ॥ ११३ ॥ ११४ ॥

संयोगं निरूपयति—

अप्राप्तयोस्तु या प्राप्तिः सैव संयोग ईरितः ।
कीर्तितस्त्रिविधस्त्वेष आद्योऽन्यतरकर्मजः ॥ ११५ ॥

अप्राप्तयोरिति । तं विभजते । कीर्तित इति । एष संयोगः ॥ ११५ ॥

तथोभयक्रियाजन्यो भवेत्संयोगजोऽपरः ।
आदिमः श्येनशैलादिसंयोगः परिकीर्तितः ॥ ११६ ॥
मेषयोः सन्निपातो यः सः द्वितीय उदाहृतः ।

सन्निपातः संयोगः । द्वितीय उभयकर्मजः ।

कपालतरुसंयोगात्संयोगस्तरुकुम्भयोः ॥ ११७ ॥
तृतीयः स्यात्कर्मजोऽपि द्विधैव परिकीर्तितः ।
अभिघातो नोदनं च शब्दहेतुरिहादिमः ॥ ११८ ॥
शब्दाहेतुर्द्वितीयः स्याद्

तृतीय इति । संयोगजसंयोग इत्यर्थः । तृतीयः स्यादिति पूर्वेणान्वितम् । संयोगजसंयोग इत्यर्थः आदिमः अभिघात द्वितीयो नोदनाख्यः संयोग इति ।

विभक्तप्रत्ययकारणं विभागं निरूपयति—

विभागोऽपि त्रिधा भवेत् ।
एककर्मोद्भवस्त्वाद्यो द्वयकर्मोद्भवोऽपरः ॥ ११९ ॥
विभागजस्तृतीयः स्यात्तृतीयोऽपि द्विधा भवेत् ।

न्तिः, अन्योन्याभावविशिष्टार्थकपदयोग एवान्यारादितरर्ते—इत्यादिसूत्रेण पञ्चमीविधानात् । नञस्तु नान्योऽन्याभावविशिष्टार्थकत्वं परन्तु अन्योन्याभावार्थकत्वमित्यस्यान्यत्र सिद्धान्तितत्वात् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

हेतुमात्रविभागोत्थो हेत्वहेतुविभागजः ॥ १२० ॥

विभाग इति । एककर्मेति । तदुदाहरणं तु श्येनशैलविभागादिकं पूर्ववद्बोध्यम् । तृतीयोऽपि विभागजविभागः, कारणमात्रविभागजन्यः कारणाकारणविभागजन्यश्चेति । आद्यस्तावत् यत्र कपाले कर्म ततः कपालद्वयविभागः । ततो घटारम्भकसंयोगनाशः । ततो घटनाशः । ततस्तेनैव कपालविभागेन सकर्मणः कपालस्याकाशविभागो जन्यते । तत आकाशसंयोगनाशः । तत उत्तरदेशसंयोगः । ततः कर्मनाश इति । न च तेन कर्मणैव कथं देशान्तरविभागो न जन्यत इति वाच्यम्, एकस्य कर्मण आरम्भकसंयोगप्रतिद्वन्द्विविभागजनकत्वस्यानारम्भकसंयोगप्रतिद्वन्द्विविभागजनकत्वस्य च विरोधात् । अन्यथा विकसत्कमलकुड्मलभङ्गप्रसङ्गात् । तस्माद् यदीदमनारम्भकसंयोगप्रतिद्वन्द्विविभागं जनयेत्तदारम्भकसंयोगप्रतिद्वन्द्विविभागं न जनयेत् । नच कारणविभागेनैव द्रव्यनाशात्पूर्वं कुतो देशान्तरविभागो न जन्यत इति वाच्यम्, आरम्भकसंयोगप्रतिद्वन्द्विविभागवतोऽवयवस्य सति द्रव्ये देशान्तरविभागासंभवात् । द्वितीयस्तावत् । यत्र हस्तक्रियया हस्ततरुविभागस्ततः शरीरेऽपि विभक्तप्रत्ययो भवति तत्र शरीरतरुविभागे हस्तक्रिया न कारणं व्याधिकरणत्वात् । शरीरे तु क्रिया नास्त्येव अवयविकर्मणो यावदवयवकर्मनियतत्वात् । अतस्तत्र कारणाकारणविभागेन कार्याकार्यविभागो जन्यते इति । अत एव विभागो

१—कपालस्याकाशविभाग—अन्यथा कपालकाशसंयोगस्य नाशकाभावेन नित्यत्वापत्तिरेव । कपालाकाशसंयोगस्य प्रतिबन्धकस्य सत्त्वेनोतरसंयोगानुत्पत्त्या कर्मणोऽपि नित्यत्वापत्तिः उत्तरसंयोगस्यैव स्वजनककर्मनिवर्तकत्वादिति भावः । अमुमर्थं हृदि निधायोक्तं तत उत्तरसंयोगस्ततः कर्मनाश इति ।

२—विकसदिति । तत्राग्रावच्छेदेनानारम्भकसंयोगप्रतिद्वन्द्विविभागजनककर्मणः सत्त्वातेन कर्मणा मूलावच्छिन्नारम्भकसंयोगविरोधिविभागोत्पत्तिस्तेन चारम्भकसंयोगानाशस्तेन कमलनाशः स्यादिति भावः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

गुणान्तरम् । अन्यथा शरीरे विभक्तप्रत्ययो न स्यात् । अतः संयोगनाशेन विभागो नान्यथासिद्धो भवति ॥ ११६–१२० ॥

परापरव्यवहारनिमित्ते परत्वापरत्वे निरूपयति—

परत्वं चापरत्वं च द्विविधं परिकीर्तितम् ।
दैशिकं कालिकं चापि मूर्त एव तु दैशिकम् ॥१२१॥
परत्वं मूर्तसंयोगभूयस्त्वज्ञानतो भवेत् ।
अपरत्वं तदल्पत्वबुद्धितः स्यादितीरितम् ॥ १२२ ॥

परत्वं चेति । दैशिकमिति । दैशिकपरत्वं बहुतरमूर्तसंयोगान्तरितत्वज्ञानादुत्पद्यते । एवं तदल्पीयस्त्वज्ञानादपरत्वमुत्पद्यते । अत्रावधित्वार्थं पञ्चम्यपेक्षा । यथा पाटलिपुत्रात्काशीमपेक्ष्य प्रयागः परः । पाटलिपुत्रात्कुरुक्षेत्रमपेक्ष्य प्रयागोऽपर इति ॥ १२१ ॥ १२२ ॥

तयोरसमवायी तु दिक्संयोगस्तदाश्रये ।

तयोर्दैशिकपरत्वापरत्वयोः । असमवायी असमवायिकारणम् । तदाश्रये दैशिकपरत्वाश्रये ।

दिवाकरपरिस्पन्दभूयस्त्वज्ञानतो भवेत् ॥ १२३ ॥
परत्वमपरत्वं तु तदीयाल्पत्वबुद्धितः ।
अत्र त्वसमवायी स्यात्संयोगः कालपिण्डयोः ॥१२४॥

दिवाकरेति । अत्र परत्वापरत्वं कालिकं ग्राह्यम् । यस्य सूर्यपरिस्पन्दापेक्षया यस्य सूर्यस्पन्दोऽधिकः स ज्येष्ठः । यस्य न्यूनः स कनिष्ठः । कालिकपरत्वापरत्वे जन्यद्रव्य एव । अत्र कालिकपरत्वापरत्वयोः ॥१२३॥१२४॥

अपेक्षाबुद्धिनाशेन नाशस्तेषां निरूपितः ।

१—दैशिकपरत्वस्य निमित्तकारणमाह—बहुतरेति । बहुतरसंयोगान्तरितत्वं तदेव विप्रकृष्टत्वं तद्विषयिण्यपेक्षाबुद्धिर्दैशिकपरत्वं प्रति निमित्तकारणमित्यर्थः ।

२—तदल्पीयस्त्वेति । अल्पसंयोगान्तरित्वरूपसन्निकृष्टत्वविषयिण्यपेक्षाबुद्धिर्दैशिकापरत्वं प्रति निमित्तकारणमित्यर्थः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तेषां कालिकदैशिकपरत्वापरत्वानाम् ।

क्रमप्राप्तां बुद्धिं निरूपयितुमाह—

बुद्धेः प्रपञ्चः प्रागेव प्रायशो विनिरूपितः ॥ १२५ ॥
अथावशिष्टोऽप्यपरः प्रकारः परिदर्श्यते ।
अप्रमा च प्रमा चेति ज्ञानं द्विविधमिष्यते ॥ १२६ ॥
तच्छून्ये तन्मतिर्या स्यादप्रमा सा निरूपिता ।
तत्प्रपञ्चो विपर्यासः संशयोऽपि प्रकीर्तितः ॥ १२७ ॥

बुद्धिरिति । तत्राप्रमां निरूपयति । तच्छून्य इति । तदभाववति तत्प्रकारकं ज्ञानं भ्रम इत्यर्थः । तत्प्रपञ्चोऽप्रमा प्रपञ्चः ॥१२५ ॥ १२६ ॥ १२७ ॥

आद्यो देहेष्वात्मबुद्धिः शंखादौ पीततामतिः ।
भवेन्निश्चयरूपा या संशयोऽथ प्रदर्श्यते ॥ १२८ ॥

आद्य इति । विपर्यास इत्यर्थः । शरीरादौ निश्चयरूपं यदात्मत्वप्रकारकं ज्ञानं गौरोऽहमित्याकारकम् । एवं शङ्खादौ पीतः शङ्ख इत्याकारकं यज्ज्ञानं निश्चयरूपं तद् भ्रम इति ॥ १२८ ॥

किंस्विन्नरो वा स्थाणुर्वेत्यादिबुद्धिस्तु संशयः ।
तदभावाप्रकारा धीस्तत्प्रकारा तु निश्चयः ॥ १२९ ॥

किंस्विदिति । किंस्विदिति वितर्के । निश्चयस्य लक्षणमाह । तदभावेति । तदभावाप्रकारकं तत्प्रकारकं ज्ञानं निश्चयः ॥ १२९ ॥

१—तच्छून्य इत्यस्यार्थः । तदभाववतीति । "तदभाववद्विशेष्यकत्वे सति तत्प्रकारकत्वविशिष्टं ज्ञान" मित्यर्थः । तदभाववदिति प्रमायामतिव्याप्तिवारणाय । तत्प्रकारकेत्यस्य तन्निष्ठप्रकारतानिरूपकेत्यर्थः । इच्छायामतिव्याप्तिवारणाय ज्ञानेति । सति सप्तम्याश्चावच्छिन्नत्वमर्थः ।

इदन्तु बोध्यम्—एकधर्मिनिष्ठयोर्विषयतयोर्विषयितयोर्वाऽवच्छेद्यावच्छेदकभाववनियमः । तत्रापि—ययोर्विषयतयोर्निरूप्यनिरूपकभावः तन्निरूपितविषयितयोरेवावच्छेद्यावच्छेदकभाव इति सिद्धान्तः । प्रकृते च—विशेष्यत्वप्रकारित्वयोरवच्छेद्याऽवच्छेदकभावविवक्षणेन "इमे रङ्गरजते"

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

संशयं लक्षयति—

स संशयो मतिर्या स्यादेकत्राभावभावयोः ।
साधारणादिधर्मस्य ज्ञानं संशयकारणम् ॥ १३० ॥

स संशय इति एकधर्मिकविरुद्धभावाभावप्रकारं ज्ञानं संशय इत्यर्थः। साधरणेति। उभयसाधारणो यो धर्मस्तज्ज्ञानं संशयकारणम्। यथोच्चैस्तरत्वं स्थाणुपुरुषसाधारणं ज्ञात्वाऽयं स्थाणुर्न वेति संदिग्धे। एवमसाधारणधर्मज्ञानमपि कारणम्। यथा शब्दत्वस्य नित्यानित्यव्यावृत्तत्वेन शब्दे गृहीतत्वाच्छब्दो नित्यो न वेति संदिग्धे। विप्रतिपत्तिस्तु शब्दो नित्यो न वेत्यादिशब्दात्मिका न संशयकारणं, शब्दव्याप्तिज्ञानादीनां निश्चयमात्रजनकत्वस्वभावात्। किन्तु तत्र शब्देन कोटिद्वयज्ञानं जन्यते, संशयस्तु मानस एवेति। एवं ज्ञाने प्रामाण्यसंशयाद्विषयसंशय इति। एवं व्याप्यसंशयादपि व्यापकसंशय इत्यादिकं बोध्यम्। किन्तु संशये धर्मिज्ञानं धर्मीन्द्रियसंनिकर्षो वा कारणमिति ॥ १३० ॥

दोषोऽप्रमाया जनकः प्रमायास्तु गुणो भवेत् ।
पित्तदूरत्वादिरूपो दोषो नानाविधः स्मृतः ॥ १३१ ॥

दोष इति। अप्रमां प्रति दोषः कारणम्। प्रमां प्रति गुणः कारणम्। तत्रापि पित्तादिरूपा दोषा अननुगताः। तेषां कारणत्वमन्वयव्यतिरेकाभ्यां सिद्धम्। गुणस्य प्रमाजनकत्वं तु अनुमानात्सिद्धम्। यथा प्रमा ज्ञानसाधारणकारणभिन्नकारणजन्या जन्यज्ञानत्वात् अप्रमावत्। नच दोषाभाव एव कारणमस्त्विति वाच्यं,

---

इत्याकारकप्रमायां रङ्गत्वाद्यभाववद्रजतादिविशेष्यकत्वरङ्गत्वादिप्रकारकत्वसत्त्वेऽपि नातिव्याप्तिरित्याधिकमन्यत्रानुसन्धेयम्।

प्रश्नाः—(प्रकारान्तरेण) ज्ञानं कति विधम् ? प्रमामप्रमाञ्च लक्षणोदाहरणाभ्यां विशदीकुरु ?

१—एकधर्मिकेति। "ह्रदपर्वतौ वह्नितदभाववन्तौ" इति ज्ञानेऽतिव्याप्तिवारणायैकधर्मिकेति—एकधर्मितावच्छेदकविशिष्टविशेष्यकत्वावच्छिन्नेत्यर्थः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पीतः शङ्ख इति ज्ञानस्थले पित्तदोषसत्त्वाच्छङ्खत्वप्रमानुत्पत्तिप्रसङ्गात् । विनिगमनाविरहादनन्तदोषाभावकारणत्वमपेक्ष्य गुणस्य कारणताया न्याय्यत्वात् । न च गुणसत्त्वेऽपि पित्तेन प्रतिबन्धाच्छङ्खे न श्वैत्य-ज्ञानमतः पित्तादिदोषाभावानां कारणत्वमवश्यं वाच्यं तथा च किं गुणस्य हेतुत्वकल्पनयेति वाच्यम्, तथाप्यन्वयव्यतिरेकाभ्यां गुण[1]-स्यापि हेतुत्वसिद्धेः । एवं भ्रमं प्रति गुणाभावः कारणमित्यस्यापि सुवचत्वम् । तत्र दोषाः के इत्याकाङ्क्षायामाह । पित्तेति । क्वचि-त्पीतादिभ्रमे पित्तं दोषः, क्वचिच्चन्द्रादेः स्वल्पपरिमाणभ्रमे दूरत्वं दोषः । क्वचिच्च वंशोरगभ्रमे मण्डूकवसाञ्जनमित्येवंरूपा दोषा अन-नुगता भ्रान्तिजनका इत्यर्थः ॥ १३१ ॥

अथ के गुणा इत्याकाङ्क्षायां प्रत्यक्षादौ क्रमशो गुणान्दर्शयति—

प्रत्यक्षे तु विशेष्येण विशेषणवता समम् ।
संनिकर्षो गुणस्तु स्यादथ त्वनुमितौ गुणः ॥ १३२ ॥
पक्षे साध्यविशिष्टे तु परामर्शो गुणो भवेत् ।
शक्ये सादृश्यबुद्धिस्तु भवेदुपमितौ गुणः ॥ १३३ ॥
शाब्दबोधे योग्यतायास्तात्पर्यस्याऽथवा प्रमा ।
गुणः स्याद्भ्रमभिन्नं तु ज्ञानमत्रोच्यते प्रमा ॥ १३४ ॥

प्रत्यक्षे त्विति । प्रत्यक्षे विशेषणवद्विशेष्यसन्निकर्षो गुणः । अनुमितौ साध्यवति साध्यव्याप्यवैशिष्ट्यज्ञानं गुणः । एवमग्रेऽपि[2] ज्ञेयम् । प्रमां निरूपयति । भ्रमभिन्नमिति ॥ १३२–१३४ ॥

ननु यत्र शुक्तिरजतयोरिमे रजते इति ज्ञानं जातं तत्र रजतां-

---

[1]—गुणस्यापीति । तथाच—पित्तादिदोषाभावसत्त्वेऽपि विशेषणवद्विशेष्यसन्निकर्षरूप-गुणाभावान्न शङ्खे पीतत्वप्रमेति दोषाभावेन न गुणस्यान्यथासिद्धिरिति भावः ।

[2]—एवमग्रेऽपि ज्ञेयमिति । उपमितौ शक्ये सादृश्यज्ञानम् । शाब्दबोधे योग्यतायाः तात्पर्यस्य वा प्रमैव गुण इति भावः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शेऽपि प्रमा न स्यात् तज्ज्ञानस्य भ्रमभिन्नत्वाभावादत आह—

अथ वा तत्प्रकारं यज्ज्ञानं तद्वद्विशेष्यकम् ।
तत्प्रमा न प्रमा नापि भ्रमः स्यान्निर्विकल्पकम् ॥१३५॥
प्रकारतादिशून्यं हि सम्बन्धानवगाहि तत् ।

तद्वद्विशेष्यकत्वे[1] सति तत्प्रकारकं ज्ञानं प्रमेत्यर्थः । अथैवं स्मृतेरपि प्रमात्वं स्यात् । ततः किमिति चेत्तथा सति तत्करणस्यापि प्रमाणान्तरत्वं स्यादिति चेन्न, यथार्थानुभवकरणस्यैव प्रमाणत्वेन विवक्षितत्वात् । इदं तु बोध्यम् । येन सम्बन्धेन यद्वत्ता तेन सम्बन्धेन तद्वद्विशेष्यकं तेन सम्बन्धेन तत्प्रकारकत्वं वाच्यम् । तेन कपालादौ संयोगादिना घटादिज्ञाने नातिव्याप्तिः । एवं सति निर्विकल्पकं प्रमा न स्यात्तस्य सप्रकारकत्वाभावादत आह । न प्रमेति । ननु वृक्षे कपिसंयोगज्ञानं भ्रमः प्रमा च स्यादिति चेन्न प्रतियोगिव्यधिकरणकपिसंयोगाभाववति संयोगज्ञानस्य भ्रमत्वात् । नच वृक्षे संयोगाभावावच्छेदेन संयोगज्ञानं भ्रमो न स्यातत्र संयोगाभावस्य प्रतियोगिसमानाधिकरणत्वादिति वाच्यम्, तत्र संयोगाभावावच्छेदेन संयोगज्ञानस्य भ्रमत्वाल्लक्ष्यस्याननुगमाल्लक्षणाननुगमेऽपि न क्षतिः ।

प्रमात्वं न स्वतो ग्राह्यं संशयानुपपत्तितः ॥ ११६ ॥

प्रमात्वमिति । मीमांसका[2] हि प्रमात्वं स्वतो ग्राह्यमिति वदन्ति । तत्र गुरूणां मते ज्ञानस्य स्वप्रकाशत्वात[3]ज्ज्ञानप्रामाण्यं तेनैव गृह्यत इति । भट्टानां मते ज्ञानमतीन्द्रियम् । ज्ञानजन्या ज्ञातता

१—नन्वेवं रङ्गरजतयोरिमे रजतरङ्गे इति ज्ञानेऽतिव्याप्तिरत आह—तद्वद्विशेष्यकत्वे सतीति । तद्वद्विशेष्यकत्वावच्छिन्नतत्प्रकारकत्वज्ञानमित्यर्थः ।

२—प्रामाण्यं न स्वतोग्राह्यमिति मूलेन स्वतोग्राह्यत्वं निषिध्यते तत्र स्वतस्त्ववादिनः के इत्याकाङ्क्षायामाह—मीमांसका हीति ।

३—स्वप्रकाशत्वादिति । स्वविषयकत्वादित्यर्थः । तेनैव गृह्यते इति । ज्ञाने गृह्यमाणे तन्निष्ठज्ञानत्वादिधर्मवत्तन्निष्ठप्रामाण्यस्यापि ग्रहे बाधकाभावः । भट्टानाम्=कुमारिलभट्टानाम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रत्यक्षा, तया[1] च ज्ञानमनुमीयते। मुरारिमिश्राणां मतेऽनुव्यवसायेन ज्ञानं गृह्यते। सर्वेषामपि मते तज्ज्ञानविषयकज्ञानेन तज्ज्ञानप्रामाण्यं गृह्यते। विषयनिरूप्यं हि ज्ञानम्। अतो ज्ञानवित्तिवेद्यो विषयः। तन्मतं दूषयति—न स्वतो ग्राह्यमिति। संशयेति। यदि ज्ञानस्य प्रामाण्यं स्वतोग्राह्यं स्यात्तदाऽनभ्यासदशोत्पन्नज्ञाने प्रामाण्यसंशयो न स्यात्, तत्र हि यदि ज्ञानं ज्ञातं तदा त्वन्मते प्रामाण्यं ज्ञातमेवेति कथं संशयः। तस्माज्ज्ञाने प्रामाण्यमनुमेयम्। तथाहि—इदं ज्ञानं प्रमा संवादिप्रवृत्तिजनकत्वात् यन्नैवं तन्नैवं यथाऽप्रमा। इदं पृथिवीत्वप्रकारकं ज्ञानं प्रमा गन्धवति पृथिवीत्वप्रकारकज्ञानत्वात्। एवमिदं जलत्वप्रकारकं ज्ञानं प्रमा स्नेहवति जलत्वप्रकारकज्ञानत्वात्। नच हेतुज्ञानं कथं जातमिति वाच्यम्, पृथिवीत्वप्रकारकत्वस्य स्वतोग्राह्यत्वात्। तत्र गन्धग्रहेण गन्धवद्विशेष्यकत्वस्यापि सुग्रहत्वात्। तत्प्रकारकत्वावच्छिन्नतद्विशेष्यकत्वं परं न गृह्यते संशयानुरोधात्।

नन्[2]तु सर्वेषां ज्ञानानां यथार्थत्वात्प्रमालक्षणे तद्वद्विशेष्यकत्वं विशेषणं व्यर्थम्, नच रङ्गे रजतार्थिनः प्रवृत्तिर्भ्रमजन्या[3] न स्यात् तव मते भ्रमस्याभावादिति वाच्यम्, तत्र हि दोषाधीनस्य पुरोवर्तिनि स्वतन्त्रोपस्थितरजतभेदाग्रहस्य हेतुत्वात्, सत्यरजतस्थले तु विशिष्टज्ञानस्य सत्त्वात्तदेव कारणम्। अस्तु वा

१—तया चेति। अयमत्रानुमानप्रकारः—इयं ज्ञातता घटत्ववद्विशेष्यकघटत्वप्रकारकज्ञानजन्या घटवृत्तिघटत्वप्रकारकज्ञाततात्वात्। या यद्वृत्तिर्यत्प्रकारिका ज्ञातता सा तद्विशेष्यकतत्प्रकारकज्ञानसाध्यां यथा पटे पटत्वप्रकारिका ज्ञाततेति।

२—प्रभाकरमतसिद्धमख्यातिवादं निराचिकीर्षुस्तन्मतेन शङ्कते—"ननु" इति।

३—भ्रमजन्येति। न्यायनये भ्रमजन्या प्रवृत्तिस्तव मते न स्यादित्यर्थः। भ्रमस्यान्यथाख्यातेः। तत्र रङ्गगोचरविसंवादिरजतार्थिप्रवृत्तौ। रजते इदं रजतमिति ज्ञानकाले रजतभेदाग्रहसत्त्वाद्विसंवादिप्रवृत्त्यापत्तिवारणाय दोषाधीनेत्युक्तम्। न्यायनये दोषाधीनो यो रजतभ्रमस्तत्स्थानाभिषिक्तरजतभेदाग्रहस्यैव तन्मते दोषाधीनतया रजते रजतभेदाग्रहस्य दोषाधीनत्वादिति भावः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तत्रापि भेदाग्रहः स एव कारणमिति, न चाऽन्यथाख्यातिः संभवति, रजतप्रत्यक्षकारणस्य रजतसन्निकर्षस्याभावात् रङ्गे रजतबुद्धेरनुपपत्तेरिति चेन्न, सत्यरजतस्थले प्रवृत्तिं प्रति विशिष्टज्ञानस्य हेतुतायाः क्लृप्तत्वादन्यत्रापि तत्कल्पनात् । नच संवादिप्रवृत्तौ तत्कारणं विसंवादिप्रवृत्तौ च भेदाग्रहः कारणमिति वाच्यम्, लाघवेन प्रवृत्तिमात्रे तस्य हेतुत्वकल्पनात् । इत्थं च रङ्गे रजतत्वविशिष्टबुद्ध्यनुरोधेन ज्ञानलक्षणप्रत्यासत्तिकल्पनेऽपि न क्षतिः, फलमुखगौरवस्यादोषत्वात् । किंच यत्र रङ्गरजतयोरिमे रजते रङ्गे वेति ज्ञानं जातं तत्र न कारणबाधोऽपि । अपि च यत्र रङ्गरजतयोरिमे रजतरङ्गे इति ज्ञानं तत्रोभयत्र युगपत्प्रवृत्तिनिवृत्ती स्याताम्, रङ्गे रङ्गभेदग्रहे रजते रजतभेदग्रहे चान्यथाख्यातिभयात् त्वन्मते दोषादेव रङ्गे रजतभेदाग्रहस्य रजते रङ्गभेदाग्रहस्य च सत्त्वात् । किंचानुमितिं प्रति भेदाग्रहस्य हेतुत्वे जलह्रदे वह्निव्याप्यधूमवद्भेदाग्रहादनुमितिर्निराबाधा । यदि च विशिष्टज्ञानं कारणं तदाऽयोगोलके वह्निव्याप्यधूमज्ञानमनुमित्यनुरोधादापतितम् । सेयमुभयतःपाशा रज्जुः । इत्थं चान्यथाख्यातौ प्रत्यक्षमेव प्रमाणं रङ्गं रजततयावेदिषमित्यनुभवादिति संक्षेपः ॥ १३५ ॥ १३६ ॥

पूर्वं व्याप्तिरुक्ता तद्ग्रहोपायस्तु न दर्शित इत्यतस्तं दर्शयति—

व्यभिचारस्याग्रहोऽपि सहचारग्रहस्तथा ।
हेतुर्व्याप्तिग्रहे तर्कः क्वचिच्छङ्कानिवर्तकः ॥ १३७ ॥

व्यभिचारस्येति । व्यभिचाराग्रहः सहचारग्रहश्च व्याप्तिग्रहे

१—लाघवेनेति । संवादिविसंवादिभेदेन कार्यकारणभावद्वयमपेक्ष्य प्रवृत्तिमात्रे विशिष्टज्ञानस्यैव हेतुत्वकल्पनाल्लाघवेनेत्यर्थः । तथाच लाघवज्ञानरूपानुकूलतर्कस्य सत्त्वान्नाप्रयोजकत्वमिति भावः ।

२—रजतांशेऽपि सन्निकर्षाभावान्नान्यथाख्यातिः संभवतीति प्रभाकरोक्तं दूषणमुद्धरति इत्थं चेति । भवन्मतेऽप्यन्यथाख्यातेर्बलादापतितत्वेनेत्यर्थः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कारणम् । व्यभिचारग्रहस्य व्याप्तिग्रहे प्रतिबन्धकत्वात्तदभावः कारणमित्यर्थः । एवमन्वयव्यतिरेकाभ्यां सहचारग्रहस्यापि हेतुता । भूयोदर्शनं तु न कारणं व्यभिचारास्फूर्तौ सकृद्दर्शनेऽपि क्वचिद्व्याप्तिग्रहात् । क्वचिद्व्यभिचारशङ्काविधूननद्वारा भूयोदर्शनमुपयुज्यते । यत्र तु भूयोदर्शनादपि शङ्का नापैति तत्र विपक्षबाधकतर्कोऽपेक्षितः । तथाहि । वह्निविरहिण्यपि धूमः स्यादिति यद्याशङ्का भवति तदा सा वह्निधूमयोः कार्यकारणभावस्य प्रतिसंधानान्निवर्तते । यद्ययं वह्निमान्न स्यात्तदा धूमवान्न स्यात्कारणं विना कार्यानुत्पत्तेः । यदि च कंचित्कारणं विना कार्यं भविष्यति तदाऽहेतुक एव भविष्यतीति तत्राप्याशङ्का भवेत्तदा सा व्याघातादपसारणीया । यदि कारणं विना कार्यं स्यात्तदा धूमार्थं वह्नेस्तृप्त्यर्थं भोजनस्य वा नियमत उपदानं तवैव न स्यादिति । यत्र स्वत एव शङ्का नावतरति तत्र न तर्कापेक्षापीति तदिदमुक्तं तर्कः क्वचिच्छङ्कानिवर्तक इति ॥१३७॥

इदानीं परकीयव्याप्तिग्रहप्रतिबन्धार्थमुपाधिं निरूपयति—

साध्यस्य व्यापको यस्तु हेतोरव्यापकस्तथा ।
स उपाधिर्भवेत्तस्य निष्कर्षोऽयं प्रदर्श्यते ॥ १३८ ॥

साध्यस्येति । साध्यत्वाभिमतव्यापकत्वे सति साधनत्वाभिमताव्यापकत्वमुपाधिरित्यर्थः । ननु स श्यामो मित्रातनयत्वादित्यत्र शाकपाकजन्यत्वं नोपाधिः स्यात्तस्य साध्यव्यापकत्वाभावाच्छ्यामत्वस्य घटादावपि सत्त्वात्, एवं वायुः प्रत्यक्षः प्रत्यक्षस्प-

१—स श्याम इति । काकः श्यामो मित्रातनयत्वादित्यादावित्यर्थः । तेन वक्ष्यमाणेन ध्वंसो विनाशी जन्यत्वादित्यनेन न पौनरुक्त्यम् । अस्य साधनावच्छिन्नसाध्यव्यापकत्वादग्रिमस्य साधनरूपपक्षधर्मावच्छिन्नसाध्यव्यापकत्वात् साध्यव्यापकत्वमुपपादयति—श्यामत्वस्येति । अत्रायमाशयः—“मित्रातनयत्वं” हेतुः काकात्मकपक्षे स्वरूपाऽसिद्धः, परन्तु श्यामत्वं धर्मः साध्यम्, तदभाववति अर्थात् मित्राया अष्टमे गौरे पुत्रे मित्रातनयत्वरूपहेतोः सत्त्वात् व्यभिचार्यपि । परमत्रैव हेतौ उपाधिविचारेण व्याप्यत्वासिद्धिरपि दोषः । भवद्दर्शितोपाधिलक्षणन्तु प्रकृते न घटते कोकिलघटादौ श्यामत्वस्य सत्त्वेऽपि शाकपाकजन्यत्वाभावादिति ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

र्शाश्रयत्वादित्यत्रोद्भूतरूपवत्त्वं नोपाधिः स्यात् प्रत्यक्षत्वस्यात्मादिषु सत्त्वात्तत्र च रूपाभावात्, एवं ध्वंसो विनाशी जन्यत्वादित्यत्र भावत्वं नोपाधिः स्याद्विनाशित्वस्य प्रागभावेऽपि सत्त्वात्तत्र च भावत्वाभावादिति चेन्न। यद्धर्मावच्छिन्नसाध्यव्यापकत्वं तद्धर्मावच्छिन्नसाधनाव्यापकत्वमित्यर्थे तात्पर्यात्। मित्रातनयत्वावच्छिन्नश्यामत्वस्य व्यापकं शाकपाकजत्वं तदवच्छिन्नसाधनाव्यापकं च। एवं पक्षधर्मवहिर्द्रव्यत्वावच्छिन्नप्रत्यक्षत्वस्य व्यापकमुद्भूतरूपवत्त्वम्। वहिर्द्रव्यत्वावच्छिन्नसाधनस्याव्यापकं च। एवं ध्वंसो विनाशी जन्यत्वादित्यत्र जन्यत्वावच्छिन्नसाध्यव्यापकं भावत्वम्। सद्धेतोस्तु एतादृशो धर्मो नास्ति यदवच्छिन्नस्य साध्यस्य व्यापकं तदवच्छिन्नस्य साधनस्य चाव्यापकं किंचित्स्यात्। व्यभिचारिणि तूपाध्यधिकरणं यत्साध्याधिकरणं यच्चोपाधिशून्यं साध्यव्यभिचाराधिकरणं तदन्यतरत्वावच्छिन्नस्य साध्यस्य व्यापकत्वं साधनस्य चाव्यापकत्वमुपाधेरन्ततः सम्भवतीति ॥ १३८ ॥

अत एव लक्ष्यमप्युपाधिस्वरूपमेतदनुसारेण दर्शयति—

सर्वे साध्यसमानाधिकरणाः स्युरुपाधयः।
हेतो रेकाश्रये येषां स्वसाध्यव्यभिचारिता ॥१३९॥

सर्वेति। स्वमुपाधिः स्वं च साध्यं च स्वसाध्ये तयोर्व्यभिचारितेत्यर्थः ॥ १३९ ॥

उपाधेर्दूषकताबीजमाह—

व्यभिचारस्यानुमानमुपाधेस्तु प्रयोजनम्।

व्यभिचारस्येति। उपाधिव्यभिचारेण हेतौ साध्यव्यभिचारानुमानमुपाधेः प्रयोजनमित्यर्थः। तथाहि। यत्र शुद्धसाध्यव्या-

---

१—व्यभिचारिणित्विति। वायुः प्रत्यक्षो द्रव्यत्वादित्यादौ प्रत्यक्षत्वरूपसाध्याधिकरणत्वमात्मा, उद्भूतरूपात्मकोपाधिशून्यं साध्यव्यभिचाराधिकरणं गगनं, तदन्यतरत्वावच्छिन्नसाध्यव्यापकत्वस्योद्भूतरूपेऽभावादुक्तमुपाध्यधिकरणमिति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पक्ष उपाधिस्तत्र शुद्धेनैव उपाधिव्यभिचारेण साध्यव्यभिचारानुमानम्। यथा धूमवान् वह्नेरित्यादौ वह्निर्धूमव्यभिचारी तद्व्यापकार्द्रेन्धनसंयोगव्यभिचारित्वादिति। व्यापकव्यभिचारिणो व्याप्यव्यभिचारावश्यकत्वात्। यत्र तु किंचिद्धर्मावच्छिन्नसाध्यव्यापक उपाधिस्तत्र तद्धर्मवति उपाधिव्यभिचारेण साध्यव्यभिचारानुमानम्। यथा स श्यामो मित्रातनयत्वादित्यादौ मित्रातनयत्वं श्यामत्वव्यभिचारि, मित्रातनये शाकपाकजत्वव्यभिचारित्वादिति। बाधानुन्नीतपक्षेतरस्तु साध्यव्यापकताग्राहकप्रमाणाभावात्स्वव्याघातकत्वाच्च[1] नोपाधिः। बाधोन्नीतस्तूपाधिर्भवत्येव[2]। यथा वह्निरनुष्णः कृतकत्वादित्यादौ प्रत्यक्षेण वह्नावुष्णत्वग्रहे वह्नीतरत्वमुपाधिः। यत्र तूपाधेः साध्यव्यापकता संदिह्यते स संदिग्धोपाधिः। पक्षेतरस्तु संदिग्धोपाधिरपि[3] नोद्भावनीयः कथकसंप्रदायानुरोधात्। केचित्तु सत्प्रतिपक्षोत्थापनमुपाधिफलम्। तथाहि। अयोगोलकं धूमवद्वह्नेरित्यादावयोगोलकं धूमाभाववदार्द्रेन्धनाभावादिति सत्प्रतिपक्षसम्भवात्। इत्थं च[4] साधनव्यापकोऽपि क्वचिदुपाधिः। यथा करका पृथिवी कठिनसंयोगवत्त्वादित्यादावनुष्णाशीतस्पर्शवत्त्वम्। न चात्र स्वरूपासिद्धिरेव दूषणमिति वाच्यम्, सर्वत्रोपाधेर्दूषणान्तरसाङ्कर्यात्। अत्र च साध्यव्यापकः पक्षावृत्तिरुपाधिरित्याहुः।

शब्दोपमानयोर्नैव पृथक्प्रामाण्यमिष्यते ॥१४०॥
अनुमानगतार्थत्वादिति वैशेषिकं मतम्।

१—स्वव्याघातकत्वाच्चेति। उपाधिमात्रस्य दूषकत्वव्याघातकत्वादित्यर्थः। पक्षेतरस्योपाधित्वे सर्वत्रानुमाने पक्षेतरत्वस्योपाधेः सम्भवादनुमानमात्रोच्छेदापत्त्या व्यभिचारानुमानाधीनस्योपाधेर्दूषकत्वस्यासम्भवादिति भावः।

२—बाधोन्नीतस्त्विति। बाधेन पक्षे साध्यवत्तया उन्नीतः साध्यव्यापकत्वेन निश्चित इत्यर्थः।

३—संदिग्धोपाधिरपीति। पक्षे साध्यसंदेहेन साध्यव्यापकतासंदेहस्य पक्षेतरत्वे संभवादिति भावः।

४—इत्थं चेति। सत्प्रतिपक्षोत्थापकतया दूषकत्वे चेत्यर्थः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तन्न सम्यग्विना व्याप्तिबोधं शब्दादिबोधतः ॥१४१॥

शब्दोपमानयोरिति। वैशेषिकाणां मते प्रत्यक्षमनुमानं च प्रमाणम्। शब्दोपमानयोस्त्वनुमानविधयैव प्रामाण्यम्। तथा हि दण्डेन गामानयेत्यादिलौकिकपदानि यजेतेत्यादिवैदिकपदानि वा तात्पर्यविषयस्मारितपदार्थसंसर्गप्रमापूर्वकाणि आकाङ्क्षादिमत्पदकदम्बत्वाद् घटमानयेति पदकदम्बवत्। यद्वा—एते पदार्था मिथःसंसर्गवन्तो योग्यतादिमत्पदोपस्थापितत्वात् तादृशपदार्थवत्। दृष्टान्तेऽपि दृष्टान्तान्तरेण साध्यसिद्धिरिति। एवं गवयव्यक्तिप्रत्यक्षानन्तरं गवयपदं गवयत्वप्रवृत्तिनिमित्तकम्, असति वृत्त्यन्तरे वृद्धैस्तत्र प्रयुज्यमानत्वात्। असति च वृत्त्यन्तरे वृद्धैर्यत्र यत्प्रयुज्यते तत्र तत्तत्प्रवृत्तिनिमित्तकम्। यथा गोपदं गोत्वप्रवृत्तिनिमित्तकम्। यद्वा गवयपदं सप्रवृत्तिनिमित्तकं साधुपदत्वादित्यनुमानेन पक्षधर्मताबलाद्गवयत्वप्रवृत्तिनिमित्तकत्वं सिद्ध्यति। तन्मतं दूषयति। तन्न सम्यगिति। व्याप्तिज्ञानं विनापि शाब्दबोधस्यानुभवसिद्धत्वात्। नहि सर्वत्र शब्दश्रवणानन्तरं व्याप्तिज्ञाने प्रमाणमस्तीति। किंच सर्वत्र शाब्दस्थले यदि व्याप्तिज्ञानं कल्प्यते तदा सर्वत्रानुमितिस्थले पदज्ञानं कल्पयित्वा शाब्दबोध एव किं न स्वीक्रियतामिति ध्येयम्॥ १४० ॥ १४१ ॥

त्रैविध्यमनुमानस्य केवलान्वयिभेदतः।
द्वैविध्यं तु भवेद्व्याप्तेरन्वयव्यतिरेकतः ॥१४२॥
अन्वयव्याप्तिरुक्तैव व्यतिरेकादथोच्यते।

त्रैविध्यमिति। अनुमानं हि त्रिविधं केवलान्वयिकेवलव्यतिरेक्यन्वयव्यतिरेकिभेदात्। तत्रासद्विपक्षः केवलान्वयी। यथा घटोऽभिधेयः प्रमेयत्वादित्यादौ। तत्र हि सर्वस्यैवाभिधेयत्वाद्विपक्षासत्त्वम्। असत्सपक्षः केवलव्यतिरेकी। यथा पृथिवी इतरेभ्यो भिद्यते गन्ध-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वत्त्वादित्यादौ । तत्र हि जलादित्रयोदशभेदस्य पूर्वमनिश्चितया निश्चितसाध्यवतः सपक्षस्याभावात् । सत्सपक्षविपक्षोऽन्वयव्यतिरेकी । यथा वह्निमान्धूमादित्यादौ । तत्र सपक्षस्य महानसादेर्विपक्षस्य जलह्रदादेश्च सत्त्वादिति ।

तत्र हि व्यतिरेकिणि व्यतिरेकव्याप्तिज्ञानं कारणं तदर्थं व्यतिरेकव्याप्तिं निर्वक्ति—

साध्याभावव्यापकत्वं हेत्वभावस्य यद्भवेत् ॥१४३॥

साध्याभावेति । साध्याभावव्यापकीभूताभावप्रतियोगित्वमित्यर्थः । अत्रेदं बोध्यम् । यत्सम्बन्धेन यदवच्छिन्नं प्रति येन सम्बन्धेन येन रूपेण व्यापकता गृह्यते तत्सम्बन्धावच्छिन्नप्रतियोगिताकतद्धर्मावच्छिन्नाभाववत्ताज्ञानात्तत्सम्बन्धावच्छिन्नप्रतियोगिताकतद्धर्मावच्छिन्नाभावस्य सिद्धिरिति । इत्थं च यत्र विशेषणतादिसम्बन्धेनेतरत्वव्यापकत्वं गन्धाभावे गृह्यते तत्र गन्धाभावाभावेनेतरत्वात्यन्ताभावः सिध्यति । यत्र तु तादात्म्यसम्बन्धेनेतरव्यापकत्वं गन्धाभावस्य गृह्यते तत्र तादात्म्यसम्बन्धेनेतरस्याभावः सिध्यति । स एवान्योन्याभावः । एवं यत्र संयोगासम्बन्धेन धूमं प्रति संयोगसम्बन्धेन वह्नेर्व्यापकता गृह्यते तत्र संयोगसम्बन्धावच्छिन्नप्रतियोगिताकवह्न्यभावेन जलह्रदे संयोगसम्बन्धावच्छिन्नप्रतियोगिताकधूमाभावः सिध्यति । अत्र च व्यतिरेकव्याप्तिग्रहे व्यतिरेकसहचारज्ञानं कारणम् । केचित्तु व्यतिरेकसहचारेणान्वयव्याप्तिरेव गृह्यते नतु व्यतिरेकव्याप्तिज्ञानं कारणम् । यत्र व्यतिरेकसहचाराद्व्याप्तिग्रहस्तत्र व्यतिरेकीत्युच्यते । साध्यप्रसिद्धिस्तु घटादावेव ज्ञायतां पश्चात्पृथिवीत्वावच्छेदेन साध्यत इति वदन्ति ॥ १४२ ॥ १४३ ॥

अर्थापत्तिस्तु नैवेह प्रमाणान्तरमिष्यते ।

व्यतिरेकव्याप्तिबुद्ध्या चरितार्था हि सा यतः ॥१४४॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अर्थापत्तिरिति । अर्थापत्तिः प्रमाणान्तरमिति केचन मन्यन्ते। तथाहि। यत्र देवदत्तस्य शतवर्षजीवित्वं ज्योतिःशास्त्रादवगतं जीविनो गृहासत्त्वं च प्रत्यक्षादवगतं तत्र शतवर्षजीविनो गृहासत्त्वं बहिःसत्वं विनाऽनुपपन्नमिति बहिःसत्त्वं कल्प्यत इति । तदनुमानेन गतार्थत्वान्नेष्यते। तथाहि। यत्र जीवित्वस्य बहिःसत्त्वगृहासत्त्वान्यतरव्याप्यत्वं गृहीतं तत्रान्यतरसिद्धौ जायमानायां गृहसत्त्वबाधाद्बहिःसत्त्वमनुमितौ *भासते । एवं पीनो देवदत्तो दिवा न भुङ्क्ते इत्यादौ पीनत्वस्य भोजनव्याप्यत्वावगमाद्भोजनसिद्धौ दिवाभोजनबाधे रात्रिभोजनं सिध्यतीति । अभावप्रत्यक्षस्यानुभविकत्वादनुपलम्भोऽपि न प्रमाणान्तरम् । किंचानुपलम्भस्याज्ञातस्य हेतुत्वे ज्ञानाकरणकत्वात्प्रत्यक्षत्वम्। ज्ञातस्य हेतुत्वे तु तत्राप्यनुपलम्भान्तरापेक्षेत्यनवस्था। एवं चेष्टापि न प्रमाणान्तरं तस्याः सङ्केतग्राहकशब्दस्मारकत्वेन लिप्यादिसमशीलत्वाच्छब्द एवान्तर्भावात् । यत्र च व्याप्त्यादिग्रहस्तत्रानुमितिरेवेति ॥ १४४ ॥

सुखं निरूपयति—

सुखं तु जगतामेव काम्यं धर्मेण जायते ।

सुखं त्विति । काम्यमभिलाषविषयः। धर्मेणेति । धर्मत्वेन[1] सुखत्वेन कार्यकारणभाव इत्यर्थः ।

दुःखं निरूपयति—

अधर्मजन्यं दुःखं स्यात्प्रतिकूलं सचेतसाम् ॥१४५॥

---

*"भासते" इति—"जीविनो जीवित्वं गृहसत्त्वबहिःसत्त्वाऽन्यतरव्याप्यम्" इत्याकारकज्ञानोत्तरं गृहसत्त्वे बाधात् बहिःसत्त्वमनुमितौ भासत इत्यर्थः । अनुमितिप्रकारश्च—"देवदत्तो बहिःसत्त्ववान् गृहाऽसत्त्वे सति शतवर्षजीवित्वात् यन्नैवं तन्नैवम्" इति । अथवा—"जीवित्वे सति गृहाभावदर्शनात्" इति हेतुः ।

१—धर्मत्वेनेति । इदं च प्राचां मतेनोक्तम् । नवीनमते तु "नित्यं विज्ञानमानन्दं ब्रह्म" इति श्रुत्या भगवति नित्यसुखसिद्धौ धर्मस्य कार्यतावच्छेदकं जन्यसुखत्वं सुखत्वावान्तरजातिर्वेति बोध्यमिति दिनकरी । पुरुषार्थः सम्भवतीति—सुखं दुःखाभावश्च पुरुषार्थः सम्भवतीत्यर्थः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अधर्मेति । अधर्मत्वेन दुःखत्वे न कार्यकारणभाव इत्यर्थः । प्रतिकूलमिति । दुःखत्वज्ञानादेवं सर्वेषां स्वाभाविकद्वेषविषय इत्यर्थः ॥ १४५ ॥

इच्छां निरूपयति—

निर्दुःखत्वे सुखे चेच्छा तज्ज्ञानादेव जायते ।
इच्छा तु तदुपाये स्यादिष्टोपायत्वधीर्यदि ॥ १४६ ॥

निर्दुःखत्वे इति । इच्छा द्विविधा फलविषयिणी उपायविषयिणी च । फलं तु सुखं दुःखाभावश्च । तत्र फलेच्छां प्रति फलज्ञानं कारणम् । अतएव पुरुषार्थः सम्भवति । यज्ज्ञातं सत्स्ववृत्तितयेष्यते स पुरुषार्थ इति तल्लक्षणात् । इतरेच्छानधीनेच्छाविषयत्वं फलितोऽर्थः । उपायेच्छां प्रतीष्टसाधनताज्ञानं कारणम् ॥ १४६ ॥

चिकीर्षा कृतिसाध्यत्वप्रकारेच्छा च या भवेत् ।
तद्धेतुः कृतिसाध्येष्टसाधनत्वमतिर्भवेत् ॥ १४७ ॥

चिकीर्षेति । [1]कृतिसाध्यत्वप्रकारिका कृतिसाध्यक्रियाविषयिणीच्छा चिकीर्षा । पाकं कृत्या साधयामीति तदनुभावात् । चिकीर्षां प्रति कृतिसाध्यताज्ञानमिष्टसाधनताज्ञानं* च कारणम् । तद्धेतुरिति । अत एव वृष्ट्यादौ कृतिसाध्यताज्ञानाभावान्न चिकीर्षा ॥ १४७ ॥

बलवद्द्विष्टहेतुत्वमतिः स्यात्प्रतिबन्धिका ।

बलवदिति । †बलवद्द्विष्टसाधनताज्ञानं प्रतिबन्धकम् । अतो मधुविषसंपृक्तान्नभोजने न चिकीर्षा । बलवद्द्वेषः प्रतिबन्धक इत्यन्ये ।

तदहेतुत्वबुद्धेस्तु हेतुत्वं कस्यचिन्मते ॥ १४८ ॥

१—"दुःखत्वावच्छिन्नं प्रति अधर्मत्वावच्छिन्नं कारणम्" इति कार्यकारणभाव इत्यर्थः ।

२—"पाको मत्कृतिसाध्यो भवतु" इत्यादिरूपा ।

*—अन्यथा निष्फलत्वज्ञानेऽपि चैत्यवन्दनादौ चिकीर्षापत्तिरिति भावः ।

†—द्विष्टं द्वेषविषयीभूतम् । द्वेषश्च दुःखे ताद्रूप्येण ज्ञानात् । सर्पादौ तत्साधनताज्ञानात् । द्वेषे बलवत्त्वं जातिविशेषः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तद्धेतुत्वेति। बलवदनिष्टाजनकत्वज्ञानं कारणमित्यर्थः १४८

द्वेषं निरूपयति—

द्विष्टसाधनताबुद्धिर्भवेद्द्वेषस्य कारणम्।

द्विष्टसाधनतेति। दुःखोपायविषयकं द्वेषं प्रति बलवद्द्विष्टसाधनताज्ञानं कारणमित्यर्थः। बलवदिष्टसाधनताज्ञानं प्रतिबन्धकम्। तेन नान्तरीयकदुःखजनके[1] पाकादौ न द्वेषः।

प्रयत्नं निरूपयति—

प्रवृत्तिश्च निवृत्तिश्च तथा जीवनकारणम्॥ १४९॥

एवं प्रयत्नत्रैविध्यं तान्त्रिकैः परिकीर्तितम्।

प्रवृत्तिश्चेति। प्रवृत्तिनिवृत्तिजीवनयोनियत्नभेदात्प्रयत्नस्त्रिविध इत्यर्थः।

***चिकीर्षा कृतिसाध्येष्टसाधनत्वमतिस्तथा॥ १५०॥**

उपादानस्य चाध्यक्षं प्रवृत्तौ जनकं भवेत्।

चिकीर्षेत्यादि। मधुविषसंपृक्तान्नभोजनादौ बलवदनिष्टानुबन्धित्वेन चिकीर्षाभावान्न प्रवृत्तिरिति भावः। कृतिसाध्यताज्ञानादिवद्बलवदनिष्टाननुबन्धित्वज्ञानमपि स्वतन्त्रान्वयव्यतिरेकाभ्यां प्रवृत्तौ कारणमित्यपि वदन्ति। कार्यताज्ञानं[2] प्रवर्तकमिति गुरवः। तथाहि। ज्ञानस्य प्रवृत्तौ जननीयायां चिकीर्षातिरिक्तं नापेक्षितमस्ति। सा च कृतिसाध्यताज्ञानसाध्या, इच्छायाः स्वप्रकारप्रकारकधीसाध्यत्वनियमात्[3]। चिकीर्षा हि कृतिसाध्यत्वप्रकारिकेच्छा।

१—नान्तरीयकदुःखजनके—अवान्तरदुःखहेतौ।

*—"पाकं कृत्या साधयामि" इत्याकारा चिकीर्षा, "इदं मत्कृतिसाध्यम्" इति कृतिसाध्यत्वप्रकारकज्ञानम्, "इदं ममेष्ट साधनम्" इत्याकारकञ्च ज्ञानं चिकीर्षायां निमित्तकारणमित्यर्थः।

२—प्रभाकरमतमाह—"कार्यताज्ञानम्" इति।

३—स्वमिच्छा।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तत्र कृतिसाध्यत्वप्रकारस्तत्प्रकारकज्ञानं चिकीर्षायां तद्द्वारा च प्रवृत्तौ हेतुर्नत्विष्टसाधनताज्ञानं तत्र हेतुः। कृत्यसाध्येऽपि चन्द्रमण्डलानयनादौ प्रवृत्त्यापत्तेः। ननु कृत्यसाध्यताज्ञानं प्रतिबन्धकमिति चेन्न, तदभावापेक्षया कृतिसाध्यताज्ञानस्य लघुत्वात्। नचद्वयोरपि हेतुत्वं, गौरवात्। ननु त्वन्मतेऽपि मधुविषसम्पृक्तान्नभोजने चैत्यवन्दने च प्रवृत्त्यापत्तिः कार्यताज्ञानस्य सत्त्वादिति चेन्न, स्वविशेषणवत्ताप्रतिसंधानजन्यकार्यताज्ञानस्य प्रवर्तकत्वात्। काम्ये हि यागपाकादौ कामना स्वविशेषणम्। ततश्च बलवदनिष्टाननुबन्धिकाम्यसाधनताज्ञानेन कार्यताज्ञानम्। ततश्च प्रवृत्तिः। तृप्तश्च भोजने न प्रवर्तते तदानीं कामनायाः पुरुषविशेषणत्वाभावात्। नित्ये च शौचादिकं पुरुषविशेषणम्। तेन शौचादिज्ञानाधीनकृतिसाध्यताज्ञानात्तत्र प्रवृतिः। ननु तदपेक्षया लाघवेन बलवदनिष्टाननुबन्धीष्टसाधनताविषयककार्यताज्ञानत्वेनैव हेतुत्वमस्तु। बलवदनिष्टाननुबन्धित्वं चेष्टोत्पत्तिनान्तरीयकदुःखाधिकदुःखाजनकत्वम्, बलवद्द्वेषविषयदुःखाजनकत्वं वेति चेन्न, इष्टसाधनत्वकृतिसाध्यत्वयोर्युगपज्ज्ञातुमशक्यत्वात्साध्यत्वसाधनत्वयोर्विरोधात्। असिद्धस्य हि साध्यत्वं सिद्धस्य च साधनत्वम्। नचैकमेकेनैकदा सिद्धमसिद्धं चेति ज्ञायते, तस्मात्कालभेदादुभयं ज्ञायत इति। मैवम्, लाघवेन बलवदनिष्टाननुबन्धीष्टसाधनत्वे सति कृतिसाध्यताज्ञानस्य हेतुत्वात्। न च साध्यत्वसाधनत्वयोर्विरोधो यदाकदाचित्साध्यत्वसाधनत्वयोरविरोधात्। एकदा

१—स्वविशेषणेति—स्वं = प्रवर्त्तमानः पुरुषः, तद्विशेषणं काम्ये यागादौ कामना, नित्ये संध्यावन्दनादौ कालशौचादि, तद्वत्ता पक्षे तत्सम्बन्धः, तस्य प्रातिसन्धानं ज्ञानमित्यर्थः। तस्य कार्यताज्ञानहेतुतालिङ्गज्ञानविधया। तथाहि—"पाको मत्कृतिसाध्यः मत्कृतिं विनाऽसत्त्वे सति मदिष्टसाधनत्वादित्यनुमानम्। नित्यस्थले 'तु—"अहमिदानीन्तनकृतिसाध्यसन्ध्यावन्दनको ब्राह्मणत्वे सति विहितसन्ध्याकालिकशौचादिमत्त्वात्" इत्यनुमानजन्यकार्यताज्ञानं प्रवृत्तिकारणमिति बोध्यम्।

२—एकदेति। इदं च ज्ञानान्वयि ज्ञानाद् ज्ञानसम्भवात्। मूलाद्यनवगाहिनोऽपि वृद्धः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सानत्वसाधनत्वयोश्चाज्ञानात् । नव्यास्तु-ममेदं कृतिसाध्यमिति ज्ञानं न प्रवर्तकमनागते *तस्य ज्ञातुमशक्यत्वात् । किन्तु यादृशस्य† पुंसः कृतिसाध्यं यद्दृष्टं तादृशत्वं स्वस्य प्रतिसंधाय तत्र प्रवर्तते । तेनोदनकामस्य तत्साधनताज्ञानवतस्तदुपकरणवतः पाकः कृतिसाध्यस्तादृशश्चाहमिति प्रतिसंधाय पाके प्रवर्तत इत्याहुः तन्न । स्वकल्पितलिप्यादिप्रवृत्तौ यौवने कामोद्भेदादिना सम्भोगादौ च तदभावात् । इदं तु बोध्यम्—इदानींतनेष्टसाधनत्वादिज्ञानं प्रवर्तकं तेन भावियौवराज्ये बालस्य न प्रवृत्तिस्तदानीं कृतिसाध्यत्वाज्ञानात् । एवं तृप्तश्च भोजने न प्रवर्तते तदानीमिष्टसाधनत्वाज्ञानात् । प्रवर्तते च रोगदूषितचित्तो विषादिभक्षणे तदानीं बलवदनिष्टानुबन्धित्वाज्ञानात् । न चास्तिकस्यागम्यागमनशत्रुवधादिप्रवृत्तौ कथं बलवदनिष्टाननुबन्धित्वबुद्धिर्नरकसाधनत्वज्ञानादिति वाच्यम्, उत्कटरागादिना नरकसाधनताधीतिरोधानात् । वृष्ट्यादौ तु कृतिसाध्यताज्ञानाभावान्न चिकीर्षाप्रवृत्ती, किंत्विष्टसाधनताज्ञानादिच्छामात्रम् । कृतिश्च प्रवृत्तिरूपा बोध्या । तेन जीवनयोनियत्नसाध्ये प्राणपञ्चकसञ्चारे न प्रवृत्तिः । इत्थं च प्रवर्तकत्वानुरोधाद्विधेरपीष्टसाधनत्वादिकमेवार्थः । इत्थं च विश्वजिता यजेतेत्यादौ यत्र फलं न श्रूयते तत्रापि स्वर्गः फलं कल्प्यते । नन्वहरहः सन्ध्यामुपासीतेत्यादाविष्टानुत्पत्तेः प्रवृत्तिः कथम् ? । न चार्थवादिकं ब्रह्मलोकादि प्रत्यवायाभावो वा फलमिति वाच्यम्, तथासति काम्यत्वे नित्यत्वहान्यापत्तेः, कामनाभावे चाकरणापत्तेः । इत्थं च यत्र फलश्रुति-

---

संयोगीतिज्ञानस्यानुभाविकतया अव्याप्यवृत्तेर्ज्ञानं स्वावच्छेदकविषयकमेवेति नियमे मानाभावान्न पूर्वोक्तदोष इति ध्येयम् ।

*—अनागते=भविष्यत्पाके । तस्य=निरुक्तकृतिसाध्यत्वस्य । क्वचित् "अनागतेष्टस्य" इति पाठान्तरम् ।

†यादृशस्य = ओदनादिकामनावतः । कृतिसाध्यम् = ओदनपाकादि । तादृशश्चाहम् = "अहं यज्ञदत्तः देवदत्तवदोदनकामः" इति प्रतिसन्धाय = निश्चित्य ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

स्तत्रार्थवादमात्रमिति चेन्न । ग्रहणश्राद्धादौ नित्यत्वनैमित्तिकत्व-योरिव नित्यत्वकाम्यत्वयोरप्यविरोधात् । नच कामनाभावेऽकरणा-तापत्तिः, त्रिकालस्तवपाठादाविव कामनासद्भावस्यैव कल्पनात्, नतु वेदबोधितकार्यताज्ञानात्प्रवृत्तिरिति सम्भवति, स्वेष्टसाधनत्वम-विज्ञाय तादृशकार्यताज्ञानसहस्रेणापि प्रवृत्तेरसम्भवात् । यद्यपि पण्डापूर्वं फलमिति तदपि न कामनाभावेऽकरणापत्तेस्तौल्यात् । कामनाकल्पने त्वार्थवादिकफलमेव रात्रिसत्रन्यायात्कल्प्यताम्, अन्यथा प्रवृत्त्यनुपपत्तेः । तेनानुत्पत्तिं प्रत्यवायस्यान्ये मन्यन्ते ।

एवम्—

सन्ध्यामुपासते ये तु सततं शंसितव्रताः ।
विधूतपापास्ते यान्ति ब्रह्मलोकमनामयम् ॥

एवम्—

दद्यादहरहः श्राद्धं पितृभ्यः प्रीतिमावहन् ।

इति प्रीत्यात्मकमेव फलमस्तु । नच पितृप्रीतिः कथं फलं व्यधिकरणत्वादिति वाच्यम्, गयाश्राद्धादाविवोद्देश्यत्वसम्बन्धेनैव फलजनकत्वस्य क्वचित्कल्पनात् । अत एवोक्तं शास्त्रदर्शितफलमनु-ष्ठानकर्तरीत्युत्सर्ग इति । पितॄणां मुक्तत्वे तु स्वस्य स्वर्गादिफलं यावन्नित्यनैमित्तिकानुष्ठानस्य सामान्यतः स्वर्गजनकत्वात् । पैण्डा-पूर्वार्थं प्रवृत्तिश्च न संभवति नहि तत्सुखदुःखाभाववत्स्वतः पुरुषार्थो नवा तत्साधनम्, प्रत्यवायानुत्पत्तौ कथं प्रवृत्तिरिति चेत् ? इत्थम्—यथा हि नित्ये कृते प्रत्यवायाभावस्तिष्ठति तदभावे तदभावः । एवं प्रत्यवायाभावसत्त्वे दुःखप्रागभावसत्त्वं तदभावे तदभाव इति योग-क्षेमसाधारणकारणताया दुःखप्रागभावं प्रत्यपि सुवचत्वात् । एवमेव

१—रात्रिसत्रन्यायादिति । तथाहि रात्रिसत्रवाच्यानां ज्योतिर्गौरित्यादिवाक्योत्पन्नकर्मणां फलजिज्ञासायामत्यन्ताश्रुतस्वर्गादिकल्पने गौरवाद्विश्वजिन्न्यायापवादेन "प्रतितिष्ठन्तीह वा एता रात्रीरुपयन्ति" इत्यर्थवादश्रुतौ प्रतिष्ठैव फलमिति सिद्धान्तितं तथात्राप्यार्थवादिकब्रह्मलोक एव फलं लाघवादित्यर्थः । २—फलविशेषाजनकाऽपूर्वार्थम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रायश्चित्तस्यापि दुःखप्रागभावहेतुत्वमिति । ननु--न कलञ्जं भक्षये-दित्यत्र विध्यर्थे [1]कथं नञर्थान्वयः, इष्टसाधनत्वाभावस्य कृतिसाध्य-त्वाभावस्य च बोधयितुमशक्यत्वादिति चेन्न, तत्र बाधादिष्टसाधनत्वं कृतिसाध्यत्वं च न विध्यर्थः, किंतु बलवदनिष्टाननुबन्धित्वमात्रं तदभावश्च नञा बोध्यते । अथवा—बलवदनिष्टाननुबन्धित्वविशिष्टेष्ट-साधनत्वे सति कृतिसाध्यत्वं विध्यर्थः । *तदभावश्च नञा बोध्यमानो विशिष्टाभावो विशेष्यवति विशेषणाभावे विश्राम्यति । ननु श्येनेना-भिचरन् यजेतेत्यादौ कथं बलवदनिष्टाननुबन्धित्वमर्थः श्येनस्य मरणानुकूलव्यापारस्य हिंसात्वेन नरकसाधनत्वात्, नच वैधत्वान्न निषेध इति वाच्यम्, अभिचारे प्रायश्चित्तोपदेशात्, नच मरणानु-कूलव्यापारमात्रं यदि हिंसा तदा खड्गकारस्य कूपकर्तुश्च हिंसकत्वा-पत्तिर्गललग्नान्नभक्षणजन्यमरणे स्वात्मवधत्वापत्तिश्चेति वाच्यम्, मर-णोद्देश्यकत्वस्यापि विशेषणत्वात् । अन्योद्देश्यकक्षिप्तनाराचहतब्राह्म-णस्य तु वाचनिकं प्रायश्चित्तमिति चेन्न, श्येनवारणायादृष्टाद्वारकत्वेन विशेषणात् । अत एव- काशीमरणार्थं कृतशिवपूजादेरपि न हिंसात्वम् । नच साक्षान्मरणजनकस्यैव हि हिंसात्वं श्येनस्तु न तथा किंतु तज्जन्यापूर्वमिति वाच्यम्, खड्गाघातेन ब्राह्मणे व्रणपाकपरम्परया मृते हिंसात्वानापत्तेः । केचित्तु श्येनस्य हिंसा फलं नतु मरणम् । तेन श्येनजन्यखड्गघातादिरूपा हिंसाऽभिचारपदार्थः । तस्य च पापजन-कत्वम् । अतः श्येनस्य वैधत्वात्पापाजनकत्वेऽपि आग्रिमपापं प्रतिसं-धाय सन्तो न प्रवर्तन्त इत्याहुः । *[2]आचार्यास्तु आप्ताभिप्रायो विध्यर्थः । पाकं कुर्या इत्यादावाज्ञादिरूपेच्छावाचित्ववल्लिङ्मात्रस्ये-च्छावाचित्वं लाघवात् । एवंच स्वर्गकामो यजेतेत्यादौ यागः

१—विध्यर्थे कथमिति । विध्यर्थनञर्थयोः कथमन्वयः विध्यर्थेष्टसाधनत्वाद्यन्वितनञर्थ-स्याभावस्य कलञ्जभक्षणे कथमन्वय इत्यर्थः ।

*—अत्रत्यं मर्म मत्कृतमुक्तावलीप्रभायां सविस्तरं द्रष्टव्यम् ।

२—उदयनाचार्या इत्यर्थः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

स्वर्गकामकृतिसाध्यतया आप्तेष्ट इत्यर्थः। ततश्चाप्तेष्टत्वेनेष्टसाधनत्वादिकमनुमाय प्रवर्तते। कलञ्जभक्षणे तदभावान्न प्रवर्तते। यस्तु वेदे पौरुषेयत्वं नाभ्युपैति तं प्रति विधिरेव तावद्गर्भे इव श्रुतिकुमार्याः पुंयोगे मानम्। नच कर्त्रस्मरणं बाधकं कपिलकणादादिभिरद्यपर्यन्तं कर्तृस्मरणस्यैव प्रतीयमानत्वात्। अन्यथा स्मृतीनामप्यकर्तृकत्वापत्तेः तत्रैव कर्तृस्मरणमस्तीति चेद्वेदेऽपि "छन्दांसि जज्ञिरे तस्मात्" (यजु०) इत्यादिकर्तृस्मरणमस्त्येव। एवं "प्रतिमन्वन्तरं चैषा श्रुतिरन्या विधीयते" इत्यपि द्रष्टव्यम्।

स्वयंभूरेष भगवान्वेदो गीतस्त्वया पुरा।
शिवाद्या ऋषिपर्यन्ताः स्मर्तारोऽस्य न कारकाः॥

इति तु वेदस्य स्तुतिमात्रम्। नच पौरुषेयत्वेन भ्रमादिसम्भवादप्रामाण्यं स्यादिति वाच्यम्, नित्यसर्वज्ञत्वेन निर्दोषत्वात्। अत एव पुरुषान्तरस्य भ्रमादिसंभवान्न कपिलादेरपि कर्तृत्वं वेदस्य। किंच वर्णानामेवानित्यत्वस्य वक्ष्यमाणत्वात्सुतरां तत्संदर्भस्य वेदस्यानित्यत्वमिति संक्षेपः। उपादानस्येति। उपादानस्य समवायिकारणस्याध्यक्षं प्रत्यक्षं प्रवृत्तौ कारणमिति।

निवृत्तिस्तु भवेद्द्वेषाद् द्विष्टसाधनताधियः॥ १५१॥

निवृत्तिरिति। द्विष्टसाधनताज्ञानस्य निवृत्तिं प्रति जनकत्वमन्वयव्यतिरेकाभ्यामवधारितमिति भावः॥ १४६-१५१॥

यत्नो जीवनयोनिस्तु सर्वदातीन्द्रियो भवेत्।

यत्न इति। जीवनयोनियत्नो यावज्जीवनमनुवर्तते। स चातीन्द्रियः।

तत्र प्रमाणमाह—

शरीरे प्राणसञ्चारे कारणं परिकीर्तितम्॥ १५२॥

१—अनुमायेति। अत्र च "यागो मम स्वर्गकामस्य बलवदनिष्टाननुबन्धीष्टसाधनं मत्कृतिसाध्यतयाप्तेनेष्यमाणत्वात् मन्मात्रकृतिसाध्यतयेष्यमाणमद्भोजनवत्" इत्यनुमानमवधेयम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शरीरे इति । प्राणसञ्चारो हि अधिकश्वासादिः यत्नसाध्यः । इत्थं च प्राणसञ्चारस्य सर्वस्य यत्नसाध्यत्वानुमानात्प्रत्यक्षयत्नबाधाच्चातीन्द्रिययत्नसिद्धिः । स एव जीवनयोनिर्यत्नः ॥ १५२ ॥

गुरुत्वं निरूपयति—

अतीन्द्रियं गुरुत्वं स्यात्पृथिव्यादिद्वये तु तत् ।
अनित्ये तदनित्यं स्यान्नित्ये नित्यमुदाहृतम् ॥१५३॥
तदेवासमवायि स्यात्पतनाख्ये तु कर्मणि ।

अतीन्द्रियमिति । अनित्य इति अनित्ये द्व्यणुकादौ तद्गुरुत्वमसवायि असमवायिकारणम् । पतनाख्य इति । आद्यपतन इत्यर्थः ।

द्रवत्वं निरूपयति—

सांसिद्धिकं द्रवत्वं स्यान्नैमित्तिकमथापरम् ॥ १५४ ॥
सांसिद्धिकं तु सलिले द्वितीयं क्षितितेजसोः ।

सांसिद्धिकमिति । द्रवत्वं द्विविधं सांसिद्धिकं नैमित्तिकं चेति । द्वितीयं नैमित्तिकम् ।

परमाणौ जले नित्यमन्यत्रानित्यमुच्यते ॥ १५५ ॥

परमाणाविति । जलपरमाणौ द्रवत्वं नित्यमित्यर्थः । अन्यत्र पृथिवीपरमाण्वादौ जलद्व्यणुकादौ च द्रवत्वमनित्यम् । कुत्रचित्तेजसि कुत्रचित्पृथिव्यां च नैमित्तिकं द्रवत्वम् ॥ १५३–१५५ ॥

नैमित्तिकं वह्नियोगात्तपनीयघृतादिषु ।

नैमित्तिकमिति । वह्नीति । अग्निसंयोगजन्यं नैमित्तिकं द्रवत्वम् । तच्च सुवर्णादिरूपे तेजसि घृतजतुप्रभृतिपृथिव्यां च वर्तत इत्यर्थः ।

१—सर्वस्येति । एकत्र यत्नसाध्यत्वस्यानुभविकत्वेन तद्दृष्टान्तेन प्राणसञ्चारत्वावच्छेदेन सर्वत्र भोक्तृयत्नजन्यत्वानुमानादिति भावः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

द्रवत्वं स्यन्दने हेतुर्निमित्तं सङ्ग्रहे तु तत् ॥ १५६ ॥

द्रवत्वमिति । हेतुरिति । असमवायिकारणमित्यर्थः । सङ्ग्रहे सक्तुकादिसंयोगविशेषे तद्द्रवत्वं स्नेहसहितमिति बोद्धव्यम् । तेन द्रुतसुवर्णादीनां न सङ्ग्रहः ॥ १५६ ॥

स्नेहं निरूपयति—

स्नेहो जले स नित्योऽणावनित्योऽवयविन्यसौ ।
तैलान्तरे तत्प्रकर्षाद्दहनस्यानुकूलता ॥ १५७ ॥

स्नेह इति । जले इति । जल एवेत्यर्थः । असौ[1] स्नेहः । ननु पृथिव्यामपि तैले स्नेह उपलभ्यते, न चासौ जलीयः, तथा सति दहनप्रातिकूल्यं स्यादत आह । तैलान्तर इति । तत्प्रकर्षात् स्नेहप्रकर्षात् । तैले उपलभ्यमानस्नेहोऽपि जलीय एव । तस्य प्रकृष्टत्वादग्नेरानुकूल्यम् । अपकृष्टस्नेहं हि जलं वह्निं नाशयतीति भावः ॥१५७॥

संस्कारं निरूपयति—

संस्कारभेदो वेगोऽथ स्थितिस्थापकभावने ।

संस्कारेति । वेगस्थितिस्थापकभावनाभेदात्संस्कारस्त्रिविध इत्यर्थः ।

मूर्तमात्रे तु वेगः स्यात्कर्मजो वेगजः क्वचित् ॥१५८॥

मूर्तमात्र इति । कर्मजवेगजभेदाद्वेगो द्विविध इत्यर्थः । शरीरादौ हि नोदनजनितेन कर्मणा वेगो जन्यते । तेन[2] च पूर्वकर्मनाशस्तत उत्तरं कर्म । एवमग्रेऽपि । विना च वेगं कर्मणः कर्मप्रतिबन्धक

१—असाविति—असौ तैले प्रतीयमानः स्नेहः जलीयः तैलान्तर्गतजलभागनिष्ठः तथा सति तैलान्तर्गतजलभागस्वीकारे दहनप्रातिकूल्यप्रसङ्गात् दहननाशप्रसङ्गात् । दहननाशं प्रति संयोगेन जलस्य हेतुत्वादिति भावः । २—तेन चेति । कर्मनाशकस्योत्तरसंयोगस्य तदानीमभावाद्वेगस्यैव कर्मनाशकत्वं कल्प्यत इति भावः । ३—स्थितिस्थापकसाध्यत्वादिति । वेगस्य तूत्तरदेशसंयोगजनकक्रियाजनकत्वमिति न वेगेन स्थितिस्थापकस्यान्यथासिद्धिरिति भावः । स्थितिस्थापकत्वं जातिविशेषः क्रियाविशेषजनकतावच्छेदकतया सिद्धः । स्थितिस्थापकश्च क्रियाविशेषजनकः स्वजन्यक्रियानाश्योऽतीन्द्रियश्चेति मूले उक्तप्रायम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

त्वात्पूर्वकर्मनाश उत्तरकर्मोत्पत्तिश्च न स्यात्। यत्र वेगवता कपालेन जनिते घटे वेगो जन्यते स वेगजो वेगः॥ १५८॥

स्थितिस्थापकसंस्कारः क्षितौ केचिच्चतुर्ष्वपि।
अतीन्द्रियोऽसौ विज्ञेयः क्वचित्स्पन्देऽपि कारणम्॥१५६॥

स्थितिस्थापकेति। अतीन्द्रिय इति। आकृष्टशाखादीनां परित्यागे पुनर्गमनस्य स्थितिस्थापकसाध्यत्वात्। केचिदिति। चतुर्षु क्षित्यादिषु स्थितिस्थापकं केचिन्मन्यन्ते तदप्रमाणमिति भावः। असौ स्थितिस्थापकः। क्वचिदाकृष्टशाखादौ॥ १५६॥

भावनाख्यस्तु संस्कारो जीववृत्तिरतीन्द्रियः।
उपेक्षानात्मकस्तस्य निश्चयः कारणं भवेत्॥१६०॥

भावनाख्य इति। तस्य संस्कारस्य। [†]उपेक्षात्मकज्ञानात्संस्कारानुत्पत्तेरुपेक्षानात्मक इत्युक्तम्। तत्संशयात्तस्यानुत्पत्तेर्निश्चय इत्युक्तम्। तेनोपेक्षान्यनिश्चयत्वेन संस्कारं प्रति हेतुतेति भावः। ननु स्मरणं प्रत्युपेक्षान्यनिश्चयत्वेन हेतुत्वं तेनोपेक्षादिस्थले न स्मरणम्, इत्थं च संस्कारं प्रति ज्ञानत्वेनैव हेतुताऽस्त्विति चेन्न, विनिगमनाविरहेणापि संस्कारं प्रति उपेक्षान्यनिश्चयत्वेन हेतुतायाः सिद्धत्वात्। किंचोपेक्षास्थले संस्कारकल्पनाया गुरुत्वात्संस्कारं प्रति चोपेक्षान्यनिश्चयत्वेन हेतुतायाः सिद्धत्वात्॥ १६०॥

स्मरणे प्रत्यभिज्ञायामप्यसौ हेतुरुच्यते।

[२]असौ संस्कारः। तत्र प्रमाणं दर्शयति—स्मरण इति। यतः

१—अनुभवजन्या स्मृतिहेतु भावना।

†—वस्तुतत्त्वाऽनवधारणमुपेक्षा।

२—उद्देश्यवाचकपदस्य प्रागपेक्षितत्वात् प्रथमतः तस्यानुसन्धानार्थं पश्चान्निर्दिष्टस्यापि असावित्यस्यादावर्थमाह—"असौ संस्कार" इति।

प्रश्नाः—भावनायाः किं लक्षणम् किञ्च तदुत्पत्तौ कारणम्? तत्स्वीकारे का युक्तिः? कुत्र २ भावनयाः हेतुत्वम्? "परेतु"—इत्यादि ग्रन्थस्य क आशयः?

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

स्मरणं प्रत्यभिज्ञानं च जनयत्यतः संस्कारः कल्प्यते। विना व्यापारं पूर्वानुभवस्य स्मरणादिजननासामर्थ्यात्स्वस्वव्यापारान्यतराभावे कारणत्वासंभवात्। न च प्रत्यभिज्ञायाः संस्कारजन्यत्वेन स्मृतित्वापत्तिरिति वाच्यम्, अप्रयोजकत्वात्। परे[२] त्वनुद्बुद्धसंस्कारात्प्रत्यभिज्ञानुदयादुद्बुद्धसंस्काररस्य हेतुत्वापेक्षया तत्तत्स्मरणस्यैव प्रत्यभिज्ञां प्रति हेतुत्वं कल्प्यत इत्याहुः।

*अदृष्टं निरूपयति—

धर्माधर्मावदृष्टं स्याद्धर्मः स्वर्गादिसाधनम् ॥१६१॥

गङ्गास्नानादियागादिव्यापारः स तु कीर्तितः।

धर्माधर्माविति। स्वर्गादीति। स्वर्गादिसकलसुखानां स्वर्गसाधनीभूतशरीरादीनां च साधनं धर्म इत्यर्थः। तत्र प्रमाणं दर्शयितुमाह। यागादीति[१]। यागादिव्यापारतया धर्मः कल्प्यते। अन्यथा यागादीनां चिरविनष्टतया निर्व्यापारतया च कालान्तरभाविस्वर्गजनकत्वं न स्यात्। तदुक्तमाचार्यैः।

२—परेत्विति (चिन्तामणिकाराः) त्वन्मतेऽन्तराकल्पनीयस्मृतिव्यक्त्यावुद्बुद्धसंस्कारस्य हेतुत्वकल्पनं, मन्मते तु प्रत्यभिज्ञायां तद्धेतुत्वकल्पनमितिसमानम्, अन्तरास्मृतिव्यक्तिकल्पने प्रत्यभिज्ञायां तद्धेतुत्वकल्पने च तवाधिकं गौरवमित्यनेनास्वरसः सूचित इति **दिनकरी**।

*—धर्माऽधर्मान्यतरत्वमदृष्टत्वम्।

१—यागादीति। आदिना होमदानपरिग्रहः। **यागत्वं** च देवतोद्देश्यकस्वस्वत्वध्वंसवद्द्रव्यविशेष्यकेच्छात्वम्। देवतोद्देश्यकत्वं देवत.स्वत्ववद्विशेष्यकत्वम्। शब्दमयी देवतेति पक्षे तु तस्या इदमित्यारोपज्ञानविषयत्वमुद्देश्यत्वम्। **होमत्वं** चाग्निसंयोगानुकूलक्रियानुकूलघृतादिवृत्तिनादनादिव्यापारत्वम्। **दानत्वं** च मूल्यग्रहणं विना स्वस्वत्वध्वंसपरस्वत्वजनकत्यागत्वमिति संप्रदायः। यागत्वहोमत्वादयो मानसप्रत्यक्षगम्या जातिविशेषा इत्यन्ये। श्राद्धस्य पित्रपेक्षया यागत्वेन ब्राह्मणपेक्षया दानत्वेन तत्र साङ्कर्यान्नेदं युक्तमित्यपरे इति **दिनकरी**। प्राचीना **प्रभा** तु—"साङ्कर्यस्य जातिबाधकत्वे प्रमाणाभावेन यागत्वादयो मानसप्रत्यक्षसिद्धजातिविशेषा इति नव्याः" इति मन्यते।

प्रश्नाः—धर्मेऽधर्मे च किं प्रमाणम्? कथञ्च तयोर्नाश्यत्वम्? यागादीनामेव कुतो न धर्मत्वम्? अथवा—यागादीनां धर्मत्वमस्ति न वा? उभयोः पक्षयोः कतरः श्रेयान्? नैयायिकसम्मतश्च?

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

चिरध्वस्तं फलायालं न कर्मातिशयं विना । इति ।

ननु यागध्वंस एव व्यापारः स्यात्, नच प्रतियोगितद्ध्वंसयोरेकत्राजनकत्वं, सर्वत्र तथात्वे मानाभावात्, न च त्वन्मते फलानन्त्यं, मन्मते चरमफलस्यापूर्वनाशकत्वान्न तथात्वमिति वाच्यम्, कालविशेषस्य सहकारित्वादित्यत आह—गङ्गास्नानेति । गङ्गास्नानस्य हि स्वर्गजनकत्वेऽनन्तानां जलसंयोगध्वंसानां व्यापारत्वमपेक्ष्यैकमपूर्वमेव कल्प्यते लाघवादिति भावः ।

ननु ध्वंसोऽपि न व्यापारोऽस्तु, न च निर्व्यापारस्य चिरध्वस्तस्य कथं कारणत्वमिति वाच्यम्, अनन्यथासिद्धनियतपूर्ववर्तित्वस्य तत्रापि सत्त्वात्, कार्यकालवृत्तित्वमिव समवायिकारणस्य कारणत्वे इत्यत आह—

कर्मनाशाजलस्पर्शादिना नाश्यस्त्वसौ मतः ॥१६२॥

कर्मनाशेति । यदि ह्यपूर्वं न स्यात्तदा कर्मनाशाजलस्पर्शादिना नाश्यत्वं धर्मस्य न स्यात्, नहि तेन यागादेर्नाशः प्रतिबन्धो वा कर्तुं शक्यते तस्य पूर्वमेव वृत्तत्वादिति । एतेन देवताप्रीतिरेव फलमित्यपास्तम् । गङ्गास्नानादौ सर्वत्र देवताप्रीतेरसम्भवाच्च । देवतायाश्चेतनत्वेऽपि तत्प्रीतेरनुद्देश्यत्वात् । प्रीतेः सुखस्वरूपत्वेन विष्णुप्रीत्यादौ तदसम्भवात् । जन्यसुखादेस्तत्राभावात् । तेन विष्णुप्रीतिजन्यत्वेन पराभिमतस्वर्गादिरेव विष्णुप्रीतिशब्देन लक्ष्यते ॥ १६१ ॥ १६२ ॥

अधर्मो नरकादीनां हेतुर्निन्दितकर्मजः ।

अधर्म इति । नरकादिसकलदुःखानां नारकीयशरीरादीनां च साधनमधर्म इत्यर्थः ।

१—नरकाद्यनिष्टसाधनमधर्मं इत्यधर्मलक्षणम् । निषिद्धकर्मजन्यः संस्कारविशेष आत्मगुण इत्यर्थः । निषिद्धं कर्म च अनिष्टसाधनत्वेन वेदबोधितं कर्म, तच्च सुरापानादि । अधर्मो न प्रत्यक्षः किन्त्वनुमानगम्यः तथाहि—"देवदत्तस्य शरीरादिकं देवदत्तविशेषगुणजन्यं कार्यत्वे सति देवदत्तस्य भोगहेतुत्वात् देवदत्तप्रयत्नजन्यवत्" इति नैयायिकाः । मीमांसकास्तु—

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तत्र प्रमाणमाह—

प्रायश्चित्तादिनाश्योऽसौ जीववृत्ती त्विमौ गुणौ ॥१६३॥

प्रायश्चितेति । यदि ह्यधर्मो न स्यात्तदा प्रायश्चित्तादिनाश्यत्वं न स्यात् । नहि तेन ब्रह्महननादीनां नाशः प्रतिबन्धो वा विधातुं शक्यते तस्य पूर्वमेव विनष्टत्वादिति भावः । जीवेति । ईश्वरस्य धर्माधर्माभावादिति भावः ॥ १६३ ॥

इमौ तु वासनाजन्यौ ज्ञानादपि विनश्यतः ।

इमौ धर्माधर्मौ । वासनेति । अतो ज्ञानिना कृते अपि सुकृतदुष्कृतकर्मणी न फलायालमिति भावः । ज्ञानादपीति । अपिना भोगपरिग्रहः । ननु तत्त्वज्ञानस्य कथं धर्माधर्मनाशकत्वं "नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि" इति वचनविरोधात् । इत्थं च तत्त्वज्ञानिना झटिति कायव्यूहेन सकलकर्मणां भोगेन क्षय इति चेन्न, तत्र भोगस्य वेदबोधितनाशकोपलक्षकत्वात्, कथमन्यथा प्रायश्चित्तादिना कर्मणां नाशः । तदुक्तम्—

"ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुतेऽर्जुन" इति

"क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे" इति च ।

ननु—तत्त्वज्ञानिनस्तर्हि शरीरावस्थानं सुखदुःखादि च न स्याज्ज्ञानेन च सर्वेषां कर्मणां नाशादिति चेन्न, प्रारब्धेतरकर्मणामेव नाशात् । तत्तच्छरीरभोगजनकं हि यत्कर्म तत्प्रारब्धं तदभिप्रायमेव नाभुक्तमिति वचनमिति ।

शब्दं निरूपयति—

शब्दो ध्वनिश्च वर्णश्च मृदङ्गादिभवो ध्वनिः ॥१६४॥

" चोदनाप्रमाणकेष्टसाधनताको धर्मः चोदनाप्रमाणकाऽनिष्टसाधनताकोऽधर्मः " इतिधर्माऽधर्मयोर्लक्षणमाहुः । चोदना च वेद एवेति तेषां मते धर्माधर्मयोः शब्द एव प्रमाणं न त्वनुमानम् ।

प्रश्नाः—धर्माऽधर्मयोः स्वरूपं मूलानुरोधेन प्रपञ्चनीयम् ?

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कण्ठसंयोगादिजन्या वर्णास्ते कादयो मताः।
सर्वः शब्दो नभोवृत्तिः श्रोत्रोत्पन्नस्तु गृह्यते॥१६५॥
वीचीतरङ्गन्यायेन तदुत्पत्तिस्तु कीर्तिता।

शब्द इति। नभोवृत्तिराकाशसमवेतः दूरस्थशब्दस्याग्रहणादाह श्रोत्रेति। ननु मृदङ्गाद्यवच्छेदेनोत्पन्ने शब्दे श्रोत्रे कथमुत्पत्तिरत आह। वीचीति। आद्यशब्दस्य वहिर्दशदिगवच्छिन्नोऽन्यः शब्दस्तेनैव शब्देन जन्यते। तेन चापरस्तद्व्यापकः। एवं क्रमेण श्रोत्रोत्पन्नो गृह्यत इति।

कदम्बगोलकन्यायादुत्पत्तिः कस्यचिन्मते॥ १६६॥

कदम्बेति। आद्यशब्दाद्दशदिक्षु दश शब्दा उत्पद्यन्ते। तैश्चान्ये दश शब्दा उत्पद्यन्त इति भावः। अस्मिन्मते गौरवादुक्तं कस्यचिन्मत इति॥ १६४॥ १६५॥ १६६॥

ननु शब्दस्य नित्यत्वादुत्पत्तिकथनमसङ्गतमत आह—

उत्पन्नः को विनष्टः क इति बुद्धेरनित्यता।

उत्पन्न इति। शब्दानामुत्पादविनाशप्रत्ययशालित्वादनित्यत्वमित्यर्थः।

सोऽयं क इति बुद्धिस्तु साजात्यमवलम्बते॥१६७॥

ननु—स एवायं ककार इत्यादिप्रत्यभिज्ञानाच्छब्दानां नित्यत्वम्, इत्थं चोत्पादविनाशबुद्धिर्भ्रमरूपैवेत्यत आह—सोऽयं क इति। साजात्यमिति। तत्र प्रत्यभिज्ञानस्य तत्सजातीत्वं विषयो न तु तद्व्यक्त्यभेदो विषयः उक्तप्रतीतिविरोधात्। इत्थं च द्वयोरपि प्रतीत्योरभ्रमत्वमिति॥ १६७॥

प्रश्नाः—कतिविधः शब्दः! किञ्च तस्य लक्षणम्? तदुत्पत्तिप्रकारश्च कीदृशः? एकत्र उत्पन्नः शब्दो दशादिशास्थितैः पुरुषैः कथं श्रोतुं शक्यते? "नित्यः शब्द" इति केषां मतम्? कथञ्च तत्खण्डितम्? अनित्यपक्षे "सोऽयं कः" इति प्रत्यभिज्ञायाः कथमुपपत्तिः?

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ननु सजातीये सोऽयमिति प्रत्यभिज्ञा कुत्र दृष्टेत्यत्र आह—

*तदेवौषधमित्यादौ सजातीयेऽपि दर्शनात्।
तस्मादनित्या एवेति वर्णाः सर्वे मतं हि नः ॥१६८॥

इति श्रीविश्वनाथपञ्चाननकृतकारिकावली समाप्ता ॥

यदौषधं मया कृतं तदौषधमन्येनापि कृतमित्यादिदर्शनादिति भावः ॥ १६८ ॥

इति श्रीमहामहोपाध्यायविद्यानिवासभट्टाचार्यसुतश्रीविश्वनाथपञ्चानन-
भट्टाचार्यविरचितायां सिद्धान्तमुक्तावल्यां गुणनिरूपणम् ।

समाप्तश्चायं ग्रन्थः ।

---

* परममूले "तदेवौषधम्" इति । आदिना सैवेयं दीपकलिकेत्यादेः परिग्रहः । "मया कृतम्" इति । मयैव कृतमित्यर्थः । यथाश्रुते तु उभयकर्तृकौषधस्याभेदासम्भवादसाङ्गत्यापत्तेः । तथाच—स्वकर्तृकत्वस्वभिन्नकर्तृकत्वरूपविरुद्धधर्माध्यासाहितभेदप्रत्ययस्य प्रतिबन्धकस्य सत्त्वान्न प्रत्यभिज्ञाया व्यक्त्यभेदो विषयः किन्तु तत्सजातीयाऽभेदो विषय इति भावः । प्रत्यभिज्ञा च—पूर्वावस्थाऽनुभवजनितसंस्कारसहकृतेन्द्रियजन्यज्ञानम् । अधिकं मदीयप्रभायां द्रष्टव्यम् ।

वेदैर्वस्वङ्कचन्द्रेऽब्दे वैक्रमे शुभवत्सरे
माघे मासे दले शुक्ले पञ्चम्यां भृगुवासरे ॥ १ ॥
"सौभाग्यवत्या" नाम्नेयं विवृतिर्मूलसौख्यदा
लघ्वी छात्रहितार्था च पूरिता मयका बुधाः ! ॥ २ ॥
पञ्चमे जार्जभूपेन्द्रे भारते सति शासति ।
रचितैषा जगत्पित्रोः पादयोश्च समर्पिता ॥ ३ ॥
यद्यत्र किञ्चित्स्खलितं मदीयं
बुधा ! भवद्दृष्टिसमागतं स्यात् ।
तच्छोधयित्वोपकृतिर्विधेया
सर्वो न सर्वं किल वेत्ति विज्ञः ॥ ४ ॥

इति श्रीपण्डितदेवीदासतनुजनुषा सारस्वतवंशावतंसेन. सतीविष्णुदेवीगर्भजेन
स्यालकोटवास्तव्य–जैनन्यायविशारद–कवितार्किक [तन्त्रचक्रवर्त्ति]
दर्शनाचार्येण नृसिंहदेव शास्त्रिणा विरचिता न्यायमुक्तावल्या
"सौभाग्यवती" नाम (लघु) विवृतिः समाप्ता ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh